पूर्वमीमांसा

भाष्यवार्तिकयोर्मतभेदानामध्ययनम्

[A Study of the Vārtikam of Kumārilabhaṭṭa
with Special reference to his Criticism of
Śabarā's views]

रचयिता :

डा. ए. यज्ञरामुलु

प्रस्तावना :

डा. पी. श्रीरामचन्द्रुडु

पूर्वमीमांसा
भाष्यवार्तिकयोर्मतभेदानामध्ययनम्

[A Study of the Vārtikam of Kumārilabhaṭṭa with Special reference to his Criticism of Śabarā's views]

रचयिता :

डा. ए. यज्ञरामुलु

प्रस्तावना :

डा. पी. श्रीरामचन्द्रुडु

Purvamimamsa Bhashyavartikayormatabheda-namadhyayanam

by : **Dr. A. Yagna Ramulu**
"Gurukrupa"
1-3-183-39/12/B/1/2, Kavadiguda,
Hyderabad-500 380

1993

Copies 1000

This Book is Published with the Financial Assistance of
TIRUMALA TIRUPATI DEVASTHANAMS
Under their scheme :
"Aid to Publish Religious Books"

मूल्यम् : 40-00

पूर्वमीमांसाभाष्यवार्तिकयोर्मतभेदानामध्ययनम्

रचयिता : **डा. ए. यज्ञरामुलु**
"गुरुकृपा"
1-3-183-39/12/B/1/2, कवाडीगूडा, हैदराबाद्-500 380

***Printed by* :**
Shivaji Press, Gunj Bazar, Secunderabad-3

॥ श्रीः ॥

प्रस्तावना

– पुल्लेल श्रीरामचन्द्रः

तत्रभवान् जैमिनिः धर्माधर्मस्वरूपनिर्णायिकां, वेदार्थनिर्धारणोपयोग्युपसहस्रन्यायसंदृब्धां द्वादशाध्यायीं प्रणिनाय, यस्या एव च प्राथतं नाम 'द्वादशलक्षणी' इति । कदा वा अस्याः 'मीमांसा' इति नाम, केन वा प्रवर्तितमिदंप्रथमतयेति न ज्ञायते, यतः जैमिनिसूत्रेषु वा तद्भाष्ये वा नेवैतन्नामोपलभ्यते । अलंकारशास्त्रमप्यविहाय सर्वेषामपि शास्त्राणां चतुर्मुखोपज्ञतां त्रिणयनोद्भूततां वा प्रतिपादयन्ति प्रसिद्धान्येव वाक्यानि। मीमांसा विषयेऽपि–'ब्रह्मा प्रजापतये मीमांसां प्रोवाच' इत्यादीनि वाक्यानि शास्त्रदीपिकादिषूपलभ्यमानानि गतानुगतिकन्यायेन प्रवृत्तानीति नैव तेषां नितरां प्राचीनता अभ्युपगन्तुं शक्यते । पुरास्य शास्त्रस्य (दर्शनस्य) 'जैमिनीयम्' इत्येव प्रसिद्धिरासीत् । अत एव पञ्चमशताब्दीयः हरिभद्रसूरिः 'षड्दर्शनसमुच्चये'–

'बौद्धं नैयायिकं सांख्यं जैनं वैशेषिकं तथा ।
जैमिनीयं च नामानि दर्शनानाममून्यहो ।'

इति दर्शनमिदं जैमिनीयमिति निरदिशत् ।

प्रसङ्गवशतश्च अयं प्रश्न उदेति–कति वा पुरा दर्शनानि अङ्गी-

कृतानीति। पूर्वोदाहृतश्लोकोक्त एव विभागः प्राचीन इति प्रतिभाति। वेदप्रामाण्याङ्गीकारानङ्गीकारौ निमित्ती कृत्य कृतः आस्तिकदर्शनानि नास्तिकदर्शनानीति विभागः, ततश्च सांख्य-योग-न्यायवैशेषिकपूर्वमीमांसा-उत्तरमीमांसारूपाणि षड् दर्शनानि आस्तिकानीत्यभ्युपगम्य केवलं षट्-संख्यापूर्तये बौद्धदर्शनगतान् चतुरोऽवान्तरभेदान् चतुर्दर्शनीत्वेन परिगणय्य लोकायतिक-जैनदर्शनाभ्यां मेलनेन नास्तिकदर्शनान्यपि षडिति व्यवहारश्च कालान्तरे कृत इति अभ्यूहितुं शक्यते। वस्तुतः सावान्तरभेदस्य बौद्ध-दर्शनस्य एकदर्शनत्वेनैवाभ्युपगमः उचितः। अन्यथा पूर्वमीमांसायां भाट्ट-प्राभाकरमतभेदेनस्य दर्शनद्वयतया, द्वैताद्वैतविशिष्टाद्वैतशुद्धाद्वैतादिभेदन उत्तरमीमांसायाः पञ्चषदर्शनतया चाङ्गीकारे आस्तिकदर्शनानामपि सङ्ख्यायां वृद्धेः संभाव्यत्वात्। अतश्च षड् आस्तिकदर्शनानि षड् नास्तिक-दर्शनानीति च प्रायोवाद एव। अत एव सर्वदर्शनसंग्रहे आहृत्य पञ्च-दशानां दर्शनानां संग्रहः दृश्यते यत्र चत्वारोऽपि बौद्धमतभेदाः एकदर्श नत्वेन निर्दिष्टाः, द्वैताद्वैतविशिष्टाद्वैतादयश्च भिन्नदर्शनतया।

प्रकृतमनुसरामः– 'अथातो धर्मजिज्ञासा' इति कृतप्रारम्भस्यास्य शास्त्रस्य धर्मजिज्ञासाशास्त्रमित्येव नाम्ना भाव्यम्। शाबरभाष्ये अतः शब्दनिरूपणावसरे 'धर्मं जिज्ञासितुम् इच्छेत्' इति, अन्ते 'तस्माद्धर्मो जिज्ञा सितव्यः' इति च व्याख्यातम्। प्रथमे व्याख्याने सन्वाच्याया इच्छायाः इच्छेदित्यनेनोक्त्या इच्छाया पौनरुक्त्यमाशंक्य तत् कथंचित् परिहृतं वार्तिककारैः—सन्वाच्यायाः इच्छाया ज्ञानं कर्म, इषिवाच्यायायास्तु धर्मोवा, ज्ञानेच्छा वा उभयं वा कर्मेति। पार्थसारथिमिश्रश्च–'न चेच्छाविषय-मिच्छान्तरं नेष्यत इति वाच्यम्। मन्दाग्नीनां भोजनेच्छायामिच्छादर्श-नात्' इति वदन्तः अनुपपत्तिं परिहर्तुं प्रायतन्त। परन्तु ज्ञानस्य वस्तु-तन्त्रत्वात्, तद्विषयायाश्च इच्छायाः विधातुमशक्यत्वात् 'ज्ञानेच्छा भवति' इति वा जिज्ञासा पदस्य विचारे लक्षणाम् अङ्गीकृत्य 'विचारः कर्तव्यः'

इति वा यद्यर्थः प्रतिपाद्यते तदा सर्वं सुष्टु स्यात्। .अत एव रत्नप्रभाकारैः 'तस्माद् ब्रह्म विजिज्ञासितव्यम्' इति शाङ्करभाष्यवाक्यं व्याचक्षाणैः–'अत्र सन् प्रत्ययस्य विचारलक्षकत्वं तव्यप्रत्ययेन सूचयति ··· ··· ·· ·· ·········· तेन ब्रह्मज्ञानाय विचारः कर्तव्यः इत्यर्थः इति प्रतिपादितम्। इयं रीतिः श्री गोडा सुब्रह्मण्यशास्त्रिभिरप्यङ्गीकृता–'अस्याधिकरणस्य तद् विजिज्ञासस्व' इति श्रुतिर्विषयः। तादृशश्रुत्यानुगुण्येन सूत्रेऽपि कर्तव्यपदाध्याहारः। तदनुरोधेन च सन्प्रत्ययस्य विचारे लक्षणा। तथा च ब्रह्मज्ञानाय विचारः कर्तव्यः इति सूत्रार्थः संपद्यते' इति ब्रह्मसूत्रभाष्यप्रदीपिकायां लिखद्भिः। अयमेव पन्थाः जैमिनिसूत्रव्याख्यानेऽपि अनुसृतः स्यात् पुरातनैः व्याख्यातृभिः। विचार इत्यर्थे मीमांसा शब्दस्य प्रयोगः दृश्यते छान्दोग्योपनिषदादिषु–'प्राचीन शाल औपगवः ···महाश्रोत्रियाः समेत्य मीमांसां चक्रुः' (छा. ३-५-११)। 'मीमांसा विचारणाम्' इति च तत्र भाष्यम्। यद्यपि 'मानेर्जिज्ञासायाम्' इति वार्तिकमनुरुध्य 'मीमांसा' शब्दस्यापि जिज्ञासा (ज्ञानेच्छा) इत्येवार्थः तथापि रूढ्यायं शब्दः विचारमभिदधाति। अत एवाहुः वाचस्पतिमिश्राः–'पूजितविचारवचनो मीमांसाशब्दः' इति, अयं विचारवचनो मीमांसाशब्दः जैमिनीयनयस्य नामतया प्रायुज्यत कैश्चित् इति अभ्यूहितुं शक्यते। अस्य तत्प्रथमतया प्रयोगः वार्तिककारैः भट्टपादैरेव कृतः दृश्यते श्लोकवार्तिके–'तत्प्रसादात् करिष्येऽहं मीमांसाश्लोकवार्तिकम्' (तर्कपादः–२) 'मीमांसाख्यातु विद्येयं बहुविद्यान्तरस्थिता' (त. या. १३) इत्यादिषु वार्तिकेषु, श्री शङ्करभगवत्पादाश्च बादरायणं दर्शनं 'शारीरकमीमांसा' वेदान्तमीमांसा शास्त्रम्' इति च व्यवजह्रुः-'यथाचायमर्थः सर्वेषां वेदान्तानां तथा वयमस्यां शारीरकमीमांसायां प्रदर्शयिष्यामः, वेदान्तमीमांसाशास्त्रस्य व्याचिख्यासितस्येदमादिमं 'सूत्रम्' (ब्र. सू. भा. १-१-१) इति। कालक्रमेण च धर्ममीमांसायाः पूर्वमीमासा इति ब्रह्ममीमांसायाश्च उत्तरमीमांसा इति प्रथितिरभूत्।

जैमिनिसूत्राणां सुरुचिरा व्याख्या शबराचार्यैर्निरमायि यस्या एव च लोके प्रसिद्धिः शाबरभाष्यमिति । श्री शङ्करभगवत्पादानां वृद्धसमकालिकतया प्रसिद्धाः कुमारिलभट्टपादाः शाबरभाष्यस्य केषुचिद्भागेषु विस्तृतां, कुत्रचित् नातिविस्तृतां, कुत्रचित् संक्षिप्तां च व्याख्यामुपन्यबध्नन्। प्रथमाध्यायप्रथमपादस्य व्याख्यायाः श्लोकवार्तिकमिति, ततो निवीतान्तस्य भागस्य (तृतीयाध्यायतृतीयपादान्तस्य) व्याख्यायाः 'तन्त्रवार्तिकम्' इति तदग्रिमभागव्याख्यायाश्च 'टुप्टीका' इति नामानि प्रसिद्धानि । बहुमुखप्रज्ञाशालिभिः स्वतन्त्रचिन्तनतुरैश्च कुमारिलभट्टपादैः स्ववार्तिके कुत्रचित्-भाष्ये केवलं सूचिताः, बहुषु स्थानेषु भाष्येप्यनुक्ताः नैके सिद्धान्ताः महता विस्तरेण प्रतिपादिताः, ये प्रायः सर्वैरपि दार्शनिकैः सादरमुदाह्रियन्ते ।

उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते । तं ग्रन्थं वार्तिकं प्राहुः' इति वार्तिकलक्षणं सार्थकयन्तः भट्टपादाः नैकेषु स्थानेषु भाष्यकारैः विप्रतिपत्तिः कुत्रचित् भाष्योक्तस्य यथाकथं चित् अन्यथा समन्वयनेन, कुत्रचित् स्पष्टतया च प्रदर्श्यते । प्रथमसूत्र एव 'धर्मजिज्ञासा' इत्यस्य भाष्यकारैः प्रदर्शितं धर्माय जिज्ञासा' इति चतुर्थीसमासम् आक्षिप्य षष्ठीसमासाङ्गीकार एव भाष्यकृतां तात्पर्यम् इति यथाकथंचित् समर्थयन्ति भट्टपादाः। अनया रीत्या तत्र तत्र भाष्योक्तीः अन्यथाकुर्वन्तः इमे भट्टपादाः केषुचित् स्थानेषु प्रत्यक्षत एव तन्मतविरुद्धं मतं प्रदर्शयन्ति ।

निबन्धेऽस्मिन् डा. यज्ञरामः (यज्ञरामुलु) यत्र भाष्य-वार्तिककारयोर्मध्ये मतभेदः दृश्यते तादृशानि त्रिचत्वारिंशत्स्थानानि समुच्चित्य तत्रत्यं मतभेदं स्पष्टतया विशदीकरोति । 'सिद्धान्तानां' खण्डनम्' 'उदाहरणानामनुदाहरणत्वप्रदर्शनम्' इत्यादिरीत्या विषयभेदमनुसृत्य अष्टधा विभक्तोऽयं निबन्धः । पार्थसारथिमिश्र–माधवाचार्य–खण्डदेवादिभिः कुत्र वा भाष्यकारमतनुसृतं, कुत्र वा वार्तिककारमतम् इत्यादयोऽ–प्यंशाः सुविपुलं सोदाहरणं च चर्चिताः। तत्र तत्र स्वीयं मतमपि सयुक्तिकं प्रादर्शि प्रबन्धा ।

भाष्यकृतां मते तत्र तत्र वार्तिककारैः व्युदस्तेऽपि केचित् पण्डिताः इमं व्युदसनतया नाङ्गीकुर्वन्ति (मीमांसादर्शनप्रथमभागभूमिकायां वि.-पाशशास्त्रिणः P. ४) प्राचीनानां मतं न कदापि व्युदसनीयमिति एतादृशामाग्रहः। प्राचीनैर्लिखितं सर्वमपि यदि याथातथ्येन अर्वाचीनैरभ्युपागं स्यत् तदा न कस्यापि अर्वाचीनस्य ग्रन्थरचनायां प्रवृत्तिरभविष्यत्। कतीनां वा पूर्वेषां मतं नाखण्डि भट्टपादैः। शास्त्रविरुद्धानि मतानि निरस्य शुद्धानां सिद्धान्तानां स्थापनैव आत्मनः ग्रन्थनिर्मितिप्रवृत्तिहेतुः इति आदावेव तैःस्पष्टीकृतम् :–

"प्रायेणैव हि मीमांसा लोके लोकायती कृता
तामास्तिकपथे कर्तुमयं यत्नः कृतो मया' (श्लोकवार्तकम्. १-१०)

"मीमांसा हि भर्तृमित्रादिभिरलोकायतैव सती लोकयतीकृता नित्यनिषिद्धयोः इष्टानिष्टं फलं नास्तीत्यादिबह्वपसिद्धादन्तपरिग्रहेणेति तामास्तिकपथे कर्तुं वार्तिकारम्भयत्नः कृतो मयेति"

– न्यायरत्नाकरः।

किंचित्तन्त्रमङ्गीकृत्य तन्त्रान्तरकृतमाचार्याणां यथेष्टं खण्डने यदि न दोषः एकस्मिन्नेव तन्त्रे विभिन्नमताविष्करणे को वा दोष इति न जानीमः। निष्पक्षपातया दशा तत्त्वनिर्धारणे खलु प्रयतितव्यं विपश्चिद्भिः।

आमूलाग्रं भाष्यवार्तिके अनुशील्य डा. यज्ञरामेण महता प्रयासेन निर्मितोऽयं ग्रन्थः विदुषामाशिषां जिज्ञासूनामुपकाराय च भवेदित्याशास्महे।

हैदराबाद, पुल्लेल श्रीरामचन्द्रः
होली महोत्सवदिवसः,
८–३–१९९३.

श्रीः

मीमांसाशास्त्रपरिचयः

Dr मुदिगण्टिगोपालः
प्राचार्यः
संस्कृतविभागः
उस्मानिया विश्वविद्यालयः
हैदराबाद.

वैदिकवाङ्मये साङ्गे, सोपाङ्गे च षड्दर्शनजाते, पूर्वमीमांसाशास्त्रस्य प्राधान्यमस्तीति निर्विवादांशः । संहितासु ब्राह्मणग्रन्थेषु सूत्रग्रन्थेषु च यानि वचनानि याज्ञिकप्रक्रियाकानि तेषां सान्दिग्ध्यं निवार्य, शङ्कानिवारणपुरस्सरं स्पष्टीकृतान्यस्मिन् शास्त्रे । अथ च कालक्रमेण याज्ञिकसम्प्रदाये यत्क्रियाकलापं सदृढमभवत्, तस्यापि समीचीनत्वं प्रतिपादितम् । धर्मसूत्रेषु च वेदविरोधिनोंऽशाः प्रक्षिप्ताः, तेषामपि निराकरणं कृतम् । इदं शास्त्रमतिविस्तृतं तद्यथा—अस्य शास्त्रस्य सङ्कर्षणकाण्डन्तो भागोऽन्यदर्शनपञ्चकापेक्षयाऽपि विस्तृततरमिति, अस्य शास्त्रस्य पूर्वपण्डितैः कृतं विमर्शनमतीव प्रामुख्यं वहति । न्याय साङ्ख्यादिदर्शनानां अध्येतारोऽध्यापयितारश्च सुलभाः; परन्तु मीमांसा पारदृश्वानस्तु सदुर्लभाः ।

अस्य शास्त्रस्य प्राक्तनाः व्याख्याकाराः परम्पराप्राप्तान्युदा-

हृरणवचनानि, उदाहृरन्, यानि सम्प्रति अलभ्येभ्यः संहिताब्राह्मणा-
न्ि ोऽवाचिन्वन् । परन्तु अस्मिन्काले काचन एव शाखा उपलभ्यन्ते,
तथैव कानिचिदेव ब्राह्मणानि । परिणामतः, शबरस्वाम्यादिभिः स्व
स्व व्याख्यासु उद्धृतवचनान्यप्राप्तमूलानि । अनेन कारणेनापीदं
शास्त्रं दुर्गमं दुर्बोधं च ।

मीमांसाशास्त्रे प्रधानतया वादद्वयं वर्तते । एकस्तु शबरस्वा-
मिनः, द्वितीयश्च शाबरभाष्यस्यव्याख्यातृभेदेन मतत्रयं दृश्यते । प्रथमं
कुमारिलभट्टस्य, द्वितीयं प्रभाकरस्य, तृतीयं च मुरारिमिश्रस्य,
"मुरारेस्तृतीयपन्थाः" अधुनात्वाद्यं मतद्वयमेव प्रचलति । मुरारिमतानु
यायिनास्तु विरलाः ॥

मीमांसा शब्दस्य "जिज्ञासा" इत्यर्थः । पूर्व मीमांसायाः, धर्म
मीमांसा = कर्म मीमांसा, उत्तर मीमांसायाश्च = ब्रह्ममीमांसा इति नाम
प्रचलितम् ।

विषयभेदेन मीमांसा दर्शनं द्विधा विभक्तम् । पूर्वमीमांसा,
उत्तरमीमांसा चेति । पूर्वमीमांसाशास्त्रं शोडषाध्यायात्मकम्, उत्तर
मीमांसाशास्त्रं च चतुरध्यायात्मकम् । पूर्वमीमांसाया अन्तिम चत्वारोऽ
ध्यायाः सङ्कर्षकाण्ड अथवा सङ्कर्षण काण्ड इत्यपि कथ्यन्ते । काण्ड-
मिदमधुना उत्सन्नप्रायम् । अत्र शबरस्वामिना काण्डस्यास्य भाष्यं न
लिखितम् इत्येव कारणं भवेत् । मीमांसाशास्त्रद्वयमिदं पुराकाले
अविभक्तमासीदिति ज्ञायते –

"तदिदं विंशत्यध्यायनिबद्धम् । (मीमांसा शास्त्रम्) तत्र
षोडशाध्यायनिबद्धं पूर्वमीमांसाशास्त्रम् । पूर्वकाण्डस्य धर्मविचार
परायणं जैमिनिकृतम् । तदन्यदध्यायचतुष्कं उत्तरमीमांसाशास्त्रम् ।

उत्तरकाण्डस्य ब्रह्मविचारपरायणं व्यासकृतं प्रपञ्चहृदयम् । रामानुजाचार्यैरपि श्रीभाष्यारम्भे अनयोः शास्त्रयोरैक्यं प्रतिपादितम् ।–

"वक्ष्यति च कर्म ब्रह्ममीमांसयोरेकशास्त्रत्वम् । संहितमेतत् शारीरिकं जैमिनीयेन षोडशलक्षणेनेति शास्त्रैकत्वसिद्धिः ।" वेदान्ताचार्यैरपि सेश्वरमीमांसायां शास्त्रैक्यं सूचितम् –

"अथातो धर्मजिज्ञासा" इत्यारभ्य "अनावृत्तिशब्दादनावृत्तिशब्दात्" इत्येवमन्तं विंशतिलक्षणं एकशास्त्रम् ।" उत्तर मीमांसाशास्त्रे अधस्सूचितानि सूत्राण्यपि मीमांसा शास्त्रयोरैक्यमुद्घोषयन्ति ।–

१. प्रदानवदेव तदुक्तम् । ३-३-४३

२. श्रुत्यादिबलीयस्त्वाच्च न बाधः । ३-३-३९

३. लिङ्गभूयस्त्वात् तद्धि बलीयः तदपि च । ३-३-४४

४. स्वामिनः फलश्रुतेः इत्यात्रेयः । ३-४-४४

५. आर्त्विज्यं इति औडुलोमिः तस्मै परिक्रियते । ३-४-४५

६. द्वादशाहवत् उभयं बादरायणोऽतः । ४-४-१२.

एषु सूत्रेषु कर्मकाण्डगता अनेके न्यायाः उल्लिखिताः । द्वितीयतृतीय सूत्राभ्यां "श्रुति–लिङ्ग–वाक्य–प्रकरण–स्थान समाख्यानां समवाये पारदौर्बल्यं अर्थ विप्रकर्षात्" इति पूर्वमीमांसाशास्त्रस्य सूत्रं सङ्केतितम् । अधुना तु मीमांसाशास्त्रस्य भेदद्वयं दृश्यते । परन्तु पुरातनकाले भेदत्रयमसीदिति ज्ञायते । एते च भागाः, कर्मकाण्डः दैवतकाण्डः, आध्यात्मकाण्डश्च । दैवतकाण्डं तु अधुना नाममात्रेणैवावशिष्टम् ।

सुदीर्घकाले कर्मकाण्डस्य आध्यात्मकाण्डस्य च अनेके वादाः परस्परविरुद्धं च आचरणं प्रचलितम् । एतेषु वादेषु 'मन्त्रानर्थक्यवादः' वेदविरुद्धोऽन्यतमः । एवमेव कर्मज्ञानकाण्डयोः परस्परं विरोधः निन्दा च प्रचलिता । मीमांसाशास्त्रस्य परम्परा अतिप्राचीनकाले प्रवृत्ता । पार्थसारथिमिश्राः श्लोकवार्तिककारा इमां परम्परामेवं सूचयामासुः । 'ब्रह्मा प्रजापतये मीमांसां प्रोवाच, सोऽपि इन्द्राय, सोऽपि आदित्याय, स च वशिष्टाय, सोऽपि पराशराय, पराशरः कृष्णद्वैपायनाय, सोऽपि जैमिनये' । श्लोकवार्तिकस्य प्राचीनतराः टीकाकाराः सुचरितमिश्रा इमां परम्परामेवमसूचयन्–'इहैव कैश्चिदुक्तम्–

ब्रह्मा महेश्वरो वा मीमांसां प्रजापतये प्रोवाच । प्रजापतिरिन्द्राय, इन्द्र आदित्याय इत्येवमादि । जैमिनिः कृष्णद्वैपायनशिष्यः शास्त्रस्यास्यान्तिमः प्रवक्ता । पूर्वमेव विंशत्यध्यात्मकस्यास्य शास्त्रस्यैक्यमुक्तमस्माभिः । कैश्चित्प्राचीनव्याख्यातृभिः सम्पूर्णस्य शास्त्रस्य व्याख्यानं कृतवन्तः । तदनन्तरमन्यैरुत्तरमीमांसाभागे ब्रह्मकाण्डनामकं विहाय पूर्वमीमांसाशास्त्रस्य षोडशाध्यायात्मकस्य व्याख्यानं कृतवन्तः । शबरस्वामिना तु सङ्कर्षकाण्डमपहाय द्वादशाध्यायात्मकस्यैव शास्त्रस्य भाष्यं रचितम् । प्रपञ्चहृदयकारेण इदं एवमुपन्यस्तम् ।

'तस्य विंशत्यध्यायनिबद्धस्य मीमांसाशास्त्रस्य कृतकोटिनामधेयं भाष्यं बोधायनेन कृतम् । तद्ग्रन्थबाहुल्यादुपेक्ष्य किञ्चित्संक्षिप्तमुपवर्षेण कृतम् । तदपि मन्दमतीन्प्रति दुष्प्रतिपादं विस्तीर्णत्वादुपेक्ष्य षोडशलक्षणपूर्वमीमांसाशास्त्रमात्रस्य देवस्वामिना अतिसंक्षिप्तम् । 'भवदासेनाऽपि कृतं जैमिनीयभाष्यम् । पुनर्द्विकाण्डे धर्ममीमांसाशास्त्रे पूर्वस्य तन्त्रकाण्डस्य आचार्य शाबरस्वामिना अतिसंक्षेपेण सङ्कर्षकाण्डं

द्वितीयमुपेक्ष्य कृतं भाष्यम् । तथा च देवताकाण्डस्य सङ्कर्षेण ब्रह्म-काण्डस्य भगवत्पाद ब्रह्मदत्त भास्करादिभिः मतभेदेनाऽपि कृतम् । तथा च शाबरभाष्यं वाक्यार्थभेदमभ्युपगम्य भट्टप्रभाकराभ्यां द्विधा व्याख्यातम् । तत्र भावनापरत्वेन भट्टकुमारेण, नियोगपरतया प्रभाकरेण ।

सम्प्रत्युपलभ्यमानेषु भाष्येषु शबरस्वामिनो भाष्यं प्राचीनतमम् । यद्यपि सङ्कर्षकाण्डस्योपलभ्यमानं देवस्वामिनो भाष्यं ततोऽपि प्राचीनतरम् ।

अस्य शाबरभाष्यस्य व्याख्याकारेषु भट्टकुमारिलप्रभाकरौ प्रधानतमौ । भारतीयदार्शनिकेषु भट्टकुमारिलः जाज्ज्वल्यमानं रत्नम् । अनेक बौद्ध–जैनादिभिः वेदविरोधिभिः कृतानामाक्षेपाणां समुचितं निरसनं कृतम् । भट्टकुमारिलविषये आभाणकमेकं विद्यते । 'वेदाः' वेदविरोभिः क्रियमाणान् आक्षेपानसहमानाः खिन्नहृदयाः स्त्रीरूपं धृत्वा एव मुद्घोषयन्ति स्म ।

'किं करोमि क्व गच्छामि को वेदानुद्धरिष्यति' एतत् शृत्वा कुमारिलेनोक्तम् –

'मा भिभेहि वरारोहे भट्टाचार्योऽस्ति भूतले' निस्संशयं कुमारिलभट्टेन वेदोद्धारे कृतो यत्न एव वेदानां रक्षणे समर्थः सफलश्चाभूत् । यथा शङ्करभगवत्पादास्तथैव कुमारिलभट्टा अपि प्रातस्मरणीयाः वैदिक मतानुयायिभिः ।

यथोक्तं मीमांसकेषु एकं मतं सेश्वरम्, अन्यच्च निरीश्वरम् । निरीश्वरादिमते न अनादिरियं सृष्टिः न च अपौरुषेयाश्च वेदा इति ।

महाभाष्यदीपिकायां भर्तृहरिणाऽप्यस्य मतस्य निरीश्वरवादित्वं सूचितम् । तद्यथा–सिद्धा द्यौः सिद्धा पृथिवी, सिद्धमाकाशमिति । आर्हतानां मीमांसकानां च नैवास्ति विनाश एषाम् ।' पुनरपि वाक्यपदीये ब्रह्मकाण्डे भर्तृहरिणा एवमुक्तम्–'येषां तावदियं नित्यैव लोकस्य विभागेन प्रवृत्तिः नैव काचित् युगमन्वन्तरव्यवस्था, नापि ब्रह्मणोऽसाधारणः कश्चित् अहोरात्रप्रविभागो विद्यत इति दर्शनम् ।' शबरस्वामिनाऽपि ईश्वरस्य प्रत्यक्षं खण्डनं यद्यपि न प्रतिपादितम्, तथाऽपि तस्य वेदापौरुषेयत्वस्थापनं, वेदाविभागाय ईश्वरतत्वस्यानावश्यकत्वं सूच्यते ।

कुमारिलभट्टेन श्लोकवार्तिके सर्वज्ञस्येश्वरस्य सृष्ट्युत्पत्तेः प्रलयस्य वा प्रतिपादनं उक्तम् । एवमेव कुमारिलभट्टस्य प्रभाकरस्य च मतानुयायिनः मीमांसाशास्त्रं निरीश्वरवादि इत्येव मन्यन्ते । परन्तु प्रभाकरविजयस्य सम्पादकद्वयं अनन्तकृष्णशास्त्रिणा रामनाथशास्त्रिणा एवमुक्तम्–'कुमारिलभट्टादिभिः यदीश्वरस्य प्रत्याख्यानं कृतम् तदन्यमतानुयायिनामीश्वरसिद्ध्यर्थं स्वीकृतस्यानुमानप्रमाणस्यैव न तु ईश्वरस्य–एवं च ईश्वरे परोक्तमनुमानं निरस्तम्, नेश्वरो निरस्तः ।'

अनेन स्पष्टं यत्कुमारिलप्रभाकरयोऽनुयायिनः केचन स्वमतमनुसृत्य, कुमारिलप्रभाकरौ सेश्वरवादिनाविति केचन च निरीश्वरवादिनावित्यूचुः । एवं प्रतीयते यद्भाष्यकारा अनीश्वरवादि बौद्ध–जैनदार्शनिकानामीश्वर–वेद–सृष्टेश्च ईश्वरकर्तृत्वा दिषये आक्षेपाणां निरासने असामर्थ्यात् 'सर्वनाशे समुत्पन्ने अर्धं त्यजतु पण्डिताः' इति न्यायमनुसृत्येश्वरसत्तां तस्य जगत्कारकत्वं विहाय वेदरक्षायै बद्धपरिकरा अभूवन् ।

भट्टकुमारिलस्य वार्तिकं भागत्रयेण विभक्तं 'श्लोकवार्तिकम् तन्त्रवार्तिकम्, टुप्पीका' इति नामत्रयेण प्रथितम् ।

श्लोकवार्तिकस्य अनेकानि व्याख्यानानि सन्ति । तेषु उम्बेकस्य तात्पर्यटीका, जयमिश्रस्य शर्वृतिका सुचरितमिश्रस्य काशिका प्रमुख–ग्रन्थाः ।

तन्त्रवार्तिकस्य न्यायसुधानाम्नी भट्टसोमेश्वरकृता टीका उप–लभ्यते ।

टुप्टीकायाश्च पार्थसारथिमिश्रविरचिता तन्त्ररत्ननाम्नी टीका प्रसिद्धा ।

श्लोकवार्तिकस्य व्याख्यातृषु पार्थसारथिमिश्राः प्रसिद्धतमाः । एतेषां मीमांसासम्प्रदाये प्रमाणिको ग्रन्थः. शास्त्रदीपिका । ग्रन्थस्यास्य तर्कपादः श्लोकवार्तिकस्य सारभूतः, अतिदुरूह्यः ।

शास्त्रदीपिकायाः रामकृष्णकृतसिद्धान्तचन्द्रिका, सोमेश्वरकृत-कर्पूरवार्तिकम्, सोमनाथकृतमयूखमालिका, सुदर्शनाचार्यकृतप्रकाश इत्यादयो व्याख्यानग्रन्थाः ।

गुरुमतमिति मीमांसकसम्प्रदाये सुविज्ञातस्य मतस्य प्रवर्तको भट्ट प्रभाकरः कुमारिलभट्टस्यान्तेवासी ।

अनेन शाबरभाष्यस्य लघ्वी बृहती इति व्याख्यानद्वयमं रचितम् । लघ्वी विवरणमिति बृहती च निबन्धनमिति च दृश्यते ।

भाट्टमतखण्डनायैव व्याख्यानद्वयं रचितं प्रभाकरेणेति स्पष्टम् ।

शालिकानाथेन लघ्व्याः बृहत्याश्च व्याख्यानं कृतम् । बृहत्याः

ऋजुविमला, लघ्व्याश्च दीपशिखेति। प्रभाकरमतखण्डनाय शालिका-नाथेन पकरणपञ्चिका नाम्नी टीका विरचिता।

मुरारिभट्टेनापि शाबरभाष्यस्य व्याख्यानं कृतमिति अन्यग्रन्थ-कारैरुक्तम्। तत्तु नोपलभ्यते।

एवं कुमारिल–प्रभाकरमुरारयः सम्प्रदायप्रवर्तकाः। एषु भाट्टमतमेव बहुजनपरिगृहीतम्। गुरुमतानुयायिनः स्वल्पसङ्ख्याकाः। मुरारिसम्प्रदायस्तु लुप्तप्रायः।

वृत्तिकारेषु प्रधानतमाः जैमिनिसूत्राणां वेदान्ताचार्याः वेङ्कटनाथ इति अपरनामानः, भट्टप्रभाकरस्य, तस्य अनुयायिनां च निरीश्वरवादि-त्वमसहमानास्तन्मतनिरसनाय 'सेश्वरमीमांसा' नाम्नो वृत्तिं जग्रथुः।

मीमांसाकौस्तुभं च खण्डदेवकृता वृत्तिः। दुर्बोधेऽस्मिन् ग्रन्थे मीमांसाशास्त्रज्ञानम्, केषांचित् खण्डनम्, केषांचिच्च मण्डनं विद्यते। खण्डदेवो भाट्टदीपिकानामकं व्याख्यानग्रन्थं रचयामास।

वासुदेवदीक्षितकृत 'कुतूहलवृत्तिः' रामेश्वरसूरिकृत 'सुबोधिनी' इत्यादयोऽनेकेवृत्तिग्रन्थाः सन्ति।

मीमांसकमते वेदमन्त्राः नियोगपरका :–मन्त्राणां विविधेषु यज्ञेषु विनियोगः कर्तव्यः। शतपथब्राह्मणे 'यज्ञो वै श्रेष्ठतमं कर्म' इत्युक्तम्। यज्ञशब्दस्य अनेके अर्थाः सन्ति। भगवद्गीतायाम् – द्रव्ययज्ञ–तपो यज्ञ–योगयज्ञ–स्वाध्याययज्ञ–ज्ञानयज्ञानां नामानि उपलभ्यन्ते। मीमांसकमते तु 'देवतोद्देशेन द्रव्यस्य त्यागो यज्ञः'

यज्ञ भेदाः –

यज्ञानां श्रौत–स्मार्त भेदेन द्वैविध्यम्। संहिताब्राह्मणाभ्यां

विहिताःश्रौताः, गृह्यसूत्रधर्मसूत्रादिभिर्विहताश्च च स्मार्तयज्ञाः । अनयोः प्रत्येकं त्रयो भेदाः । नित्याः–नैमित्तिकाः काम्याश्च । पुनरपि पाकयज्ञ – सोमयागपशुबन्धा इति भेदत्रयम् । पाकयज्ञे व्रीहि–तिल–गोधूम–कुलुत्थ–दधि–घृतादीन्यग्नौ हूयन्ते । अथ च एभिर्द्रव्यैः 'पुरोडाशचरु इत्यादयो हव्यपदार्था अग्नौ पच्यन्ते । सोमभागे तु सोम–पूतिकादयो हव्यम् । पशुबन्धयागे अजादिधान्या हव्यम् ।

प्रातर्होम – सायंहोम – स्थालीपाक – बलिवैश्वदेव – नित्ययज्ञाः सन्ध्या-वन्दनादयो अवश्यकर्तव्या । एभिः पुण्यविशेषो न भवति । अनाचरणे पापं भवति । निमित्तविशेषेण क्रियमाणाः नैमित्तिकाः यथा –

गृहदाहे–अतिवृष्टौ–अनावृष्टौ पुत्र–धन–पशु अधिकार–यशसां प्राप्त्यर्थं क्रियमाणाः काम्याः । प्राक्तनकाले यज्ञानां स्वरूपमतीव निराडम्बरं सरलं चासीत् । केवलं व्रीह्यादिधान्यानामेव यज्ञेषु हवी-रूपेण दानं भवति स्म । 'भास्त्रायैह स्मर्षयो गृह्णन्ति' इति शतपथ ब्राह्मणवचनमस्मिन्विषये प्रमाणम् । परस्मिन् काले तु अवैदिकतत्वानि दर्श–पौर्णमासयागे प्रयाजानन्तरं यजमानं पुरोहितः एवमाशीर्वदति । 'एको मम, एका तस्य योऽस्मान् द्वेष्टि यं च वयं द्विष्मः ।' तव पुत्रो जायेत । तव शत्रोश्च कन्या इति वाक्यार्थः । अत्र कन्यायाः अवरत्वं स्पष्टं दृश्यते । परम्परया गृहीतमिदं पुत्रापेक्षया कन्यावरत्वमस्माकं समाजे बहुधा दृश्यते । 'अविशेषेण पुत्राणां दायो भवति धर्मतः' इति यास्कवचनम् ।

यज्ञेषु पशुहिंसा –

वैदिक वाङ्मये प्रसिद्धाः पशु यज्ञाः–पुरुषमेध–अश्वमेध–गोमेध–हविमेध अजामेधाः । एतेषु यज्ञेषु अजादिकं यूपे बद्ध्वा 'हविं

आलभेत' 'आजामालभेत' इत्यादिब्राह्मणवाक्यानि उच्चार्य तान् घ्नन्ति। परन्तु वेदविरुद्धा एषा प्रक्रिया। चरक संहितायां–चिकित्सास्थाने एव-मुल्लिखितं दृश्यते। 'आदिकाले खलु यज्ञेषु पशवः समालभनीया (स्पृष्टव्याः) बभूवुः। नालम्भाय (लम्भ् हिंसायाम् न हिंसायै) प्रक्रियन्ते स्म। ततो दक्षयज्ञप्रत्यवरकाले मनोः पुत्राणां नरिष्यन्–नाभाग–इक्ष्वाकु–मृग–शर्याति–इत्यादीनां च क्रतुषु 'पशूनामेवाभ्यनुज्ञानात्' पशवः प्रोक्षणमापुः।

पञ्चतन्त्रे चैवं लिखितं दृश्यते ''येऽपि याज्ञिका यज्ञकर्मणि पशून् व्यापादयन्ति, ते मूर्खाः परमार्थं श्रुतेर्न जानन्ति। तत्र किलैतदुक्तम् 'अजै र्यष्टव्यम्'। अजा व्रीह्यः सप्तवार्षिकाः कथ्यन्ते। न पुनः पशुविशेषः।' स्याद्वादमञ्जरी इति जैनधर्मग्रन्थे एवं स्वष्टीकृतः अजशब्दः –'तथा हि किल वेदे अजैर्यष्टव्यम्' इत्यादि वाक्येषु मिथ्यादृशः अजशब्दं पशुवाचकं व्याचक्षते। सम्यग्दृशस्तु जन्माप्रायोग्यं (प्ररोहामे असमर्थम्) त्रिवार्षिकं यवव्रीह्यादि, पञ्चवार्षिकं तिलमसूरादि, सप्तवार्षिकं कङ्कुसर्षपादि, 'धान्यपर्यायतया पर्यवसायन्ति।' महाभारते मत्स्यपुराणे–वायुपुराणे 'उपरिचरवसु' इति नाम्नः राज्ञः कथा एवं विद्यते।' इन्द्रः प्रथममश्वमेधयागे पशूनां हिंसनं कर्तुमुद्यतः। एतां पद्धतिं वेदविरोधिनीं दृष्ट्वा तत्रस्था महर्षयो वेदेषु पशुहिंसाया विधिर्नास्ति, यदि वेदविधिमनुसृत्य यष्टुमिच्छसि, तदा अप्ररोहिणोः यवा एव हव्यं इतीन्द्रमूचुः। तेषां वचांस्यनादृत्येन्द्रो यज्ञं कर्तुमैच्छत्। विवादनिर्णयाय उत्तानपादस्य राज्ञः पुत्रमुपरिचरवसुनामानं जग्मुः। स ऋषिभ्य इन्द्रं बलवत्तरं मत्वा इन्द्रपक्षमेवाश्रयामास। क्रुद्धा ऋषय उपरिचरवसुं शशपुः।' शतपथब्राह्मणे पुरुषमेधयागस्यैवं निर्वचनं दृश्यते। 'इमे वै लोकाः पूः अयमेव परुषो योऽयं पवते' सोऽस्यां पुरिशेते तस्मात्पुरुषः यदेषुलोकेषु अन्नं तदस्य मेधः (सारः) तद्यदस्यैतदन्नं मेधः,

तस्मात् पुरुषमेध:' अधो यदस्मिन् मेध्यान् पुरुषान् आलभते तस्मादेव पुरुषमेध: ।' उपरि उद्धृतै: प्रमाणै: सुस्पष्टमिदं यत्–यज्ञेषु पशुहिंसा वेदैर्नसमर्थिता । मीमांसकानां यागै: इष्टप्राप्तिस्वर्गप्राप्तिश्चेति मतम् । अथ च तेषां 'यज्ञार्थं वेदा: प्रवृत्ता:' इति मतं मन्त्रानर्थक्यवादे परिणतम् । अनेन ब्राह्मणग्रन्थानामपि 'कर्मचोदका: ब्राह्मणानि' 'विनियोजकं ब्राह्मणम्' इति तेषां दुराग्रहेण वेदस्य ब्राह्मणानां च सत्योऽर्थ: तिरोहित: । वस्तुतस्तु 'ब्रह्मणां मन्त्राणां व्याख्यानं ब्राह्मणम्' । परिणामत: यज्ञानां प्राधान्येन वेदस्य आधिदैविक–आध्यात्मिक प्रक्रियानुसारिण: मुख्यार्थस्य गौणत्वमभगवत् । यज्ञ–प्रक्रियार्थानुसारी वेदस्य अर्थ: प्रधान: अभूत् ।

कल्पितविनियोगा: –

यथा कामनापूत्यर्थमनेके यज्ञा:कल्पिता: स्तथा तद्यज्ञानुरूपा: वेदमन्त्रा: नोपलब्धा: (एतादृशमन्त्रा: न सन्ति) तदा मन्त्रे गौणं अर्थं गृहीत्वा तस्य तस्मिंन् कर्मणि विनोयोग: यथा–'दधिक्रावूणो आकार्षम्' अत्र 'दधि भक्षणं कर्तव्यमिति' याज्ञिका: वदन्ति । मन्त्रे तु 'द्रधिक्रावा' शब्दस्य अश्व: इन्यर्थ:

अस्माकं प्रिशिष्येण यज्ञरामुलुना–'A study of the vartikam of kumarila Bhatta with special reference to his criticism of sabara's views' शोधप्रबन्ध: विश्वविद्यालयाय समर्प्य पी.एच.डी. इत्युपाधि:लब्धा । तस्मादेव प्रबन्धात् कांश्चित् मुख्यांशान् गृहीत्वा ग्रन्थरूपे मुद्रापयामास । अस्मिन् ग्रन्थे त्रिचत्वारिंशदधिकरणानां समालोचनं कृतं विद्यते ।

सर्वथापि प्रथमत: भाष्यमतमुपन्यस्य ततश्च वार्तिककारेण कुमारिलभट्टेन, पार्थसारथिमिश्रै: खण्डदेवेन च कृतं भाष्यकारमतस्य

खण्डनं मण्डनं चोद्धृत्य तेषां मतानां योग्यत्वमयोग्यत्वं च सम्यक् निरूपितवान् । भाषा सरला बोधगम्या च ।

महान्मोदोऽस्माकं यत् अतिगम्भीरे दुरूहृये आधुनिककाले नाधीयमाने मीमांसाशास्त्रे लब्धप्रवेशः यज्ञरामलुः । एवमाशास्महे यत् एवं प्रकारेण अस्मिन् मीमांसाशास्त्राध्ययने बद्धपरिकरो भूत्वा निगूढार्थान् प्रकटयिष्यति । कालक्रमेण च मीमांसाशास्त्रस्य पारदृश्वा भविष्यति । अस्माकं महतीयं इच्छा यत् अस्माभिरुक्तं यज्ञेषु पशुहिंसनं अन्यशास्त्राध्ययनेन सदोषं निर्दोषं वा इति निर्णेष्यति । 'शिष्यादिच्छेत् पुरा जयम्' इत्याभाणकं मनसि निधाय अस्मान् गुरूनपि ज्ञानेन विद्यया, शास्त्रचर्चया च अयं शिष्यः अतिशेताम् इति आशीर्वदामः ।

———

॥ श्रीः ॥

श्रीमते रामानुजाय नमः

डा. बी. नरसिंहाचार्यः
रीडर, संस्कृतविभागः
उस्मानिया विश्वविद्यालयः
भाग्यनगरम्,

रामानुजं कुलगुरुं पितरौ च नत्वा
विद्याविबोधविशदीकृततत्त्वसारान् ।
श्रीरङ्गवर्यशठकोपमहागुरूंश्च
श्रीयज्ञरामकृतग्रन्थमहं समीक्षे ॥

संपूर्णे भारते, विश्वस्मिन्संसारे च संस्कृतस्य प्राशस्त्यं, प्राधान्यं, अवश्याध्येयत्वं च अनुमोद्यन्तेतरां सर्वैरपि । अर्थवादास्संस्कृतस्य श्रूयन्ते, प्रतिश्रूयते चास्य प्रचाराय कटिबद्धता । परमद्यत्वेऽनुष्ठाननित्यत्वं कुत्रोपलभ्यते ? नैतावत्, संस्कृताध्ययनं छात्रावाससुस्थितिभोजनरूप-दृष्टफलकमेवोपलक्ष्यते; प्रमाणयति च 'अध्ययनेन वसती' त्यदि प्रयोगम्; निरस्यति च 'अध्ययनाय वसती, त्यादिम् । अधीयानाश्च संस्कृतभाषासाहित्ये एव बद्धादरा दृश्यन्ते । शास्त्राध्ययनं पुराकल्पकल्पं समजनि । अधीतिनश्च शास्त्रेषु पठनपाठनाद्युपस्थित्यभावदौर्गत्येन पठितविस्मृतशास्त्रा अचिरात् केवलं शस्त्रिण आचार्या ग्रन्थिनस्सम्पद्यन्ते ।

संस्कृताध्ययने एवं विरले संवृत्ते, विरलतरप्राये सञ्जाते च शास्त्राभ्यासे, पूर्वकृतसुकृतवशेन अधीतसंस्कृतशास्त्रः आयुष्माञ्छ्रीयज्ञराम-शर्मा, श्रीडोंग्रेशास्त्रिमहोदयेभ्यः तिरूमलतिरुपतिदेवस्थानानुदानप्रचलित-

प्रणाल्या मीमांसामधिजगे । इतः पूर्वं प्रकटितान्ध्रभाषाभिनिवेशप्रवेशोऽग्मधुना 'भाट्टवार्तिकस्य भाष्यविमर्शपूर्वकाध्ययनं' स्वानुसन्धानोपाधिहेतुभूतं, ग्रन्थरूपेण प्रकाशयन्नशेषशेमुषीवतां विद्यावतामनुग्रहाशीः पात्रतां भजतीति किमत्र चित्रम् ? ग्रन्थस्यास्य परिचयप्ररोचनारचनया नन्दामि, अभिनन्दामि चायुष्मतः ज्ञानप्रचारप्रयत्नम्, प्रयत्नलोपस्यैव दोषहेतुत्वान्न तु फलालाभस्य ।

'पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ।। इति स्मार्त-

वचनानुसारं मीमांसा विद्याधर्मयोः स्थानं धर्मस्य प्रतिपादकम् च । 'मीमांसाख्या तु विद्येयं बहुविद्यान्तराश्रिते'ति कुमारिलभट्टपादैः; 'मीमांसा हि व्याकरणादिशास्त्रान्तरवशेन व्युत्पन्नपदपदार्थस्य वाक्यार्थ संदेहनिवृत्त्यर्था बहूनि विद्यान्तराणि उपायभूतान्याश्रिता बह्वायाससाध्या' इति पार्थसारथिमिश्रैश्चाभ्यधायि । 'वेदोऽखिलो धर्ममूलं' इत्यार्षोक्तिः खलु । धर्मे, तत्प्रतिपादकवेदार्थज्ञाने च, संदेहनिवृत्त्या मीमांसा प्रवर्तयति । तत्रभवता भगवता जैमिनिमुनिना मीमांसासूत्राणि प्रणीतानि । तेषां सूत्राणां अर्थं भाष्यरूप सूत्रानुसारिभिः पदैः स्वपदैश्च व्यरीरचत् तत्रभवान् शबरस्वामी । तदनन्तरं लोकायतैरन्यैश्च नास्तिकैर्दुरुक्तिभिरनुक्तिभिश्च मीमांसान्यायः लोकायतीकृतः दूषितश्चाभूत् । तद्दोषापनोदनाय, उक्तानुक्तदुरुक्तचिन्ताप्रधानं वार्तिकं निर्ममे तत्र भवान् कुमारिलभट्टः; उक्तं च स्वयमेव –

'प्रायेणैव हि मीमांसा लोके लोकायतीकृता ।
तामस्तिकपथ कर्तुमयं यत्नः कृतो मया ।। श्लो. वा. १-१०

इदं शास्त्रं न केवलमास्तिकपथपाथेयं, बुद्धिवृद्धिकरं च; अतो 'यथा यथा पुरुष: एतच्छास्त्रं समधिगच्छति तथा तथा स अन्यशास्त्रविज्ञानं जानाति; ज्ञानं च तस्मै रोचते' इति हि व्याख्याकारा:। अन्यच्च धर्मज्ञाने महदुपकरोति; मीमांसाज्ञानधर्मज्ञानयोरव्यभिचरितत्वात्। उक्तं च–

'आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना।
यस्तर्केणानुसंधत्ते, स धर्मं वेद नापर:॥ इति म.स्मृ. १२-१०६

सन्दिहीतात्रकश्चन मीमांसामन्तरा किमन्या गतिर्नास्ति वेदार्थज्ञानायेति ? 'अशक्यं चाप्रमेयं च वेदशास्त्रमिति स्थिति:।' इति म. स्मृ. १२-१९४ 'मीमांसादिन्यायनिपेक्षतया अनवगम्यमानं–अप्रमेयं, एवं व्यवस्था' इति व्याख्या च तं संदेहं निवर्तयत:। अतो धर्म: प्रत्यक्षादिप्रमाणगम्यो न भवति केवलं मीमांसाप्रतिपाद्यचोदनयैव स अवधार्यते। अध्ययनविधिप्रयुक्तादृष्टफलेन साकं, लौकिकन्यायव्यवहारनिर्णयसहकारित्वरूपं दृष्टं फलमपि मीमांसाध्ययनेन लप्स्यते। मीमांसान्यायलौकिकन्यायौ परस्परं भावयन्तोऽस्माकं परं श्रेये विधास्यत:। नियमानां सार्वकालिकता न नैसर्गिकी अभ्युपेयते। एकस्मिन्सन्दर्भे कश्चन न्याय: कश्चन नियम: प्रवर्तते अनुसर्तव्यश्च भवति, दृष्टे सति अदृष्टकल्पनेत्यादि:। अन्यस्मिन्सन्दर्भे अदृष्टकल्पनायामपि न गौरवं प्रसज्यते प्रत्युत सा आवश्यकी भवति। धर्मप्रतिपादनविषये न्यायान्वयविषये अन्येषु च विषयेषु भाष्यवार्तिकयोर्भेद: भवेदेव। तादृश्ममतभेदं ग्रन्थकर्ता कुमारिलादर्वाचीनानां मतनिर्देशपूर्वकं युक्तिभि: सम्यक् प्रदर्शयाति। ग्रन्थोऽयमष्टसु भागेषु सम्यग्विभक्तो वर्तते। ते चामी विभागा:–१. सिद्धान्तोपोद्बलकयुक्तीनां खण्डनम् २. सिद्धान्तोपर्याक्षेपखण्डनम् ३. सिद्धान्तखण्डनम् ४. उदाहरणखण्डनम् ५. शब्दार्थखण्डनम् ६. भाष्यपूर्वपक्षखण्डनम् ७. प्रसङ्गविचारखण्डनम् ८. अधिकरणखण्डनम् चेति।

स्थालीपुलाकन्यायेन दिङ्मात्रमत्र प्रस्तूयते; भोजनसमयात्प्राक्पि- रि‍ेषितस्य पदार्थस्य नाधिका रुचिप्रशंसोचितेति। स्मृत्याचारप्रामाण्याधिकरणस्थो विषयः परिशील्यते ग्रन्थकर्तुः प्रतिपादनदिक्प्रदर्शनार्थम्। पौरुषेयाणामपि स्मृतीनां वैदिकपरिगृहीतानामाचाराणां धर्मे प्रामाण्यमस्ति इति सिद्धान्तः। मूलप्रमाणाभावात्पौरुषेयत्वाच्च स्मृतीनां प्रामाण्यं नस्ति इति पूर्वपक्षः। मूलभूतप्रमाणाभावेऽपि वैदिकमन्वादिप्रणीतत्वेन स्मृतीनां तद्वत् वैदिकमन्वादिपरिगृहीतानां गुर्वनुगमनादीनां आचाराणां धर्मे प्रामाण्यमस्तीति, तच्च दृष्टार्थत्वादेव इति भाष्यकारः। दृष्टं च फलं अध्यापनरूपं ग्रन्थग्रन्थिभेदनरूपं चति।

दृष्टप्रयोजनानां कृष्यादीनां धर्मे प्रमाणाभावात्, व्रीहीनवहन्तीत्यादौ वैतुष्यरूपदृष्टप्रयोजनसत्त्वेऽपि नियमादृष्टकल्पनेव, गुर्वनुगमनादीनामाचाराणामपि नियमादृष्टार्थत्वेनैव धर्मे प्रामाण्यं साधयन्ति वार्तिककाराः।

पार्थसारथिमिश्रैः स्मृतीनां वेदमूलकत्वं संसाध्य, तत्परिगृहीताचारप्रामाण्यविचारः अकारि। हेतुविचारो न परामृष्टः। अन्यैः स्मृतिप्रामाण्यमेव विचारितम्। ग्रन्थकर्ता च वार्तिककारपक्षमेवोपोद्बलयति।

अत्रेदमुच्यते—'वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्।
आचारश्चैव साधूनां आत्मनस्तुष्टिरेव च' ॥ म. स्मृ. २-६;
'आचारः परमो धर्मः श्रुत्युक्तः स्मार्त एव च ॥ १-१०८; एवमेव

'वेदः स्मृतिस्सदाचारः स्वस्य च प्रियमात्मनः। एतच्चतुर्विधं प्राहुस्साक्षाद्धर्मस्य लक्षणम्' ॥ २-१२ इत्यादिभिः स्मृतीनां आचाराणां च प्रामाण्यमुररीकृतं मनुस्मृतौ। तत्रैव परमप्रमाणतया श्रुतिरेवोक्ता, न तु स्मृतिः—'धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः' इति; यदा

स्मृतिः प्रत्यक्षवेदवाक्यविरुद्धा न भवति तदैव सा प्रमाणम्; यदि विरुद्धा तर्हि न प्रमाणम् इति भाष्यकाराः। एवं श्रुत्यविरुद्धस्मृतिरिव, स्मृत्यविरुद्धस्सदाचारोऽपि धर्मे प्रमाणं इति भाष्यकृदाशयस्साधुरेव। अध्ययनविधाविव, आचारदिषु स्थलेषु दृष्टफलसम्भवादेव प्रामाण्यं वक्तव्यं न त्वदृष्टार्थत्वात्, दृष्टे संभवत्यदृष्टकल्पनायोगात्। अतः भाष्यकारोक्तदिशा, दृष्टार्थत्वेऽपि स्मृत्याचाराणां धर्मे प्रामाण्यं सुस्थमेव। भाष्यवार्तिकायोर्मतभेदः प्रामाण्यसत्त्वे नास्ति; किंतु दृष्टार्थत्वादृष्टार्थत्वहेतुकत्व एव इति न कोऽपि दोषः।

अर्वाचीनाश्च केचन एवमेव मन्वते। एतदर्थं च श्रुतिस्मृत्योर्विरोधे श्रुतेः, स्मृत्याचारयोर्विरोधे आचारस्य बलवत्तरत्वप्रतिपादका न्याया अपि प्रचारपदवीमधिष्ठापिताः। 'विरोधेत्वनपेक्षं स्यात्; असति ह्यनुमानम्। मी. द. १-३-३ इति सूत्रमेवोपोद्बलकम्। अत एव च 'आचारप्रभवो धर्मः', 'आचारः परमो धर्मः' इत्याद्यार्षोक्तयः संगच्छन्ते। महाकविः कालिदासोऽपि स्मृतीनां श्रुत्यविरुद्धत्वमेव 'श्रुतेरिवार्थं स्मृतिरन्वगच्छत्' इत्यनेन प्रत्यपादयत्। अत्र स्मृतिप्रामाण्ये आचारप्रामाण्ये वार्तिककारैर्नूतनतया अदृष्टार्थहेतुत्वं कल्पितम्। न केवलमाचारः आत्मतुष्टिरपि वार्तिककारैः प्रमाणत्वेनाङ्गीकृता, तत्संदर्भगताविमौ द्वौ श्लोकौ अतिप्रसिद्धौ–

'यथा रूमायां लवणाकरेषु मेरौ यथा वोज्ज्वलरुक्मभूमौ।
यज्जायते तन्मयमेव तत्स्यात् तथा भवेद्वेदविदात्मतुष्टिः॥
एवं हि विद्वद्वदनाद्विनिर्गतं प्रसिद्धरूपं कविभिर्निरूपितम्।
सतां हि संदेहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः॥ इति

आकृत्यधिकरणे चाकृतिरेव शाब्दार्थ इति सिद्धान्त इत्युक्तम्। अनन्तरं वार्तिकारानुवादसंदर्भे व्यक्तिरेव शब्दार्थः, आकृतिरेव लक्ष्यते

इन्यपि वक्तुं शक्यत इत्युक्तम् । अनेकव्यक्तिलक्षणापेक्षया एकस्यामेवाकृतौ लक्षणा युक्ता । तस्माद्व्यक्तिरेव शब्दार्थो भवितुमर्हतीति । अत्रेदं विचार्यते—न स्यान्नाम श्येनशब्दस्य आकृतिवचनत्वं ईप्सिततमत्वरूपकारणाभावात् । मीमांसकमते शब्दस्येवार्थस्यापि नित्यत्वमभ्युपपन्नं, तच्च आकृतेश्शब्दार्थत्व एवोपपद्यते । व्यक्त्यनुभवसमकालिकत्वं चाकृत्यनुभवस्यानुभवसिद्धम् । अतः आकृतिरेव शब्दार्थः । क्वचित् आकृतेरन्वययोग्यता नास्ति, व्यक्तिविशेषाणामेव वर्तते । तथापि श्येनचितं इति वाक्ये श्येनाकृत्या इत्येवार्थोऽभ्युपेयः; श्येनपक्षिचयनासंभवात्, अहिंसाशास्त्रादिविरोधाच्च इति कारणद्वयसत्त्वात् । अत्राकृतेर्लक्षणया शब्दार्थत्ववादोऽयुक्त एव । अन्यच्च व्यक्तिशब्दार्थत्वेऽङ्गीकृते, व्यक्तीनामानन्त्यादनेकशक्तिकल्पनाप्रसङ्गो दुर्निवारो भवति ।

'काम्येन भ्राष्ट्राद्यग्निना नित्यस्योख्याग्नेर्विकाराधिकरणे' विशेषेण सामान्यस्य बाध इति भाष्यकारपक्षः अयुक्त इति प्रतिपादितः । तदर्थं च 'ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्याय' इत्यत्र सर्वेषामपि दधिदान एव कृते शास्त्रमनुगृहीतं भवति तच्च नेष्यते इत्युक्तम्—सत्यं—ब्राह्मणपरिव्राजक, ब्राह्मणकौण्डिन्यन्याययोरयमेव भेदः यत् प्रथमे ब्राह्मणविशेषस्यैव ग्रहणं, द्वितीये तु ब्राह्मणविशेषस्य न ग्रहणमिति । प्रथमे सामान्यविशेषौ सहावस्थानौ, न विरुद्धत्वेनाभिप्रेतौ, द्वितीये त्वन्ययेति महान्भेदः । नित्यनैमित्तिकयोर्बाधस्य परिग्रहीतव्य इति वार्तिककारेणोक्तमनुमतं ग्रन्थकर्त्रा । अत्रोच्यते-इतरशास्त्रेष्वपि एतादृशो विषयो वर्तते । निरवकाशाः सावकाशान्बाधन्त एव । व्याकरणशास्त्रेऽप्येवमेव व्यवस्था । शास्त्रानुग्रहश्च अवश्यं कार्य एव चोदनासत्त्वेपि । माधवखण्डदेवावपि भाष्यकारमतमेवोपोद्बलयतः ।

अहीनाधिकरणविषये केवलाहीनशब्दार्थविचारः कृतो वर्तते ग्रन्थे । 'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्या बलाबलविचारे भाष्यवार्तिककारौ

कथं भिद्येते इति प्रतिपादनीयम् । 'तिस्र एव साह्नस्योपसदो द्वादशाहीनस्य' इति वाक्ये अहोनपदं क्रतुसमूहवाचि न तु ज्योतिष्टोमपरं, अन्यथा उपसदां त्रित्वस्य द्वादशत्वस्य विकल्पः भवति । 'तिस्र एव साह्नस्य' इति एवकार एव, साह्नाहीनपदे व्यर्थे स्याताम् । अतः प्रकरणबाधेन वाक्येन विनियोग इति भाष्यकाराः । वार्तिककारमते नात्र द्वयोर्विरोधः । अयं च बाध्यबाधकभावः श्रुतिलिङ्गादिप्रमाणानां परस्परविरोध एव भवति नत्वन्यथा । दुर्बलमपि प्रमाणं प्रबलाश्रितं सत् स्वाधिकं प्रमाणं अपि बाधते इत्यत्र–अत्यन्तबलवन्तोऽपि' इत्याद्युक्तिरेव प्रमाणम् । आस्तां तावन्मम मतभेदः ग्रन्थकर्त्रा प्रतिपाद्याविषयेषु । पूर्वोत्तरमीमांसाशास्त्रयोरैकत्वं मीमांसकैरङ्गीकृतं न वा, भाष्यवार्तिककाराणां काल, कृत्यादिपरिचयः, अन्यशास्त्रेषु भाष्यादर्वाचीना वार्तिककारा भाष्यं किमिति समर्थयन्ति, किमिति मीमांसायां खण्डयन्ति इत्यादीन्विषयान्ग्रन्थकर्ता प्रत्यपादयिष्यच्चेत्साध्वभविष्यत् । ग्रन्थाविस्तरभिया ते विषया अनिरूपिता इति मन्ये । ग्रन्थप्रतिष्ठाहेतुर्ग्रन्थस्य नैसर्गिकी योग्यतैव । तथापीदमस्तु–

इत्थं श्रीयज्ञरामेण रचितं वार्तिकोपरि ।
पुस्तकं सूरिभिर्ग्राह्यं सारासारविवेकिभिः ।।
यावद्वेदश्च मीमांसा स्थास्यतो भाष्यवार्तिके ।
तावज्जीयादयं ग्रन्थो विद्वद्भिर्बहुमानितः ।।
ग्रन्थानन्यान्प्रणयतु यज्ञरामः सतां मुदे ।
इहामुत्र च श्रेयः प्राप्नुयाद्वेदचोदितम् ।।
इति विद्वद्भागवतविधेयो नरसिंहाचार्यः ।।

आशिष:

Dr. Nalini Sadhale,
Prof. of Sanskrit,
O. U Hyderabad-7

Kumarila Bhatta is well known as one of the Greatest exponents of Purvamimamsa Darsana. He has written Varttika consisting of श्लोकवार्तिक, तन्त्रवार्तिक and टुप्टीका on Sabaraswamy's commentary on Jaiminiya Mimamsa Sutras. In Mimamsa Darsana Kumarila occupies the same place which Katyayana occupies in Paninian grammar. Though the term Varttikakara is generally used for Katyayana,Kumarila's Varttikas are one of no less importance. The Varttika is an'expostion of meaning of that which is said, of that which is unsaid and of that which is ill or imperfectrly said.' As critical gloss and scholastic exposition of Sabarabhasya the importance of Kumarila Bhatta's Varttikas is selfevident. However the credit for laying a firm foundation to the Mimamsa Philosophy also goes to him along with Prabhakara and others. He was perhaps the last Mimamsa Philospher who advocated the path of Karma,re-establishea the importance of Gruhasthasrama and rejuvenated the vedic sacrificial institution. His vehemant attack on the Bauddha and Jaina Philosophy re establishea the Vaidika thought. He is also credited for controlling the atheistic trends in the purvamimamsa itself. He

has influenced the Philosophical thinking of ancient India for several centuries.

The present work by Yagna Ramulu has a limited purpose of illustrating the points on which Kumarila Bhatta differed from Bhasyakara. Most of them refer to the exegesis of sacrificial details and do not have a direct bearing on the philosophical tenets. However, they very certainly bring out the independent and original thinking of Kumarila Bhatta. Dr. A.Y. Ramulu has also taken into account the views of other Mimamsa scholars like Khandadeva, Madhavacharya and Pathasarathi and has in many cases given his individual judgement. His work testifies to the talent and the interpretative skill, inherent in the Mimamsa discipline. With sustained application to the subject of his interest, I am sure that Dr. A.Y. Ramulu can make a significant contribution to the Purvamimamsa thought.

I wish him and his book well.

——

ACKNOWLEDGEMENT

Grateful acknowledgements are due to many people. Firstly, I am indebted to T. T. D. for its financial assistance in publishing this book. I am also grateful to Dr. P. Sri Rama Chandrudu for his valuable guidance and suggestions. I am grateful indeed to Dr. Kamala, Professor and Head, Department of Sanskrit. Osmania University, Dr. M. Gopal Reddy, Dr. Nalini Sadhale, and Dr. Narasimha Charyulu for their valuable opinion and suggestions. I am also thankful to Shivaji Printers for their co-operation.

विषयसूचिका

1.	पूर्वमीमांसादर्शनम्	....	1-XVI
2.	प्रथमभागः—सिद्धान्तोपोद्बलकयुक्तीनां खण्डनम्	....	1-39
3.	द्वितीयभागः—सिद्धान्तोपर्याक्षेपखण्डनम्	....	40-46
4.	तृतीयभागः—सिद्धान्तनां खण्डनम्	....	47-53
5.	चतुर्थभागः—उदाहरणानामनुदाहरणत्वप्रतिपादनम्	...	54-74
6.	पञ्चमभागः—शब्दार्थानामयुक्तत्वप्रतिपादनम्	..	75-85
7.	षष्ठभागः—पूर्वपक्षोपोद्बलकयुक्तीनां खण्डनम्	...	86-99
8.	सप्तमभागः—प्रसङ्गविचाराणां खण्डनम्	...	100-115
9.	अष्टमभागः—पूर्वाधिकरणान्तर्भावप्रतिपादनम्	....	116-119
10.	उपयुक्तग्रन्थसूची	....	120-122
11.	सङ्केतनामसूची	...	123-

॥ श्रीराम ॥

पूर्वमीमांसादर्शनम्

आदौ धर्मे प्रमाणं विविधविधिभिदाशेषतां च प्रयुक्तिं
पौर्वापर्याधिकारौ तदनु बहुविधं चातिदेशं तथोहम् ।
बाधं तन्त्रं प्रसङ्गं नयमनयशतैः सम्यगालोचयद्भ्यो
भिन्ना मीमांसकेभ्यो विदधति भुवि के सादरं वेदरक्षाम् ॥ इति ।

'दर्शयन्तीति दर्शनानि' इति व्युत्पत्त्या पुरुषार्थप्रदर्शकेषु इदं पूर्वमीमांसादर्शनमन्यतमम् । 'मान पूजायाम् इत्यस्माद्धातोः सिद्धमिदं सन्नन्तं मीमांसापदम् । मीमांसा नाम विचारः । पूर्वमीमांसा नाम पूर्वं विचार इति । कस्मादितिचेत्–वेदान्तविषयप्रतिपादकोपनिषद्भागापेक्षया पूर्वं यो ऋग्यजुःसामाधर्वाख्यो वेदभागः, तत्र कर्मसमधिकानां श्रुतीनां विचारोऽस्मिन्दर्शने विहितः । तस्मादिदं पूर्वमीमांसादर्शनमिति प्रथितमस्ति ।

अस्मिन् दर्शने यागादिकर्मणां विचारः कृत, । कर्मविचारपरतया चास्य दर्शनस्य 'कर्मकाण्डम्' इत्यपि नामान्तरं विद्यते ।

अस्य पूर्वमीमांसादर्शनस्य सूत्ररचनायां कारणमिदं भवति यत्,

लोके सामान्यतः निगमनिरुक्तव्याकरणादिभ्यो वेदार्थनिर्णयो भवति, तथापि वेदे यत्र क्वचित्पूर्वापरविरोधे वास्तवार्थविचिकित्सायां तन्निवारणं केवलमीमांसयैव भवति । यद्यपि पदार्थज्ञाने व्याकरणाद्यङ्गानां हेतुत्वमस्ति, तथापि वाक्यवाक्यार्थनिर्णयो न व्याकरणाद्यङ्गेभ्यो भवितुमर्हति । यद्यपि वाक्यार्थज्ञाने पदार्थज्ञानस्य हेतुत्वमस्ति, तथापि धर्माधर्मनिर्णयायास्य दर्शनस्यावश्यकता वर्तत एव । तस्मादेवेदं पूर्वमीमांसादर्शनं भगवता जैमिनिना सूत्ररूपेण निबद्धम् । अतश्चास्य दर्शनस्य' जैमिनिदर्शनम्' इति पूर्वमीमांसादर्शनम्' इति च व्यवहारो वर्तते ।

इदं च पूर्वमीमांसादर्शनमास्तिकदर्शनान्यतममेव । कुतः ।

'इत्याह नास्तिक्यनिराकरिष्णु
रात्मास्तितां भाष्यकृदत्र युक्त्या ।
दृढत्वमेतद्विषयः प्रबोधः
प्रयाति वेदान्तनिषेवणेन' ॥

इत्यनेन [1]श्लोकेन सर्वथा च मीमांसादर्शनमिदं वेदार्थविचाररूपं देहातिरिक्ताऽऽत्मस्वरूपवेदप्रामाण्यादिकमेवोपजीव्य वरीवर्तीति, आस्तिकदर्शनतामेवार्हति । अतश्चेदं पूर्वमीमांसादर्शनमास्तिकदर्शनमेवेत्यत्र न कापि विप्रतिपत्तिः ।

अस्मिन् शास्त्रे धर्मविचारः कृतः । यद्यप्यस्मिन् शास्त्रे यागादीनामेव विचारो दृश्यते, न धर्मस्य, तथापि यागादेरेव धर्मत्वान्न पुनः धर्मविचारः क्रियते । कथम् । धर्मो नाम 'चोदनालक्षणोऽर्थो धर्मः' इति जैमिनि[2]नोक्तम् । अस्य सूत्रस्य वेदबोधितश्रेयस्साधनत्वे सति बलवद-

---

1. श्लो. वा. P. 515

2. श्री. जै. मी. द. (प्र. भा) P. 11

ष्टाननुबन्धित्वमित्यर्थः । तथा च यागादीनां वेदबोधितश्रेयस्साधनत्वे सति बलवदनिष्टाननुबन्धित्वस्य सत्वाद्यागादिरेव धर्म इति पर्यवस्यति । तस्मादेव जैमिनिना 'अथातो धर्मजिज्ञासा' इत्यनेन सूत्रेणैव[1] शास्त्रारम्भः कृतः । अथ वेदाध्ययनानन्तरम्, अतोऽधीतवेदत्वात्, धर्माय जिज्ञासा कर्तव्येति । अर्थाद्वेदाध्ययनानन्तरं धर्मजिज्ञासा कर्तव्येति ।

एवंच वेदवाक्यार्थरूपधर्मनिर्णयार्थं, प्रयोजनवदर्थज्ञानार्थं, निस्संदिग्धार्थं चेदं दर्शनमावश्यकं भवतीति जैमिनिनेदं दर्शनं सूत्ररूपेण निबद्धम् ।

*अस्य समयः 300–B. C.

x x x

1. श्री. जै. मी. द. (प्र. भा) P. 1

2. B. P. M. (I) P. IX

पूर्वमीमांसाशास्त्रप्रतिपाद्यो विषयः

यद्यपि केषाञ्चिद्दर्शनानाम् 'अथातो धर्मं व्याख्यास्यामः' इत्यादि-प्रतिज्ञया धर्मपरत्वं ज्ञायते। तथापि न धर्मप्राधान्यं वर्तते। यत आत्मस्वरूपनिर्णयोपयोगिनः सेतिकर्तव्यताका धर्मास्तत्र साकल्येन न विचारिताः। अतो धर्मजिज्ञासुभिः श्रीमती मीमांसैव शरणीकरणीया भवति। इममेवार्थं भट्टपादादय एवं वदन्ति।

धर्मे प्रमीयमाणे हि
वेदेन करणात्मना।
इतिकर्तव्यताभागं
मीमांसा पूरयिष्यति ॥ इति ॥

तस्मादनुष्ठानेनाभ्युदयनिःश्रेयसयोरनुष्ठानद्वारासाधनीभूतवेदोदि-तधर्मनिर्णय एतच्छास्त्रप्रतिपाद्यविषयो भवति।

x x x

द्वादशाध्यायप्रतिपाद्यविषयाः

धर्मो द्वादशलक्षण्यां व्युत्पाद्यस्तत्र लक्षणैः ।
प्रमाणभेदशेषत्वप्रयुक्तिक्रमसंज्ञकाः ॥
अधिकारोऽतिदेशश्च सामान्येन विशेषतः ।
ऊहो बाधश्च तन्त्रञ्च प्रसङ्गश्चोदिताः क्रमात् ॥

इत्याभ्यां [1]श्लोकाभ्यां द्वादशाध्यायोपेतस्य शास्त्रस्य धर्मो विचारविषय इति ज्ञायते । प्रमाणादयः प्रसङ्गान्ताः द्वादशपदार्थाः द्वादशानामध्यायानां विषया भवन्ति । अतश्च प्रथमोऽध्यायः प्रमाणाध्याय इति । तत्र प्रथमे पादे साक्षाद्धर्मे प्रमाणभूतायाश्चोदनायाः प्रामाण्यमुपपादितम् । द्वितीयपादे अर्थवादानां विध्यपेक्षितद्रव्यदेवतास्तुत्या, मन्त्राणां चानुष्ठेयार्थस्मृतिसमर्पकतया च प्रामाण्यमुपपादितम् । तृतीये पादे मन्वादीनां वेददर्शनसम्भवेन, तत्प्रणीतस्मृतीनां प्रामाण्यमुक्तम् । चतर्थे पादे चाग्निहोत्रादिपदानां नामधेयविधया प्रामाण्यं प्रतिपादितम् ।

द्वितीयो भेदाध्यायः-तत्र प्रथमे पादे कर्मभेदचिन्तोपोद्घातरूपेणापूर्वसद्भावादिको निरुपितः । द्वितीयेपादे धातुभेदपुनरुक्त्यादिभिः कर्मभेद इति निरूपितः । तृतीये पादे रथंतरादीनां कर्मभेदप्रामाण्यापवादो निरूपितः । चतुर्थे पादे नित्यकाम्ययोः प्रयोगभेदो निरुपितः ।

तृतीयः शेषाध्यायः—अस्मिन्नध्याये चाष्टौ पादा वर्तन्ते । तत्र

---

1. मी. न्या. प्र. P. 6

प्रथमद्वितीयपादयोः श्रुतिलिङ्गविचारः कृतः। तृतीये पादे वाक्यप्रकरणस्थानसमाख्यानां विचारः कृतः। चतुर्थे पादे निवीतोपवीतादिष्वर्थवादत्वविधित्वादिनिर्णयहेतोः श्रुत्यादेः परस्परसदसद्भावो विचारितः। पञ्चमे पादे प्रतिपत्तिकर्माणि, षष्ठे पादेऽनारभ्याधीतानि, सप्तमे प्रयाजादीनि, अष्टमे याजमानानि च विचारितानि।

चतुर्थः प्रयुक्त्यध्यायः—तत्र प्रथमे पादे प्रधानप्रयोक्तृत्वं, द्वितीयेऽत्वप्रधानं च विचारितम्। तृतीये पादे फलभावाभावचिन्ता, चतुर्थे चाक्षद्यूतादिचिन्ता च कृता।

पञ्चमः क्रमाध्यायः—तत्र प्रथमे पादे क्रमबोधकानां श्रुत्यर्थपाठादीनां निरूपणं कृतम्। द्वितीये पादे क्रमविशेषनिरूपणं, तृतीये आवृत्तिनिरूपणं, चतुर्थे च प्रबलदुर्बलभावनिरुपणं च कृतम्।

षष्ठोऽधिकाराध्यायः— तत्र प्रथमे पादे अधिकारी निरूपितः। द्वितीये पादे अधिकारिधर्मा निरूपिताः। तृतीये पादे प्रतिनिधिनिरूपणं कृतम्। चतुर्थे पादे पदार्थलोपनं विचारितम्। पञ्चमे दीक्षानिरूपणम्। षष्ठे सत्रं विप्रस्यैवेति निरूपितम्। सप्तमे देयविचारः, अष्टमे चाग्निविचारश्च कृतः।

सप्तमः सामान्यातिदेशाध्यायः—तत्र प्रथमे पादे प्रत्यक्षवचनातिदेशो निरूपितः। द्वितीये पादे पूर्वस्यातिदेशस्य विचारः कृतः। तृतीये नामातिदेशः, चतुर्थे च लिङ्गातिदेशश्च निरूपितः।

अष्टमो विशेषातिदेशाध्यायः-तत्र प्रथमे पादे स्पष्टलिङ्गातिदेशः, द्वितीये पादे त्वस्पष्टलिङ्गातिदेशः, तृतीये पादे प्रबललिङ्गातिदेशः, चतुर्थे चापवादातिदेशश्च विचारितः।

नवम ऊहाध्यायः—तत्र प्रथमे पादे उपोद्घातपूर्वकोहविचारः,

द्वितीये पादे सामोहविचारः, तृतीये पादे मन्त्रोहविचारः, चतुर्थे पादे च मन्त्रोहप्रसङ्गपातितश्च विचारो निरूपितः ।

दशमः बाधाध्यायः–तत्र प्रथमे पादे बाधहेतुर्निरूपितः । द्वितीये पादे बाधहेतुर्द्वारलोपस्य विस्तरो निरूपितः । तृतीये पादे कार्यैकत्वेन बाधो निरूपितः । चतुर्थे पादे समुच्चयो निरूपितः । पञ्चमे पादे बाधप्रसङ्गागतो ग्रहादिविचारः, षष्ठे पादे बाधप्रसङ्गागतः सामविचारः, सप्तमे तत्प्रसङ्गागतः प्रकीर्णविचारः, अष्ठमे च तदुपयुक्तो नञर्थविचारश्च कृतः ।

एकादशस्तन्त्राध्यायः–तत्र प्रथमे पादे तन्त्रस्योपोद्घातो वर्णितः । द्वितीये पादे तन्त्रावापौ संक्षेपेणोक्तौ । तृतीये पादे तन्त्र विचारः, चतुर्थे च पादे आवापविचारश्च कृतः ।

द्वादशः प्रसङ्गाध्यायः–तत्र प्रथमे पादे प्रसङ्गनिरूपणं, द्वितीये पादे तन्त्रिनिरूपणं, तृतीये पादे समुच्चयनिरूपणं, चतुर्थे पादे विकल्पनिरूपणं, च कृतम् ।

एवंच प्रथमाध्यायादारभ्य द्वादशाध्यायान्तभागे, तत्तदधिकरणेषु चैते विषयाः प्रतिपादिताः । इति ।

X X X

प्रसिद्धग्रन्थाः

शाबरभाष्यम्

जैमिनिना विरचितस्य सूत्ररूपस्य पूर्वमीमांसाशास्त्रस्यातिगभीरतया दुर्ग्रहतया च सुखग्रहणार्थं शबरस्वामी भाष्यं प्रणिनाय ।

भाष्यलक्षणन्तु :–

सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः ।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ॥

सोऽयं शबरस्वामी स्वासाधारणया वचोधोरण्या लोकोत्तरार्थप्रतिपादनशैल्या च सर्वानपि भाष्यकारानतिशेते । किं भूयसा भाष्यप्रणयनपद्धतौ व्याकरणमहाभाष्यकारादनन्तरमयमेव मार्गादेशक इत्यपि वचनं नात्युक्तिकोटिमधिरोहति । शारीरकमीमांसाभाष्यकृतो भगवत्पादा अपि स्वीये भाष्ये बहुत्र शाबरीमेव छायामनुससृरित्ययं विषयः भाष्यद्वयमनुशीलयतां स्पष्ट एव विदितो भवति ।

अस्य [1]समयः BC. 57

x x x

---

1. B. P. M. P. IX

वार्तिकम्

माधवीयशङ्करविजयानुसारेण कुमारिलः साक्षात्कुमारावतार इति ज्ञायते ।

'इत्यूचिवांसमथ भट्टकुमारिलं त
मीषद्विकस्वरमुखाम्बुजमाह मौनी ।
श्रुत्यर्थकर्मविमुखान्सुगतान्निहन्तुं
जातं गुहं भुवि भवन्तमहं नु जाने ॥' इति ।

अतश्च वेदोदिताग्निहोत्रादिकर्मविरोधिसुगतादिमतसमुच्छेदार्थं मानवरूपेण अग्निभूर्गुहदेव एव कुमारिलरूपेण आविरभूदिति कवयो वदन्ति । एतदर्थानुगुण्य एव कुमारिलशब्दव्युत्पत्तिं वर्णयन्ति । कौ पृथिव्यां मारयति दुष्टान्समुच्छिनत्ति इति व्युत्पत्त्या कुमारो गुहदेवः । स एव स्वाभिन्नतया विद्यतेऽस्येति कुमारिलः ।

आन्ध्रीयोऽयं कुमारिलः 'गंजाम्' इत्याख्ये मण्डले आसीत् । अस्य [1]समयः 620-680 A. D., अयं च कुमारिलः पूर्वमीमांसा सूत्र-भाष्योपरि 'वार्तिकमित्याख्यां व्याख्यां चकार । तदिदं वार्तिकं भाग-त्रयात्मना विभक्तं नामत्रयेण प्रथितम् । तत्र प्रथमाध्यायप्रथमपादान्त-

1. B. P. M. P. X

ग्रन्थवार्तिकं केवलछन्दोबद्धश्लोकरूपं 'श्लोकवार्तिकम्' इति नाम्ना प्रसिद्धम्। प्रथमाध्यायद्वितीयपादमारभ्य तृतीयाध्यायसमाप्त्यन्तो ग्रन्थः गद्यपद्योभयात्मकः 'तन्त्रवार्तिकम्' इति नाम्ना प्रथितः। चतुर्थाध्यायादारभ्य द्वादशाध्यायान्तग्रन्थस्य 'टुप्टीका' इति नामास्ति।

वार्तिकलक्षणन्तु :–

उक्तानुक्तदुरुक्ताना
चिन्ता यत्र प्रवर्तते।
तं ग्रन्थ वार्तिकं प्राहु
र्वार्तिकज्ञा मनीषिणः॥ इति।

यत्रोक्तानुक्तदुरुक्तानां विषयाणां विचारो भवति, तदा तस्य भागस्य 'वार्तिकम्' इति नाम भवितुमर्हति। अतश्चास्मिन् कुमारिलभट्टप्रणीतवार्तिके लक्षणसमन्वयः। तद्यथा– पूर्वमीमांसाशास्त्रे[1] 'अथातो धर्मजिज्ञासा' इतीदं प्रतिज्ञापरं प्रथमसूत्रम्। अस्य सूत्रस्य शबरस्वामी 'लोकेयेष्वर्थेषु प्रसिद्धानि पदानि सति सम्भवे तदर्थान्येव सूत्रेष्वित्यवगन्तव्यम्' [2]इत्यादिना भाष्यमारब्धवान्। तादृशीं धर्मजिज्ञासामधिकृत्य अथशब्दं प्रयुक्तवानाचार्यः या वेदाध्ययनमन्तरेण न संभवति' इत्यादिभाष्यकारोक्तदिशा, अथ शब्दस्य वेदाध्ययनानन्तर्यमित्यर्थः पर्यवस्यति। धर्माय हि वेदवाक्यानि विचारयितुमनधीतवेदः न शक्नुयात्। अतश्च अतश्शब्दस्याधीतवेदत्वादित्यर्थः। एवंच वेदाध्ययनानन्तरमेवाधीतवेदेन धर्मजिज्ञासा –

1. श्री. जै. मी. द. (प्र. भा) P. 1

2. Ibid. P.P. 1-2

कर्तव्येत्यर्थः सूत्रस्य पर्यवस्यति ।
धर्माय जिज्ञासा धर्मजिज्ञासेति ।

लोक इत्यादिभाष्यस्य व्याख्यां कुर्वन्नेवमाह कुमारिलभट्टः ।

'लोक इत्यादि भाष्यस्य
षडर्थान् संप्रचक्षते ।
भाष्यकारानुसारेण
प्रयुक्तस्याऽदितः क्रमात् ।।
सर्वव्याख्यामुपालम्भं
प्रत्याख्यानं तथापरे ।
परिसंख्या स्तुती केचि-
दथशब्दस्य दूषणम्' ।। इति ।

[1]वार्तिके लोक इत्यादिभाष्यस्य सर्वव्याख्यादिरूपाः षडर्थाः प्रदर्शिताः । तत्र सर्वव्याख्या – सर्वसूत्राणां साधारणीव्याख्या । उपालम्भः – भवदासादिभिः कृतस्य 'अथातः' इति पदद्वयस्याऽऽनन्तर्यरूपैकार्थकत्वस्य निन्दा । प्रत्याख्यानम् – वेदवाक्यानामेव व्याख्याप्रयासः सफलः, उपेतत्वात्, उपायभूतसूत्रव्याख्याप्रयासस्त्वफल इति तद्व्याख्यानिराकरणम् । परिसंख्या – वेदसूत्रविरोधे सूत्राण्येवान्यथानेयानीति सूत्राण्यथानयनम् । स्तुतिः – सूत्रकारस्य प्रसिद्धार्थकसूत्रोपदेशेन प्रशंसा । इति पञ्चपक्षा मतभेदेन भाष्यार्थतया भाष्ययोजनापुरःसरं वार्तिके प्रपञ्चिताः । षष्ठोऽर्थस्त्वथशब्दस्य दूषणमिति । अस्मिंश्च पक्षे एवं भाष्यस्य योजना । 'लोके येष्वर्थेषु' इत्यारभ्य 'नचेह किंचिद्वृत्तमुप-

1. श्लो. वा. P.P. 8-9

लभ्यते' इत्यन्तो ग्रन्थोऽयशब्दस्यदूषणपरः। 'भवितव्यन्तु' इत्यादि 'साऽवकल्पते' इत्यन्तस्समाधानपरः। यद्वा 'लोके' इत्यादिः 'सकल्पितो भवति' इत्यन्तो दूषणपरः। 'तत्तु' इत्यादिः 'साऽवकल्पते' इत्यन्तस्समाधानपरः। तत्र प्रथमकल्पे दूषणपरभाष्यस्यायमाशयः। यत्र श्रुतिसूत्रयोर्विरोधाभावस्तत्र सूत्रपदानि प्रसिद्धार्थकान्येवाङ्गीकरणीयानि, नत्वध्याहारादिभिरर्थान्तरपराणि कल्पयितव्यानि। इतरथा वेदवाक्यानि सूत्रपदानि च व्याख्येयानीति प्रयत्नगौरवं प्रसज्येत। यत्र तु वेदविरोधः सूत्रस्य तत्राध्याहारादिना अन्यथात्वपरिकल्पनं न दोषमावहतीति सूचयितुं भाष्ये 'सति सम्भवे' इत्युक्तम्। इत्येवं प्रकारेण कुमारिलः भाष्यार्थविवरणादिपुरःसरं वार्तिकलक्षणलक्षितं शाबरभाष्योपरि 'वार्तिकम्' इति व्याख्यां चकार।

X X X

बृहती—लघ्वी

अस्य पूर्वमीमांसाशास्त्रस्यान्यो व्याख्याता प्रभाकरः। अयं च कुमारिलभट्टात्किञ्चिदेवार्वाचीनः, तदीयशिष्यत्वेन केरलादिषु प्रसिद्धः प्रस्थानान्तरमकल्पयत्। स च मीमांसाभाष्यस्य निबन्धटीकाभिधाना बृहती, विवरणटीकाभिधाना लघ्वी इति टीकाद्वयमकरोत्। अपिच सर्वत्र भाष्यं स्वाभिप्रायेण योजयन्न क्वचिदपि खण्डितवान्। तस्मादनयोः 'टीका' इति नामधेयं सुष्ठु सङ्गतं भवति।

अस्मिन् शास्त्रे 'गुरुमतम्' इति श्रूयते। तदत्रैवं कथा श्रूयते। गुरोः कुमारिलस्य छात्रेषु प्रभाकरोऽन्यतमः। एकदा पठनपाठनसमये तत्रापि नोक्तम्, अत्र तु नोक्तम्, अत एव पुनरुक्तिः' इत्यस्मिन्वाक्ये गुरोरर्थः नावबुद्धः। एवं कुमारिलस्य तत्र संशये शिष्येण प्रभाकरेण 'तत्र–अपिना–उक्तम्, अत्र–तुना–उक्तम्, अत एव पुनरुक्तिः' इति पदच्छेदद्वारा गुरोः संशयनिवृत्तिमकरोत्। तेन तुष्टः कुमारिलः छात्रं प्रभाकरमुद्दिश्य त्वमेव मम गुरुः' इत्यङ्गीकृतवान्। तदारभ्य गुरुमतमित्यस्य प्रभाकरमिति प्रसिद्धम्। अस्य [1]समयः 650–720 A. D. इति।

x x x

---

1 B. P. M. P. IX

शास्त्रदीपिका

कुमारिलमतमाश्रित्यप्रवृत्तेषु मीमांसाशास्त्रपारङ्गतेषु पण्डितेषु पार्थसारथिमिश्रोऽन्यतमः। स चायं कुमारिलमतमाश्रित्यैव शास्त्रदीपिकादीन् ग्रन्थान् व्यरचत्। तत्र कारणमिदं भवति यद्यदा अतिगभीरं शाबरभाष्यं परिच्छेत्तुं कुमारिलो न शक्त इति कृत्वा तन्मतानुसारिभिरन्यथा योज्यमानेषु न्यायेषु, तदा लोकानुग्रहार्थमयं पार्थसारथिमिश्रः 'शास्त्रदीपिका' इत्यादिभिः स्वकृतैः सुविशदमकरोत्।

'न्यायाभासतमश्छन्नशास्त्रतत्वार्थदर्शिकाम्।
कुमारिलमतेनाहं करिष्ये शास्त्रदीपिकाम्' ॥

इत्यनेन [1]श्लोकेन कुमारिलमतमनुसृत्यैव स्वतन्त्रो द्वादशाध्यायान्तग्रन्थः प्रावर्तिष्टेत्यपि ज्ञायते। अस्य [2]समयः 1050-20. A. D.

जैमिनीयन्यायमालाविस्तरः

जैमिनिना यदा मीमांसाशास्त्रं सूत्रग्रन्थरूपेण निबद्धं तदारभ्य तदनुसृत्य बहवः पण्डिताः बहून् ग्रन्थान् निर्ममुः। तथापि मीमांसा-

1. शा. दी. P. 3

2 B. P. M. P. X

सामरस्य दुरवगाहतामालोक्य माधवाचार्येण सहस्रन्यायसङ्ग्रहरूपग्रन्थो विरचितः। तत्र किंचिदूनश्लोकसहस्रद्वयं वर्तते। स च सुकुमारमतीनां बालानामपि राजकुमाराणां क्रीडार्थं निर्मितया नाभिदघ्न्या पुष्करिण्या समेयं मीमांसा भविष्यतीति। ततश्चास्य न्यायमालाख्यग्रन्थस्य विस्तराभिधानां वृत्तिमरीरचत्। एवंचास्य 'जैमिनीयन्यायमालाविस्तरः' इति नामाभूत्।

अस्मिन् ग्रन्थे माधवः प्रथमाध्यायप्रथमपादप्रथमाद्याधिकरणत्रये भाट्टप्राभाकरमतभेदमुपन्यस्तवान्। ततश्च प्रायेण भाट्टमतमेवोपन्यस्य यथावसरं प्रभाकरमतमुपन्यस्तवान्। एकैकास्मिन्नधिकरणे विषयसन्देहपूर्वपक्षावभासक एकः श्लोकः, अपरस्तु सिद्धान्तवादिश्लोकः। क्वचित्तु त्रिचतुरा अपि श्लोका वर्तन्ते। किन्तु ततो नाधिकावर्तन्ते। अपिच-श्लोकव्याख्यानरूपो विस्तराख्यभागोऽपि सुस्पष्टतया यथा ज्ञातुं शक्यते तथा लिखितवान्। अस्य [1]समयः 1297–1386 A. D.

x x x

1. B. P. M P. XI

भाट्टदीपिका

कुमारिलमतमाश्रित्यप्रवृत्तेषु ग्रन्थेषु श्रीखण्डदेवकृत 'भाट्टदीपिका' ग्रन्थोऽन्यतमः । अस्यां च भाट्टदीपिकायां श्रीखण्डदेवाचार्यैः शब्दप्रयोगविषयेऽतीव कार्पण्यं प्रकाशितमिति सर्वविदितमेव । नैयायिकादिशैल्या बहुतरन्यायातिदेशादिना च पूर्वोत्तरपक्षव्यवस्थापनं भाट्टदीपिकायां यत्कृतं तेन गम्यते मीमांसादिसर्वदर्शनस्वरूपा एव खण्डदेवाचार्या इति ।

श्रीखण्डदेवाचार्यैः निवीतान्तं कौस्तुभं विस्तृतं विरचितं, अान्तं च भाट्टदीपिका संगृहीतेति प्रभावलीदर्शिनामपरोक्षमेव । वाराणसीयस्यास्य खण्डदेवस्य [1]समयः 1600–65 A· D·

x x x

1· BP.M· .P. XII

प्रथमभागः

सिद्धान्तोपोद्बलकयुक्तीनां खण्डनम्

१ स्मृत्याचारप्रामाण्याधिकरणम्

(१-३-१)

धर्मस्य शब्दमूलत्वादशब्दमनपेक्षं स्यात् ॥१॥
अपि वा कर्तृसामान्यात् प्रमाणमनुमानं स्यात् ॥२॥

अस्मिन्नधिकरणे पौरुषेयाणां स्मृतीनां, वैदिकपरिगृहीतानामाचाराणां च धर्मे प्रामाण्यं विचार्यते । तत्र किं स्मृतय आचाराश्च धर्मे प्रमाणभूता उत नवेति संशयः । तत्र स्मृतीनां मूलप्रमाणाभावात्पौरुषेयत्वाच्च धर्मे प्रामाण्यं नास्तीति पूर्वपक्षः ।

यद्यपि स्मृतेः मूलभूतं प्रमाणं नास्ति, तथापि वैदिकमन्वादिप्रणीतत्वेन प्रामाण्यमस्त्येव । कथम् । तेषां मन्वादीनां वेददर्शनसंभवात् । अतश्च स्मृतीनां वेदमूलकत्वमेव । अतश्च "अष्टकाः कर्तव्याः" इत्येवमादीनामष्टकादिस्मृतीनां वेदमूलकत्वेन धर्मे प्रामाण्यमेवेति सिद्धान्तः ।

एवमेव यथा वेदमूलकत्वेन स्मृतीनां धर्मे प्रामाण्यमस्ति, तथा मन्वादिवैदिकपरिगृहीतानां, आगतमागतं प्रति ये नियम्यन्ते वृद्धवयः प्रत्युत्थानादयस्तेषां प्रत्युपस्थितनियमानां 'गुरुरनुगन्तव्यः' इत्येवमादीनां गुर्वनुगमनादीनामाचाराणां प्रामाण्यमस्ति नवेति विचारे [1]भाष्यकार एवं वदति ।

गुर्वनुगमनादीनामाचाराणां दृष्टार्थत्वादेवप्रामाण्यम् । कुतः

---

1. श्री. जै. मी. द (प्र. भा.) P. 166.

गुरोरनुगमात्प्रीतो गुरुरध्यापयिष्यति । ग्रन्थग्रन्थिभेदिनश्च न्यायान्परितुष्टो वक्ष्यति । अतश्च गुर्वनुगमनादीनामाचाराणामध्यापनरूपदृष्टं प्रयोजनं दृश्यते । तस्माद्गुर्वनुगमनादीनामाचाराणां दृष्टार्थत्वादेव प्रामाण्यमिति ।

अत्र [1]वार्तिककारः–

यदप्युक्तं भाष्यकारेण गुर्वनुगमनादीनामाचाराणां दृष्टार्थत्वादेव प्रामाण्यमिति तदयुक्तम् । कुतः । अस्मिन्नध्याये श्रुत्यादीनां धर्मे प्रामाण्यं विचार्यते । तथाच दृष्टप्रयोजनानां कृष्यादीनां धर्मे प्रामाण्याभावात्, कृष्यादिवदेव गुर्वनुगमनादीनामाचाराणामपि धर्मे प्रामाण्यं न स्यात् । अपिच 'तस्माच्छ्रेयांसं' इत्यादि दर्शनं च निष्फलं भवेत् । अतश्च यथा 'व्रीहीनवहन्ति' इत्यादौ वैतुष्यसम्पादनरूपदृष्टप्रयोजनसत्वेऽपि तत्र नियमादृष्टकल्पना कृता । व्रीहिषु, अवघातेन नखविदलनादिना च वैतुष्ये संभवति, अवघातेनैव व्रीहिषु वैतुष्यं भावयेदिति । एवंच व्रीहिषु क्रियमाणस्यावघातस्यादृष्टार्थत्वेन धर्मे प्रामाण्यं सिद्ध्यति । एवमेव गुर्वनुगमनादीनामाचाराणामप्यदृष्टार्थत्वेनैव धर्मे प्रामाण्यं सिद्ध्यत्येव । कथम् ।

"गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा ।
अथवा विद्यया विद्या चतुर्थान्नोपलभ्यते" ॥

इत्युक्तदिशा सामदानाद्युपायान्तरेणापि गुरुरध्यापयिष्यतीति ज्ञायते । एवंच गुर्वनुगमनादिना सामदानाद्युपायान्तरेण चाध्यापने संभवति सति गुर्वनुगमनादिनैवाध्यापनं भावयेदिति वेदे नियमादृष्टकल्पना क्रियते । नियमाच्चाविघ्नपरिसमाप्त्यर्थापूर्वसिद्धिः । तथाच नियमादृष्टफलकल्पनाद्वारा गुर्वनुगमनादीनामाचाराणां धर्मे प्रामाण्यं सिद्ध्यति ।

एवंच गुर्वनुगमनादीनामाचाराणां भाष्यकारोक्तदिशा दृष्टार्थत्वे

---

1. श्री जै. मी. द. (प्र. भा.) P.P. 165-166.

कृष्यादिवदेव धर्मे प्रामाण्यं न स्यात् । तस्मात् 'व्रीहीनवहन्ति' इत्यादाविव केवलादृष्टार्थत्वेनैव धर्मे प्रामाण्यमिति ।

अस्मिन्नधिकरणे [1]पार्थसारथिमिश्रैः स्मृतीनां वेदमूलकत्वेन प्रामाण्ये सिद्धे, वैदिकपरिगृहीतानामाचाराणामपि धर्मे प्रामाण्यमित्येव विचारः कृतः । न तु भाष्यकारोक्तरीत्याऽऽचाराणां प्रामाण्ये हेतुविचारः कृतः ।

[2]माधवाचार्यैः स्मृतीनामेव प्रामाण्यविचारः कृतः, नत्वाचारणाम् ।

[3]खण्डदेवेनापि स्मृतीनामेव प्रामाण्यं विचारितम्, नाऽऽचाराणाम् । किन्तु तद्व्याख्यायां प्रभावल्यां शंभुभट्टेनैवमुक्तम् । 'भाष्यकारेणोक्तं गुर्वनुगमनादीनामाचाराणां दृष्टार्थत्वादेव प्रामाण्यमिति, तद्वार्तिके निरस्तम्' इत्यनेन वचनेन शम्भुभट्टस्यमतेऽपि भाष्यकारोक्तपक्षोऽयुक्त एवेति ज्ञायते ।

गुर्वनुगमनादीनामाचाराणां दृष्टार्थत्वेऽप्रामाण्यं स्यात् । तस्माद्गुर्वनुगमनादीनां दृष्टार्थत्वेन प्रामाण्यमिति सिद्धान्तोपोद्बलकतया यो हेतुरुपन्यस्तः, सोऽयुक्त एव । अतश्च व्रीहिवदेवादृष्टार्थत्वेन गुर्वनुगमनादीनां प्रामाण्यमिति वार्तिककारपक्षो युक्तो भवत्येव । अस्मिन्नधिकरणे पार्थसारथिमिश्रैः गुर्वनुगमनादीनां प्रामाण्यमेवेति प्रतिपादितम् । न तु भाष्यकारस्य, वार्तिककारस्य वा पक्षः स्वीकृतः । माधवाचार्यैराचाराणां प्रामाण्ये विचार एव न कृतः । खण्डदेवेनापि माधवाचार्यवदेव । शम्भुभट्टेनतावद्वार्तिककारमतानुसारेणैव गुर्वनुगमनादीनामाचाराणां प्रामाण्यमिति प्रतिपादितम् ।

x x x

1. शा. दी. P P. 17-21.
2. जै. न्या. वि. P.P. 31-32.
3. भा. दी. (नि. भा) P. 45.

२. आकृत्यधिकरणम्

(१-३-९)

प्रयोगचोदनाभावादर्थैकत्वमविभागात् ॥३०॥ अद्रव्य-शब्दत्वात् ॥३१॥ अन्यदर्शनाच्च ॥३२॥ आकृतिस्तु-क्रियार्थत्वात् ॥३३॥ न क्रिया स्यादितिचेदर्थान्तरे विधानं न द्रव्यमिति चेत् ॥३४॥ तदर्थत्वात् प्रयोगस्या-विभागः ॥३५॥

'व्रीहीनवहन्ति' इत्यादौ व्रीह्यादिशद्बानां व्यक्तिवाचकत्वमुताऽऽकृतिवाचकत्वं वेति विचार्यते । व्रीह्यादिशद्बानां व्यक्तिरर्थ उताऽऽकृतिर्वेति संशयः । तत्र व्यक्तावेवाऽऽलम्भनादिक्रियासंभवाद्व्यक्तिरेव शद्बार्थ इति पूर्वपक्षः ।

व्यक्तिपक्षे 'श्येनचितं चिन्वीत' इत्यत्र चयनेन श्येनव्यक्तिरुत्पा-दयितुं न शक्यते । अतश्चाऽऽकृतिरेव शद्बार्थ इति सिद्धान्तः ।

तत्राऽऽकृतिरेव शद्बार्थ इति सिद्धान्ते प्राप्ते तदुपोद्बलकतया युक्त्य-न्तरं दर्शयन् [1]भाष्यकार एवं वदति । 'श्येनचितं चिन्वीत' इत्यत्र श्येन-शद्ब ईप्सिततमः, नतु साधकतमः, येन करणत्वं स्यात् । ननु द्वितीया तावच्छ्येनशद्बोपरि न श्रूयते । तथाच कथं श्येनशद्ब ईप्सिततमः ।

---

1. श्री जै. मी. द. (प्र. भा.) P. 314.

उच्यते । यद्यपि श्येनशद्बोपरि द्वितीया न श्रूयते, तथापि 'कर्मण्यग्न्याख्या-याम्' इत्यनेन [1]सूत्रेण कर्मत्वं सिद्ध्यत्येव । कर्मकारक एव क्विप्प्रत्ययश्च भवति । अतश्च न श्येनशद्बस्य करणत्वं भवति । अपि च व्यक्तिपक्षे चानेकव्यक्तिहिंसाप्रसङ्गादाकृतिरेवार्थो भवति । तथाच श्येनशद्ब ईप्सिततम इति ।

अत्र [2]वार्तिककारः–

श्येनशद्बस्य ईप्सिततमत्वादाकृतिवचनत्वमिति यद्भाष्यकारेणोक्तं तदयुक्तम् । कुतः । न हि केवल चयनक्रियासंभवमात्रेणाऽऽकृतिवचनत्वं श्येनशब्दस्य सम्भवति । व्यक्तिपक्षेऽप्यालम्भनादयो भवन्त्येव । तस्मादालम्भनादिसम्भवाद्व्यक्तिवचनत्वमेव स्यात् । अपिचाऽऽलम्भ-नादीनां बहुत्वादाकृतेश्चैकत्वाद् व्यक्तिवाचकत्वमेव स्यात् । न त्वाकृतिः शब्दार्थः, व्यक्तिस्तु लक्ष्यते । इति चेन्न । कुतः । व्यक्तिरेव शब्दार्थः, आकृतिरेव लक्ष्यते, इत्यपि वक्तुं शक्यते । अपिचानेकव्यक्तिलक्षणापेक्षया, एकस्यामेवाकृतौ लक्षणा युक्ता । तस्माद्व्यक्तिरेव शब्दार्थो भवितु मर्हति । यद्यपि करणत्वबोधकं नास्ति, तथाऽप्यगत्या तृतीयासमास आश्रयि ष्यते । तस्माद्व्यक्तिरेव शब्दार्थः । एवंच श्येनशब्दस्य ईप्सिततम-त्वादेवाऽऽकृतिवचनत्वं नैव संभवति । अनेकव्यक्तिलक्षणा स्यात् । तस्मादीप्सिततमत्वादेवाऽऽकृतिवचनत्वं श्येनादिशब्दानामिति सिद्धान्तो-पोद्बलकतया यदुक्तं भाष्यकारेण तदयुक्तम् ।

अस्मिन्नधिकरणे [3]पार्थसारथिमिश्रैः, [4]माधवाचार्यैः, [5]खण्डदेवेन-चाऽऽकृतिरेव शब्दार्थ इति सिद्धान्तः कृतः, न तु सिद्धान्तोपोद्बलकयुक्ति-

---

1. सि. कौ. (उ.) P. 489.
2. श्री जै. मी. द. (प्र. भा.) P. 314.
3. शा. दी. P. P. 48 to 52.
4. जै. न्या. वि. P.P. 45. 46.
5. पू. मी. द. (प्र. भा.) P.P. 55 to 57.

विचारः कृतः । अत्र पार्थसारथिमिश्रैः, माधवाचार्यैः, खण्डदेवेन च न भाष्यकारस्य, न वा वार्तिककारस्य वा पक्षः स्वीकृतः

x x x

३. उपांशुयाजाधिकरणम्

(२–२–४)

पौर्णमासीवदुपांशुयाजः स्यात् ॥९॥

चोदना वाऽप्रकृतत्वात् ॥१०॥

गुणोपबन्धात् ॥११॥

प्राये वचनाच्च ॥१२॥

'जामि वा एतद्यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशावुपांशुयाजमन्तरा यजति' इति । विष्णुरुपांशुयष्टव्योऽजामित्वाय प्रजापतिरुपांशुयष्टव्योऽजामित्वायाग्नीषोमावुपांशुयष्टव्योऽजामित्वाय, इति दर्शपूर्णमासयोः श्रूयते । तत्र 'उपांशुयाजमन्तरा यजति' इत्यनेन किं विष्णवादिगुणक प्रकृतयागसमुदाय उच्यतेऽथवा पूर्वयागो वेति संशयः । तत्र 'उपांशुयाजमन्तरा यजति' इत्यस्य यागसमुदायवाचकत्वमेवेति पूर्वपक्षः ।

अपूर्वयागवाचकत्वे च कथं विष्णवादिदेवताप्राप्तिरिति चेत् [1]भाष्यकार एवं वदति । 'शाखान्तरे विधानात्' इति । विष्णवादिदेवतानां शाखान्तरे विधानात्तेऽप्यत्र प्राप्नुवन्त्येव । तथाचात्र विष्णुप्रजापती, अनुवादावेव । अथवा यद्यप्यप्राप्तिर्विष्णवादीनां तथाप्युपांशुधर्मत्वात्प्राप्तिरेव भविष्यति । अतश्च यदुपांशु तत्प्राजापत्यमिति सिद्ध्यति । एवं चोपांशुधर्मत्वेनापि प्रजापतेः प्राप्तिरस्त्येव ।

अत्र [2]वार्तिककारः–

1. श्री जै. मी. द. (द्वि. भा.) P. 495.
2. श्री जै. मी. द. (द्वि. भा.) P. 495.

शाखान्तरे विधानात्त एवात्र प्राप्नुवन्तीति यद्भाष्यकारेणोक्तं तदयुक्तम् । कुतः । कस्यां शाखायामिति विशेषतयाऽनिर्देशात् । यदि विशेषतया निर्देषो न भवति, तदाऽस्फुटनिर्देशे किमप्यसाध्यं न भवति । अर्थादस्फुटनिर्देशद्वारा सर्वं साध्यमेव भवति । तस्माच्छाखान्तरे विधानादिति यद्भाष्यकारेणोक्तं तदयुक्तम् । अपिच 'यद्यप्यप्राप्तिस्तथाप्युपांशुत्वात्प्राप्तिरेव' इति यदप्युक्तं तदप्ययुक्तमेव कुतः । नात्र यदुपांशु तत्प्राजापत्यमिति श्रूयते । किन्तु यत्प्राजापत्यं तदुपांश्वेवेति । अतश्चोपांशुधर्मत्वात्प्रजापतिदेवताप्राप्तिरेवेति यदप्युक्तं भाष्यकारेण तदप्ययुक्तमेव ।

[1]पार्थसारथिमिश्रैस्तावन्मन्त्रवर्णादेव देवताप्राप्तिरित्येवप्रतिपादितम् ।

[2]माधवाचार्यैः, [3]खण्डदेवेन चैवं प्रतिपादितम् । नानाशाखासूपांशुयाजक्रमे पठितैरेव वैष्णवप्राजाप्रत्याग्नीषोमीयमन्त्रैर्विकल्पेन देवतात्रयस्य प्रतीयमानत्वाद्देवतायाः प्राप्तिरस्त्येवेति प्रतिपादितम् ।

'शाखान्तरे विधानाद्देवताप्राप्तिः' इति 'यदुपांशु तत्प्राजापत्यम्' इति च भाष्यकोरोक्तमसंगतमेव । शाखाविशेषानिर्देशात्, यदुपांशु तत्प्राजापत्यमिति च विधानात् । अतश्च यत्प्राजापत्यं तदुपांश्वेव कर्तव्यमिति विधानात्सैव वार्तिककार पक्षो युक्तो भवति । अस्मिन्नधिकरणे पार्थसारथिमिश्रैः, माधवाचार्यैः, खण्डदेवेन च देवताप्राप्तिविषये न भाष्यकारस्य न वा वार्तिककारस्य पक्षः स्वीकृतः ।

x x x

---

1. शा. दी. P. P. 131-133.
2. जै. न्या. वि. P. 100.
3. पू. मी. द. (प्र. भा.) P. 117.

४ बलाबलाधिकरणम्

(३-३-७)

श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात् ॥१४॥

श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवायेऽर्थविप्रकर्षात्पूर्वापेक्षयोत्तरस्य बाध इति विचार्य, ततश्च सोऽयं बाधः किमप्राप्तबाध उत प्राप्तबाधो वेति विचार्यते। तत्राप्राप्तबाध इति पूर्वपक्षः।

अप्राप्तस्य च बाधासम्भवात्प्राप्तबाध एवेति सिद्धान्तः।

श्रुत्यादिषु पूर्वपूर्वापेक्षयोत्तरोत्तरस्य बाध इति सिद्धान्ते प्राप्ते तदुपोद्बलकतया युक्त्यन्तरं दर्शयन्[1] भाष्यकार एवं वदति। सामान्यस्य कारणस्य प्रमाणस्य विद्यमानत्वात्प्रत्यक्षश्रुत्या लिङ्गकल्प्यश्रुतेर्बाधः। तस्मादानुमानिकश्रुतेर्मिथ्याज्ञानत्वमिति। अतश्च सामान्यस्य कारणस्य विद्यमानत्वाच्छ्रुत्यादिस्थले प्राप्तबाध एवेति।

अत्र [2]वार्तिककारः–

सामान्यस्य कारणस्य विद्यमानत्वाच्छ्रुत्यादिषु प्राप्तबाध इति यद्भाष्यकारेणोक्तं तदयुक्तम्। कुतः। यद्युभयत्रापि लिङ्गं प्रापकं भवति, तदा सामान्यस्य कारणस्य विद्यमानत्वाच्छ्रुत्या लिङ्गं बाध्येत। लिङ्गस्य साक्षाद्विधायकत्वाभावाद्यदि श्रुतिमनुमापयति तदा प्रत्यक्षाऽऽ

1. श्री जै. मी. द.)द्वि. भा.) P 859
2. Ibid. P. 859

नुमानिकश्रुत्योः समप्राधान्यमेव । यदि द्वयोर्विरोधः स्यात्तदा न प्रत्यक्ष श्रुत्याऽऽनुमानिकश्रुतेर्बाधो भवति । किन्तु विपरीतबाधः स्यात् । कुतः । परस्य पूर्वमबाधित्वाऽसम्भवादानुमानिकश्रुत्या प्रत्यक्षश्रुतेर्बाध-प्रसङ्गः स्यात् । अतश्च श्रुत्यादिषु सामान्यस्य कारणस्य विद्यमानत्वा-दिति हेतुना प्राप्तबाधो न संभवति । तस्माच्छ्रुत्यादिषु, अप्राप्तबाध एव । एवंच सामान्यस्य कारणस्य विद्यमानत्वात्प्राप्तबाध इति यद्भाष्य-कारेणोक्तं तदयुक्तम् ।

अस्मिन्नधिकरणे[1]पार्थसारथिमिश्रैः [2]खण्डदेवेन [3]माधवाचार्यैश्च भाट्टमतमाश्रित्य श्रुत्यादिषु प्राप्तबाध एवेति वर्णितः ।

श्रुत्यादिषु सामान्यस्य कारणस्य विद्यमानत्वात्प्राप्तबाध इति भाष्यकारपक्षोऽयुक्त एव । अन्यथाऽऽनुमानिकश्रुत्या प्रत्यक्षश्रुतेर्बाधः स्यात् । अतश्च सामान्यस्य कारणस्य विद्यमानत्वादिति सिद्धान्तोपोद्बल-कयुक्तिरसंगतैवेति वार्तिककारपक्षो युक्त एव । अस्मिन्नधिकरणे पार्थ सारथिमिश्रैः, माधवाचार्यैः, खण्डदेवेन च भाट्टमतमाश्रित्यैव प्रतिपादितम् ।

x x x

५ कर्मसु दम्पत्योः सहाधिकाराधिकरणम्

(६–१–४)

स्ववतोस्तु वचनादैककर्म्यं स्यात् ।१७। लिङ्गदर्शना-च्च ।१८। क्रीतत्वात्तु भक्त्या स्वामित्वमुच्यते ।१९।

1. शा. दी. P. 248.
2. पू. मी. द. (प्र-भा.) P. 258.
3. जै. न्या. वि. P. 173.

फलार्थित्वात्तु स्वामित्वेनाभिसंबन्धः ।२०। फलवत्तां च दर्शयति ।२१।

उभावपि दम्पती स्ववन्तावेव । अतश्च द्वयोरपि दम्पत्योः यागेऽधिकार एवेति [1]पूर्वाधिकरणे सिद्धे, किं दम्पत्योः सहाधिकार उत पृथगधिकार इति विचार्यते । तत्र दम्पती पृथक्पृथक् यजेतोत सहवेति संशयः । तत्र 'यजेत' इत्यत्र कर्तोपादेयत्वेन श्रूयते । आख्यातगतमेकत्वं च विवक्षितमेव । अतश्च दम्पत्योः पृथगधिकार एवेति पूर्वपक्षः ।

'धर्मे चार्थे च नातिचरितव्या' इत्यनेन वचनेन दम्पत्योः संसृष्टद्रव्यमित्यवगम्यते । पृथगधिकारे च संसृष्टद्रव्यस्य विभागाभावात्त्यागो न संभवति । अतश्च सहाधिकार एव । अपि च यजमानकर्तृकप्रयोगे पत्न्या आज्यावेक्षणम्, पत्नीकर्तृकप्रयोगे च यजमानाऽऽज्यावेक्षणं न स्यात् । तथाच क्रतुवैगुण्यं स्यात् । तत्र तावत्पत्नीयजमानावेक्षितेनाऽऽज्येन होम उक्तः । तस्मादपि सहाधिकार एव 'यजेत' इत्यत्रैकत्वं च मिथुनकारकाभिप्रायम् ।

दम्पत्योः सहाधिकार एवेति सिद्धे [2]भाष्यकार एवं वदति । 'अवश्यं च पत्न्या सह यष्टव्यम्' इति । अस्य वाक्यस्यायमर्थो भवति यद्यजमानकर्तृकप्रयोगे यजमानः सह पत्न्या यजेतेति ।

अत्र [3]वार्तिककारः–

'अवश्यं च सह पत्न्या यष्टव्यम्' इति यद्भाष्यकारेणोक्तं तदयुक्तम् । कुतः । 'सह पत्न्या' इत्युक्ते यागकर्ता पुरुष इत्यवगम्यते ।

---

1. श्री. जै. मी. द. (श. भा) P.P. 1358-1360.
2. Ibid P 1363.
3. Ibid P. 1363.

कुतः। पत्नीसाहित्यस्य प्रतीयमानत्वात्। किन्तु 'यजेत' इत्यत्रैकवचनस्य संसृष्टकर्तृत्वेनोपपन्नत्वात् 'धर्मे चार्थेच' इत्यादिना दम्पत्योः संसृष्टद्रव्यत्वावगमात्, दम्पत्योः सहाधिकार एवेति [1]भाष्ये पूर्वमेव प्रतिपादितम्। अतश्च यदि पृथगधिकारः स्यात्तदा सह पत्न्येति वक्तव्यम्। तस्मादत्र पृथगधिकाराभावात् 'अवश्यं च सह पत्न्या यष्टव्यम्' इतियद्भाष्यकारेणोक्तं तदयुक्तम्।

अस्मिन्नधिकरणे [2]पार्थसारथिमिश्रैः, [3]माधवाचार्यैः, [4]खण्डदेवेन च यागे दम्पत्योः सहाधिकार एवेति प्रतिपादितम्, न तु भाष्यकारोक्तदिशाऽवश्यं च सहपत्न्या यष्टव्यमिति। अत्र पार्थसारथिमिश्रैः, खण्डदेवेन, माधवाचार्यैश्च न भाष्यकारस्य, न वा वार्तिककारस्य वा पक्षः स्वीकृतः।

x x x

६. प्रयाजादिधर्माणामुपदेशेन प्रकृतिमात्रार्थताधिकरणम्

(७-१-१)

श्रुतिप्रमाणत्वाच्छेषाणां मुख्यभेदे यथाधिकारं भावः स्यात् ।१। उत्पत्त्यर्थाविभागाद्वा सत्ववदैकधर्म्यं स्यात् ।२। चोदनाशेषभावाद्वा तद्भेदाद्व्यवतिष्ठेरन्नुत्पत्तेर्गुणभूतत्वात् ।३। सत्वलक्षणसंयोगात्सार्वत्रिकं

1. श्री. जै. मी. द. (च. भा) P. 1362.
2. शा. दी. P. P. 450-451.
3. जै. न्या. वि. P. 342.
4. पू. मी. द. (द्वि. भा) P.P. 223-224.

प्रतीयेत ।४। अविभागात्तु नैवं स्यात् ।५। द्व्यर्थत्वं च विप्रतिषिद्धम् ।६। उत्पत्तौ विध्यभावाद्वा चोदनायां प्रवृत्तिः स्यात्ततश्च कर्मभेदः स्यात् ।७। यदि वाऽप्यभिधानवत्सामान्यात्सर्वधर्मः स्यात् ।८। अर्थस्य त्वविभक्तत्वात्तथा स्यादभिधानेषु पूर्ववत्त्वात्प्रयोगस्य कर्मणः शब्दभाव्यत्वाद्विभागाच्छेषाणामप्रवृत्तिः स्यात् ।९। स्मृतिरिति चेत् ।१०। न पूर्ववत्त्वात् ।११। भावः स्यात् ।१२।

प्रयाजादिधर्मा यजिप्रयुक्ता उतापूर्वप्रयुक्ता इति संशयः। यजिप्रयुक्ता इति पूर्वपक्षः। अपूर्वप्रयुक्ता इति सिद्धान्तः। अतश्च प्रयाजादीनां यथाप्रकरणं व्यवस्थैव। कथमत्र 'दर्शपूर्णमासशब्दे यागो विशेष्यते' इत्यत्र [1]भाष्यकार एवमाह। नैवात्र यागो विशेष्यते। किन्त्वपूर्वभावनैवोभयपदविशिष्टोच्यते। नन्वरुणास्थलेऽन्यद्द्रव्यमन्यो गुणश्च वर्तते। अतश्चोभयपदविशिष्टा भावना विधातुं शक्यते। अत्र तु याग एव दर्शपूर्णमास.। अतश्च भेदाभावात्कथमुभयपदविशेषणत्वं युज्यते। उच्यते। यजेतेत्यत्र श्रुत्या यागसामान्यस्य भावना विधीयते। वाक्याच्च दर्शपूर्णमासशब्देन दर्शपूर्णमासो याग इति विशेषस्य भावना विधीयते। एवंचोभयपदविशिष्टा भावना विधातुं शक्यत एव। ननु श्रुत्या यागसामान्यस्य भावना, वाक्याद्विशेषस्येत्येतद्युगपद्भवितुं नार्हति। उच्यते। यद्येतद्युगपद्भवितुं नार्हति, तदा वाक्यार्थ एव गृह्यते। न श्रुत्यर्थः। कुतः। श्रुत्यर्थे परिगृह्यमाणे दर्शपूर्णमासशब्दोऽनर्थकः स्यात्। तथाच यागेन भावयेदित्येवमेव प्रयोगः स्यात्। तस्माद्वाक्यार्थ एव परिगृह्यते। तथाच दर्शपूर्णमासो याग इति दर्शपूर्णमासविशेषणत्वं यागस्य सिद्ध्यति।

---

1. श्री. जै. मी. द. (च. भा) P. 1529.

अत्र [1]वार्तिककारः–

'श्रुत्या सामान्यस्य भावना, वाक्याद्विशेषस्य। न चैतद्युगपद्-भवितुमर्हति। अतश्च श्रुत्यर्थो न परिगृह्यते। किं तर्हि। वाक्यार्थः' इति यदुक्तं भाष्यकारेण तदयुक्तम्। विरोधाभावात्। कथम्। यथैव हि स्वर्गं प्रति यागस्य करणत्वेनान्वयस्तथैव हि न दर्शपूर्णमासयोः करणत्वेनान्वयः। दर्शपूर्णमासयोः यागस्य चाभेदात्। एका तावदत्रोप-श्लेषलक्षणा श्रुतिः। अन्या च विभक्तिश्रुतिः। द्वयोः श्रुत्योर्विरोध एव नास्ति। अतश्चैतद्युगपद्भवितुमर्हति। तथाच श्रुत्या यागसामा-न्यस्य भावना, वाक्याद्विशेषस्य। न चैतद्युगपद्भवितुमर्हतीतियदुक्तं भाष्यकारेण तदयुक्तम्। अपि च दर्शपूर्णमासशब्दस्यानर्थक्यपरिहाराय, दर्शपूर्णमासवाक्ये वाक्यार्थ एव परिगृह्यते, न श्रुत्यर्थ इत्यपि भाष्यकारो-क्तोऽयुक्त एव। कुतः। भावार्थाधिकरणविरोधात्। भावार्थाधि-करणे च धात्वर्थ एव फलभावनायां करणं, न नामार्थ इति निरूपितम्। अतश्च भावार्थाधिकरणविरोधदर्शनाच्छ्रुत्यर्थ एव परिगृह्यते, न वाक्यार्थः। ननु श्रुत्यर्थे परिगृह्यमाणे वाक्यार्थेन विरोधः। उच्यते। दर्शपूर्णमास-शब्दोऽत्र यागसामानाधिकरण्यवाचकः। यागस्य फलस्य च संबन्ध एवेदं सामानाधिकरण्यं युज्यते। तस्माद्दर्शपूर्णमासो याग इति सामाना-धिकरण्ये सिद्धे विरोध एव नास्ति। अतश्च भाष्यकारेण किमुच्यत इति न ज्ञायते। तस्माद्भावार्थाधिकरणविरोधान्न वाक्यार्थः परिगृह्यते। एवं च विरोधाद्वाक्यार्थः परिगृह्यते, न श्रुत्यर्थ इति यद्भाष्यकारेणोक्तं तदयुक्त मेव।

अस्मिन्नधिकरणे [2]पार्थसारथिमिश्रैः, [3]माधवाचार्यैः, [4]खण्डदेवेन च

---

1. श्री. जै. मी. द. (च. भा) P. 1529.
2. शा. दी. P.P. 525—527.
3. जै. न्या. वि. P. 406.
4. पू. मी. द. (द्वि. भा) P.P. 331—340.

सर्वेषां धर्माणां सर्वार्थत्वे प्रकरणमनर्थकं स्यादिति पूर्वपक्षं कृत्वा, सौर्यादौ च धर्माणामुपदेशाभावादतिदेशविचारः कर्तव्य एवेति प्रतिपादितम्, न तु भाष्यकारोक्तरीत्या कथं दर्शपूर्णमासशब्देन यागो विशेष्यत इति।

द्वयोरपि श्रुतित्वान्न विरोधोऽस्ति। अतश्च विरोधदर्शनाद्वाक्यार्थ एव परिगृह्यते। न श्रुत्यर्थः। इति यदुक्तं भाष्यकारेण तदयुक्तम्। अतश्च श्रुत्यर्थ एव परिगृह्यत इति वार्तिककारपक्षो युक्त एव भवति अस्मिन्नधिकरणे पार्थसारथिमिश्रैः, माधवाचार्यैः, खण्डदेवेन च न भाष्यकारस्य न वा वार्तिककारस्य वा पक्षेण प्रतिपादितम्।

x x x

७. सादृश्यविशषेण नियतप्रकृतितो धर्मातिदेशाधिकरणम्

(८-१-२)

प्रवृत्तित्वादिष्टेस्सोमे प्रवृत्तिस्स्यात् ।३। लिङ्गदर्शनाच्च ।४। कृत्स्नविधानाद्वाऽपूर्वत्वम् ।५। स्रुगभिधारणाभावस्य च नित्यानुवादात ।६। विधिरिति चेत् ।७। न वाक्यशेषत्वात् ।८। शङ्कते चानुपोषणात् ।९। दर्शनमैष्टिकानां स्यात् ।१०।

'सौर्यं चरुं निर्वपेत्' इति दर्शपूर्णमासविकृतीष्टिः श्रूयते। तत्राङ्गकलापविषये विचार्यते। किं सौर्येष्टौ नियतप्रकृतितो धर्माणां प्राप्तिरुतानियतप्रकृतितो वेति संशयः। तत्रानियतप्रकृतित एव धर्मा भवन्ति। तथाच तेषां विकल्प इति पूर्वपक्षः।

सादृश्यविशेषेण नियतप्रकृतित एव धर्मा भवन्ति। कथम्। दर्शपूर्णमासयोः 'आग्नेयमष्टाकपालं निर्वपति' इत्यत्र निर्वापः, एकदेवता-

कत्वं, औषधद्रव्यकत्वं चाऽऽग्नेययागसबंन्धितया श्रूयते। तथाचैतान्याग्नेयलिङ्गानि भवन्ति। तथैव सौर्यवाक्येऽपि श्रूयते। अतश्च निर्वापादिसदृश्यविशेषस्य प्रतीयमानत्वात्सौर्ये, आग्नेयविध्यन्त एव। तथाच सौर्ये सादृश्यविशेषेण नियतप्रकृतिकाऽऽग्नेयविध्यन्त एवेति सिद्धान्तः।

सौर्येष्टौ नियतप्रकृतित एव धर्मा भवन्तीति सिद्धान्ते प्राप्ते [1]भाष्यकार एवं वदति। तस्य निर्वापादिलिङ्गस्य तेन विध्यन्तविशेषेण संयोगस्यानुभूतपूर्वत्वात्संयोगिनोश्चान्यतरो दृश्यमान इतरमदृश्यमानमनुमानाद्बुद्धौ संनिधापयति। अर्थान्निर्वापादीनां प्रयाजादिभिस्सह संयोगस्यानुभूतपूर्वत्वान्निर्वापादयः प्रयाजादीननुमापयितुं शक्नुवन्ति। तथाच सौर्येष्टौ सादृश्यविशेषेण नियतप्रकृतित एव धर्मा भवन्ति।

अत्र [2]वार्तिककारः–

संयोगिनोश्चान्यतरो दृश्यमान इतरमदृश्यमानमनुमानद्बुद्धौ संनिधापयतीति यद्भाष्यकारेणोक्तं तदयुक्तम्। कुतः। यथा धूमाग्न्योः संयोगस्यानुभूतपूर्वत्वादन्यतरो धूमो दृश्यमान इतरमदृश्यमानमग्निं बुद्धौ संनिधापयति, तथा नात्र संभवति। कुतः। निर्वापादीनां प्रयाजादीनां च परस्परसंबन्धे प्रमाणाभावात्प्रधानेनैव संबन्धः, न परस्परम्। अतश्च निर्वापादीनां प्रयाजादीनां च संयोगस्याननुभूतपूर्वत्वान्न निर्वापादयः प्रयाजादीननुमापयितुं शक्नुवन्ति। तस्मात्संयोगिनोश्चान्यतरो दृश्यमान इतरमदृश्यमानमनुमानाद्बुद्धौ संविधापयतीति यद्भाष्यकारेणोक्तं तदयुक्तम्।

---

1. श्री. जै. मी. द. (प. भा.) P. 1584.
2. Ibid. P. 1584.

अस्मिन्नधिकरणे [1]पार्थसारथिमिश्रैः, [2]माधवाचार्यैः, [3]खण्डदेवेन च सौर्यादिविकृतीष्टौ सादृश्यविशेषेण नियतप्रकृतित एव धर्मा भवन्तीति प्रतिपादितम्, न तु भाष्यकारोक्तरीत्या ।

निर्वापादीनां प्रयाजादीनां च परस्परसंबन्धे प्रमाणाभावात् 'संयोगिनोश्च' इत्यादि भाष्यकारपक्षोऽयुक्त एव । अतश्च वार्तिककारपक्ष एव युक्तो भवति । अत्र पार्थसारथिमिश्रैः, माधवाचार्यैः, खण्डदेवेन च न कस्यापि पक्षः स्वीकृतः ।

x x x

८. जनकसप्तरात्र द्वादशाहिकानां सप्तानामह्नां क्रमेण धर्मातिदेशाधिकरणम्

(८-३-२)

गणचोदनायां यस्य लिङ्गं तदावृत्तिः प्रतीयेताऽऽग्नेयवत् ।३। नानाहानि वा सङ्घातत्वात् प्रवृत्तिलिङ्गेन चोदनात् ।४। तथा चान्यार्थदर्शनम् ।५।

जनकसप्तरात्रे 'चत्वारि त्रिवृन्त्यहान्यग्निष्टोममुखानि' इति श्रूयते । तत्र चतुर्ष्वहःसु विध्यन्तविचारः क्रियते । किं जनकसप्तरात्रान्तर्गतेषु चतुर्ष्वहःसु प्रथमस्याह्न एव विध्यन्तः कार्यः, उत त्रिवृदादीनां चतुर्णामपि क्रमेण चतुर्षु प्रवृत्तिरिति संशयः । तत्र 'जनकसप्तरात्रेण

---

1. शा. दी. P P. 551-552
2. जै. न्या. वि. P. 423.
3. पू. मी. द. (तु. भा) P. 1.

यजेत' इति चोदनासामान्यात्प्रथमस्याह्न एव विध्यन्तश्चतुर्ष्वप्यावर्तनीय इ॰। पूर्वपक्षः ।

जनकसप्तरात्रान्तर्गतचतुर्ष्वहःसु प्रथमस्याह्नो विध्यन्तः कर्तव्य इति पूर्वपक्षे प्राप्ते [1]भाष्यकार एवं वदति । चतुर्णामह्नां संघातसामान्याद्द्वादशाहिकविध्यन्त एव । अतश्च 'चत्वारि त्रिवृन्त्यहान्यग्निष्टोममुखानि' इति वाक्येन जनकसप्तरात्रेऽतिदेशप्राप्तद्वादशाहिकचत्वार्यहान्यनूद्य त्रिवृत्त्वं विधीयते । तस्मात्संघातसामान्याज्जनकसप्तरात्रान्तर्गतचतुर्ष्वहःसु द्वादशाहिकविध्यन्त एव ।

अत्र [2]वार्तिककारः–

यदप्युक्तं भाष्यकारेण चत्वार्यहान्यनूद्य त्रिवृत्त्वं विधीयत इति तदयुक्तम् । कुतः । यदि जनकसप्तरात्रे चत्वार्यहानि विधीयेरन्, तदाताननूद्य त्रिवृत्त्वं विधातुं शक्यते । न हि जनकसप्तरात्रे तेषां विधिः । कुतः । 'जनकसप्तरात्रेण यजेत' इत्यत्र सप्तानामह्नां श्रवणात् । अथवा चतुर्णामह्नां विधित्वमभ्युपगम्य, ततस्त्रिवृत्त्वं विधीयत इत्यपि वक्तुं नैव शक्यते । अन्यथाऽह्नामग्निष्टोममुखत्वस्य च विधेयत्वे वाक्यभेदः स्यात् । अतश्च भाष्यकारोक्तदिशा वाक्यभेदादिदोषसंभवान्न चत्वार्यहान्यनूद्य त्रिवृत्त्वं विधीयते । एवं च चत्वार्यहान्यनूद्य त्रिवृत्त्वं विधीयत इति यदुक्तं भाष्यकारेण तदयुक्तम् ।

अतश्चात्रैवं वक्तव्यं भवति यत् 'चत्वारि त्रिवृन्त्यहानि भवन्ति' इत्यत्र बहुवचनान्ताहन्शब्देनानियतबहुत्वे प्राप्ते, 'चत्वारि' इत्यनेन नियम्यते । ततश्च त्रिवृत्त्वमग्निष्टोममुखत्वं च विधीयते । अतश्च केवलत्रिवृत्त्वलिङ्गेन प्रथमस्याह्नो विध्यन्तश्चतुर्ष्वपीति पूर्वपक्षो नैव

---

1. श्री जै. मी. द. (प. भा) P.P. 1614-1615.
2. Ibid. P.P. 1614-1615.

3)

कर्तव्यः । सिद्धान्तस्तु यागानां संघातस्य गुणत्वात्संघातगुणेन द्वादशाहिको-
विध्यन्त एव चतुर्ष्वहस्सु ।

अत्र [1]पार्थसारथिमिश्रः—

जनकसप्तरात्रे यागसंघातसामान्यस्य प्रधानगतत्वात्तदङ्गभूतस्तोत्रीयागतात्त्रिवृत्त्वाब्दलीयो भवति । अतश्चानयैव युक्त्या द्वादशाहिको विध्यन्तो भवति, न तु भाष्यकारोक्तयुक्त्या ।

[2]माधवाचार्यैस्तु चतुर्ष्वहःसु द्वादशाहिकविध्यन्त एवेति प्रतिपादितम् ।

[3]खण्डदेवस्तु प्रथमतःभाष्यकारोक्तदिशा, अधिकरणव्याख्यां कृत्वा, ततश्चैवं स्वाभिप्रायेण व्याख्यां कृतवान् । नाऽऽद्यस्यैवाह्नो धर्मातिदेशश्चतुर्ष्वपि । कुतः । 'चत्वारि त्रिवृन्ति' इत्यत्र चतुस्संख्याकोद्देशेनैव यदि त्रिवृत्त्वं विधीयेत, तदा आज्येषु चतुर्ष्वेव त्रिवृत्त्वं स्यात् । अहर्मात्रोद्देशेन च त्रिवृत्त्वविधौ सप्तस्वपि त्रिवृत्त्वं स्यात् । चतुस्संख्याविशिष्टाहरुद्देशेन च विधौ वाक्यभेदापत्तेः । अतश्च संख्याभिन्नत्रिवृत्त्वविशिष्टकर्मोत्पत्तिर्विधीयते । फलवाक्येन च सर्वेषां फलसंबंधो भवति । उत्पत्तिवाक्ये च चतुर्णां गणत्वप्रतीतेस्त्रिवृत्त्वस्याप्युत्पत्तिगतत्वेन तत्रैव विधीयते । एवं च चतुर्णामह्नामतिदेशो भवति, न तु केवलस्याऽऽद्यस्य । अन्येषां त्रयाणां चान्यसंस्थाकत्वात् 'अग्निष्टोममुखानि' इत्यस्यानुवादत्वमप्युपपद्यत एव ।

अत्र वाक्यभेदादिदोषभयान्न भाष्यकारस्य पक्षो युक्तः । अतश्च वार्तिककारस्यैव पक्षो युक्तो भवति । अस्मिन्नधिकरणे पार्थसारथिमिश्रैः,

1. शा. दी. P.P. 565-566.
2. जै. न्या. वि. P.P. 437-438.
3. पू. मी. द. (तृ. भा) P.P. 25-26.

खण्डदेवेन च स्वस्वयुक्तिभ्यां जनकसप्तरात्रे द्वादशाहिको विध्यन्त इति प्रति.ादितम् । माधवाचार्यैस्तु द्वादशाहिको विध्यन्त इत्येवोक्तम् ।

x x x

९. दर्शपूर्णमासयोरन्वारम्भणीयायाः सकृदनुष्ठानाधिकरणम्

(९-१-१०)

इष्टयावृत्तौ प्रयाजवदावर्तेताऽऽरम्भणीया ।३४।
सकृद्वाऽऽरम्भसंयोगादेकः पुनरारम्भो यावज्जीव-प्रयोगात् ।३५।

दर्शपूर्णमासयोः 'आग्नावैष्णवमेकादशकपालं निर्वपेद्दर्शपूर्णमासा-वारप्स्यमानः सरस्वत्यै चरुम्' इत्यादिनाऽऽरम्भणीयेष्टिः श्रूयते । तत्राऽऽरम्भणीयेष्टेरावृत्तिरस्ति नवेति विचार्यते । तत्र किं दर्शपूर्णमासयोरा-वृत्तावारम्भणीयाया आवृत्तिः, उत नवेति संशयः । 'यावज्जीवं दर्शपूर्ण-मासाभ्यां यजेत' इत्यनेन दर्शपूर्णमासयोरावृत्तिः श्रूयते । अतश्च प्रति-प्रयोगमारम्भणीयाऽप्यावर्तनीयैवेति पूर्वपक्षः ।

यावज्जीवं दर्शपूर्णमासौ कर्तव्याविति निश्चित्य प्रारम्भः क्रियते । अतश्च यावज्जीवं क्रियमाणदर्शपूर्णमासयोरेकत्वात्सकृदेव कर्तव्याऽऽरम्भ-णीयेति वृत्तिकारमतानुसारेण सिद्धान्तः ।

सकृदेवाऽऽरम्भणीया कर्तव्येति सिद्धान्ते प्राप्ते, तदुपोद्बलकतया युक्त्यन्तरं दर्शयन् [1]भाष्यकार एवमाह । आरम्भशब्दस्य प्रथमं प्रवर्तन-

---

1. श्री जै. मी. द. (प्र. भा) P.

मित्यर्थः । अतश्चाऽऽरम्भणीयाप्रारम्भेन सर्वे प्रयोगाः प्रारब्धा भवन्त्येव। तस्मादप्यारम्भणीया सकृदेव कर्तव्येति ।

अत्र [1] वार्तिककारः–

आरम्भणीयाप्रवृत्तेन सर्वे प्रयोगाः कृता भवन्तीति यद्भाष्यकारेणोक्तं तदयुक्तम् । कुतः । इतिकर्तव्यतायाः प्रयोगेणैव संबन्धः, न कर्मणा । यदि कर्मणा स्यात्तदा प्रयाजादीनामपि सकृदेवानुष्ठानं स्यात् । किन्त्वावृत्तिः प्रयाजानां दृश्यत एव । प्रयोगभेदात् । अतश्च प्रतिप्रयोगमितिकर्तव्यताया आवृत्तत्वादन्वारम्भणीयाऽप्यावर्तेत । अपिच कालः कर्म प्रयोजयति । द्वितीयादेर्निमित्तभूतकालाभावात्कथं द्वितीयादेरारम्भः सिद्ध्यति । अतश्च निमित्तभूतकालाभावात्प्रयोगभेदाच्चाऽऽरम्भणीययैव सर्वे प्रयोगाः कृता न भवन्ति । तस्मादारम्भणीयाप्रवृत्तेन सर्वे प्रयोगाः कृता भवन्तीति यद्भाष्यकारेणोक्तं तदयुक्तम् ।

अस्मिन्नधिकरणे [2] पार्थसारथिमिश्रैः, [3] माधवाचार्यैः, [4] खण्डदेवेन च यावज्जीवं क्रियमाणदर्शपूर्णमासयोरारम्भणीया सकृत्कर्तव्या, उतासकृद्वेति विचारः कृतः, न तु भाष्यकारोक्तरीत्या, आरम्भणीयाप्रवृत्तेन सर्वे प्रयोगाः प्रारब्धा भवन्तीति ।

प्रयोगभेदात्प्रयाजादीनामप्यावृत्तिर्दृश्यत एव । अतश्च प्रयाजादिवदेव, आरम्भणीयाया अप्यावृत्तिर्भवत्येव । अतश्चैकयैवाऽऽरम्भणीयया सर्वेऽपि प्रयोगा आरब्धा इति भाष्यकारपक्षोऽयुक्त एव । अतश्च प्रति-

---

1. श्री. जै. मी. द. (प्र. भा) P.
2. शा. दी. P.P. 590-591.
3. जै. न्या. वि. P. 454.
4. पू. मी. द. (तृ. भा) P.P. 67-72.

प्रयोगमारम्भणीयाऽप्यावर्तेतेति वार्तिककार पक्षो युक्त एव भवति । अत्र ‘..थंसारथिमिश्रैः, खण्डदेवेन, माधवाचार्यैश्च न भाष्यकारस्य न वा वार्तिककारस्य वा पक्षः स्वीकृतः ।

x x x

१०. ज्योतिष्टोमाद्यङ्गभूतदीक्षणीयादिविकृता-न्वारम्भणीयाया बाधाधिकरणम्

(१०–१–२)

इष्टिरारम्भसंयोगादङ्गभूतान्निवर्तेताऽऽरम्भस्य प्रधान-संयोगात् ।४।

दर्शपूर्णमासेष्टिविकृतिषु ‘आग्नावैष्णवमेकादशकपालं निर्वपेद्दर्श-पूर्णमासावारप्स्यमानः’ इत्यनेनाऽऽरम्भणीयेष्टिः श्रूयते । सा चेयमारम्भ-णीयेष्टिः ‘आग्नावैष्णवमेकादशकपालं निर्वपेद्दीक्षिष्यमाणः’ इत्यनेन ज्योतिष्टोमाङ्गभूतासु दीक्षणीयादिषु श्रूयते । तथाच दीक्षणीयादिष्वा-रम्भणीया कर्तव्या नवेति विचार्यते । किमारम्भणीयेष्टिर्दीक्षणीयादिषु कर्तव्या, उत नवेति संशयः । यथाप्रकृतिकत्वसिद्धये सर्वं प्राकृतं विकृतौ कर्तव्यमेव । तथाचाऽऽरम्भणीयाऽपि दीक्षणीयादिषु कर्तव्यैवेति पूर्वपक्षः ।

ज्योतिष्टोमस्तावत्सर्वारम्भार्थत्वेन श्रुतः । तथाच ज्योतिष्टोमाऽऽ-रम्भेनैव दीक्षणीयादीनामप्यारम्भो भवत्येव । तस्माद्दीक्षणीयादिषु न पुनरारम्भणीयेष्टिः कर्तव्येति सिद्धान्तः ।

दीक्षणीयायामारम्भणीयेष्टिर्न कर्तव्येति सिद्धे [1]भाष्यकार एवं वदति। यदा च दीक्षणीया भवति, तदैव ज्योतिष्टोमोऽप्यारब्ध एव भवति। अतश्च दीक्षणीययैव ज्योतिष्टोमे आरम्भरूपोऽर्थः सिद्ध एवेति।

अत्र [2]वार्तिककारः–

ज्योतिष्टोमे दीक्षणीययैवाऽऽरम्भरूपोऽर्थस्सिद्ध्यतीति यद्भाष्यकारेणोक्तं तदयुक्तम्। कुतः। दीक्षणीयायाः पुरुषसंस्कारकत्वेन यागोपकारकारकत्वान्न ज्योतिष्टोमाऽऽरम्भार्थत्वमस्ति। अपिच दीक्षणीयाया अरम्भणीयार्थे वचनमपिनास्ति। 'आग्नावैष्णवमेकादशकपालं निर्वपेद्दीक्षिष्यमाणः' इत्यस्मिन्नुत्पत्तिवाक्ये दीक्षासंजननमेव श्रूयते। तस्मादाग्नावैष्णवमित्यादिर्दीक्षणीयास्तुत्यर्थोऽयमर्थवाद एव। तस्माद्यजनकर्तुः पुरुषसंस्कारकत्वेन श्रुतायाः दीक्षणीयाया ज्योतिष्टोमाऽऽरम्भार्थकत्वाभावाद्, दीक्षणीययैव ज्योतिष्टोमे आरम्भरूपोऽर्थः, सिद्ध्यतीति यद्भाष्यकारेणोक्तं तदयुक्तम्।

अत्र [3]पार्थसारथिमिश्राः–

प्रथमप्रवर्तनस्यैवाऽऽरम्भपदार्थत्वात्प्रकृतज्योतिष्टोम एवाऽऽरम्भणीया भवति। प्रधाने ज्योतिष्टोमे कृताऽऽरम्भणीययैवाङ्गानामप्यारम्भः सिद्ध्यत्येव। तस्मान्न पुनरङ्गेष्वारम्भणीया भवतीत्येवमेव विचारः कृतः, दीक्षणीयाया ज्योतिष्टोमाऽऽरम्भार्थकत्वमस्ति नवेति।

[4]खण्डदेवेन द्वाररुपार्थलोपादारम्भणीयेष्टिर्दीक्षणीयादिषु न कर्त-

---

1. श्री जै. मी. द. (प. भा) P. 1805
2. Ibid. P. 1805
3. शा. दी. P. 650
4. पू. मी. द. (तृ. भा) P. 194

ब्येत्वमेव विचारः कृतः । न तु दीक्षणीयाया ज्योतिष्टोमाऽऽरम्भार्थक-त्वमस्ति नवेति ।

[1]माधवाचार्यास्त्वत्रैवं प्रतिपादयन्ति यज्ज्योतिष्टोमाऽऽरम्भेनैव विकृतीष्टीनामप्यारम्भः सिद्ध्यत्येव । तथाच पुनरारम्भाख्यद्वाराभावद्-दीक्षणीयादिन ष्वारम्भणीया कर्तव्येति ।

दीक्षणीयायाः पुरुषसंस्कारकत्वेन ज्योतिष्टोमोपकारकत्वमेव । तथाच दीक्षणीयाया ज्योतिष्टोमे आरम्भरुपोऽर्थः सिद्ध्यतीति भाष्यकार-पक्षोऽयुक्त एव । अतश्च वचनाभावाच्च न दीक्षणीया ज्योतिष्टोमाऽऽ-रम्भार्था भवतीति वार्तिककारपक्षोऽभ्युपेय एव । अस्मिन्नधिकरणे पार्थसारथिमिश्रैः, माधवाचार्यैः, खण्डदेवेन च न भाष्यकारस्य, न वा वार्तिककारस्य वा पक्षेण प्रतिपादितम् ।

x x x

११. वैश्वानरेष्टौ द्वेष्यसंप्रदानकदानस्या-दृष्टार्थताधिकरणम्

(१०–२–१६)

द्वेष्ये चाचोदनाद्दक्षिणापनयः स्यात् ।४६।

'यदि पत्नीः संयाजयन् कपालमभिजुहुयात्, वैश्वानरं द्वादशकपालं निर्वपेत् । तस्यैकहायनो गौर्दक्षिणा । तं स द्वेष्याय दद्यात्' इति दर्शपूर्णमासयो. श्रूयते । अस्य वाक्यस्य गार्हपत्ये पुरोडाशश्रपणार्थमुपहि-तेषु कपालेषु यदि पत्नीसंयाजाहुतिः पतेत्तदेयं वैश्वानरदेवताकद्वादशकपाले-

---

1. जै. न्या. वि. P.P. 516

ष्टिः कर्तव्येत्यर्थः । अत्र दक्षिणाविषये विचार्यते । तत्र किं द्वेष्यसंप्रदानकं दानं परिक्रयार्थमुत धर्मार्थं वेति संशयः । दक्षिणा तावत्परिक्रीतऋत्विगानत्यर्थत्वेनैव श्रुता । अतश्च 'गौर्दक्षिणा' इत्यत्रापि दक्षिणाशब्दश्रवणादत्रापि दक्षिणया परिक्रीतऋत्विगानतिं भावयेदितिज्ञायते । अतश्चेयं दक्षिणा परिक्रयार्थैवेति पूर्वपक्षः ।

यद्यपि दक्षिणा परिक्रयार्थैव, तथापि 'तं स द्वेष्याय दद्यात्' इत्यनेन द्वेष्यसंप्रदानकं दानं श्रूयते । ऋत्विक् च द्वेष्यो न भवति । कुतः । 'ऋत्विगाचार्यौ नातिचरितव्यौ' इति श्रवणात् । तस्मादिदं द्वेष्यसंप्रदानकं दानमदृष्टार्थमेव । न तु परिक्रीतार्थमिति सिद्धान्तः ।

द्वेष्यसंप्रदानकदानस्यादृष्टार्थत्वे सिद्धे, तदुपोब्दलकतया युक्त्यन्तरं दर्शय[1]न्भाष्यकार एवं वदति । यदीयं दक्षिणा परिक्रयार्था स्यात्तदा चोदकप्राप्तदक्षिणाबाधः स्यात् । अर्थात्पत्नीसंयाजेष्वन्वाहार्यदक्षिणायाः चोदकप्राप्तत्वादतिदेशेन चैकहायनगोदक्षिणायाः प्राप्तत्वाद्द्वयोर्मध्य एका दक्षिणाऽपनीयेत । अथवा नैमित्तिकैककहायनगोदक्षिणया चोदकप्राप्तान्वाहार्यदक्षिणा बाध्येत । एवं च चोदको बाध्येत । तस्मादिदं दानं परिक्रीतार्थं न भवति, किन्तु धर्मार्थमेवेति ।

अत्र [2]वार्तिककारः–

'यदीयं दक्षिणा परिक्रयार्था स्यात्तदा चोदकप्राप्तान्वाहार्यदक्षिणा बाध्येत अर्थाच्चोदको बाध्येत' इति यदुक्तं भाष्यकारेण तदयुक्तम् । कुतः । नैमित्तिकद्वादशकपालेष्टौ चोदकेनान्वाहार्यदक्षिणैव न प्राप्नोति । पत्नीसंयाजानां पूर्वमेवान्वाहार्यो दत्तः । अतश्च प्राकृतान्वाहार्यदक्षिणयैव प्रसङ्गादुपकारात्पुनरन्वाहार्यदक्षिणैव न प्राप्नोति । अतश्च

1. श्री जै. मी. द. (प. भा.) P. 1846
2. Ibid P. 1846

चो॰.क्न प्राप्तेरेवाभावाच्चोदकबाध एव नास्ति । तस्माद्यदीयं परिक्रयार्था स्यात्तदा चोदकप्राप्तान्वाहार्यदक्षिणा बाध्येतेति यदुक्तं भाष्यकारेण तदयुक्तम् ।

अस्मिन्नधिकरणे [1]पार्थसारथिमिश्रैः, 'तं स द्वेष्याय दद्यात्' इत्यत्र द्वेष्यसंप्रदानकदानस्य श्रवणाद्द्वेष्यायैव गौर्दद्यात् । यद्यपि 'गौर्दक्षिणा' इत्यत्र दक्षिणाशब्दः श्रूयते, तथापि दक्षिणाशब्दोऽगत्या दानमात्रे प्रयोक्तव्य इत्येवमेव विचारः कृतः, न तु चोदकबाधविषये ।

[2]माधवाचार्यैस्तु द्वेष्यस्य ऋत्विक्त्वाभान्न क्रयमर्हति । अतश्चेदं दानमदृष्टार्थमेवेति प्रतिपादितम् । न तु चोदकबाधोऽस्ति नवेति ।

[3]खण्डदेवेन तावदन्वाहार्यदक्षिणायाः पुनः प्राप्तेरेवाभावादुभयविशिष्टं दानान्तरमेवेदमदृष्टार्थमिति भाट्टमतानुसारेणैव प्रतिपादितम् ।

द्वेष्यसंप्रदानकदाने चोदकेन दक्षिणाया एव प्राप्तत्वात् 'यदीयं दक्षिणा परिक्रयार्था स्यात्तदा चोदको बाध्येत' इति भाष्यकारपक्षोऽयुक्त एव । अतश्चात्र चोदकबाध एव नास्तीति वार्तिककारपक्षोऽभ्युपेय एव । अस्मिन्नधिकरणे खण्डदेवेनैकेनैव भाट्टमतमाश्रित्य प्रतिपादितम् । पार्थसारथिमिश्रैः, माधवाचार्यैश्च न कस्यापि पक्षेण प्रतिपादितम् ।

x x x

---

1. शा. दी. P. 669
2. जै. न्या. वि. P. 537
3. पू. मी. द. P.P. 226-227

4)

१२. षोडशिनो ज्योतिष्टोमाङ्गत्वाधिकरणम्

(१०-५-९)

षोडशिनो वैकृतत्वं तत्र कृत्स्नविधानात् ।३४। प्रकृतौ चाभावदर्शनात् ।३५। अयज्ञवचनाच्च ।३६। प्रकृतौ वा शिष्टत्वात् ।३७। प्रकृतिदर्शनाच्च ।३८। आम्नातं परिसंख्यार्थम् ।३९। उक्तमभावदर्शनम् ।४०। गुणादयज्ञत्वम् ।४१।

ज्योतिष्टोमे 'य एवं विद्वानेतं षोडशिनं गृह्णाति, भावयत्यात्मना पराऽस्य भ्रातृव्यो भवति' इति श्रूयते। तत्र षोडशिनमधिकृत्य विचार्यते। प्रकृतौ ज्योतिष्टोमे षोडशिनो निवेशः, उत विकृतौ वेति संशयः। तत्र यद्यपि षोडशी प्रकृतौ श्रूयते, तथापि 'मध्यमेऽहंस्त्रिरात्रस्य गृह्यते' इति वचनात्प्रकरणाच्छोडशिन उत्कर्षो भवति। प्रकरणाद्वाक्यस्य बलीयस्त्वादिति पूर्वपक्षः।

यद्यपि प्रकरणाद्वाक्यस्य बलीयस्त्वमस्ति, तथापि षोडशिनः प्रकृतावेव निवेशः। कुतः। वचनात्पूर्वमेव षोडशिनः ज्योतिष्टोमेन सहैकवाक्यता सिद्धैव। अतश्च ज्योतिष्टोमप्रकरण एव षोडशिनो निवेश इति सिद्धान्तः।

प्रकृतावेव षोडशिनो निवेश इत्यत्र युक्त्यन्तरं दर्शयन् [1]भाष्यकार एवं वदति। यद्यपि 'मध्यमेऽहंस्त्रिरात्रस्य गृह्यते' इत्यदि वचनं श्रूयते,

---

1. श्री. जै. मी. द. (ष. भा) P. 1959

तथापि नहीदं वचनं प्रकृतौ प्रतिषेधकम् । किं तर्हि । विकृतावुपदेशकम् । ननु कथं प्रकृतौ षोडशी भवति । उच्यते । शिष्टाप्रतिषिद्धत्वात् । तस्मात्प्राकृतः षोडशी ।

अत्र [1]वार्तिककारः–

'नहीदं वचनं प्रकृतौ प्रतिषेधकम् । किं तर्हि । विकृतावुपदेशकम्' इति यद्भाष्यकारेणोक्तं तदयुक्तम् । कुतः । 'ऐन्द्र्या गार्हपत्यमुपतिष्ठते' इत्यत्र मन्त्रस्य यावल्लिङ्गादैन्द्र्या इन्द्रोपस्थानाङ्गत्वमवगम्यते, तावत्पूर्वमेव श्रुत्या मन्त्रस्य गार्हपत्योपस्थानाङ्गत्वमवगम्यते । लिङ्गापेक्षया श्रुतेर्बलीयस्त्वात् । अन्यथाऽत्रापि षोडशिवदेवेदं श्रुत्या गार्हपत्यसंबन्धं ब्रवीति, नेन्द्राभिधानं निवर्तयतीति स्यात् । तथाच बलाबलाधिकरणविरोधः स्यात् । कुतः । श्रुत्यपेक्षया लिङ्गस्य दुर्बलत्वात् । 'तस्मात् नहीदं वचनं प्रकृतौ प्रतिषेधकम् । किं तर्हि । विकृतावुपदेशकम्' इति यद्भाष्यकारेणोक्तं तदयुक्तम् ।

अस्मिन्नधिकरणे [2]पार्थसारथिमिश्रैः, [3]माधवाचार्यैः, [4]खण्डदेवेन च प्रकृतावेव षोडशिनो निवेश इत्येतदेव प्रतिपादितम् । न तु भाष्यकारोक्तरीया ।

'नहीदं वचनं प्रकृतौ प्रतिषेधकम् । किं तर्हि । विकृतावुपदेशकम्' इति भाष्यकारोक्तपक्षोऽयुक्त एव । अन्यथा 'ऐन्द्र्या गार्हपत्यमुपतिष्ठते' इत्यत्रापि षोडशिवदेव स्यादिति वार्तिककारपक्षो युक्त एव भवति । अस्मिन्नधिकरणे पार्थसारथिमिश्रैः, माधवाचार्यैः, खण्डदेवेन च न भाष्यकारस्य, न वा वार्तिककारस्य वा पक्षः स्वीकृतः ।

x x x

---

1. श्री. जै. मी. द. (ष. भा) P.P. 1959-1960
2. शा. दी. P 723
3. जै. न्या. वि. P. 587
4. पू. मी. द. (च. भा) P.P. 12-14

१३. दर्शपूर्णमासादिष्वाग्नेयादीनां समुच्चितानामेकस्वर्गफलकत्वाधिकरणम्

(११-१-१)

प्रयोजनाभिसंबन्धात्पृथक्सतां ततः स्यादैककर्म्यमेक-शब्दाभिसंयोगात् ।१। शेषवद्वा प्रयोजनं प्रतिकर्म विभज्येत ।२। अविधानात्तु नैवं स्यात् ।३। शेषस्य हि परार्थत्वाद्विधानात्प्रतिप्रधानभावः स्यात् ।४।

दशमेऽध्याये बाधनिरुपणं कृत्वा, अस्मिन्नेकादशे तन्त्रविचारः क्रियते । यत्र यत्सकृत्कृतं बहूनामुपकरोति तत्तन्त्रमित्युच्यते ।

अत्र दर्शपूर्णमासयोः प्रधानाऽऽग्नेयादिषु विचार्यते । 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यत्र श्रुतं स्वर्गरूपं फलं किमाग्नेयादीनां षण्णां यागानां भेदेन भवति, उत तन्त्रेण वेति संशयः । तत्राऽऽग्नेयादीनां पृथक्फलार्थत्वात्फलमपि भेदेनैव भवति । अतश्चाऽऽग्नेयादीनां फलभेद इति पूर्वपक्षः ।

दर्शपूर्णमासयोराग्नेयादीनां भेदेनैव फलमिति पूर्वपक्षे प्राप्ते, तन्त्रेणैव फलमिति प्रतिपादयन् [1]भाष्यकार एवमाह । 'दर्शपूर्णमासाभ्याम्' इत्यत्र दर्शपूर्णमासशब्द आग्नेयादीनां षण्णां यागानां समुदायस्य वाचकः । अतश्च दर्शपूर्णमासशब्दस्याऽऽग्नेयादि षड्यागसमुदायवाचकत्वाद् 'दर्शपूर्ण-

---

1. श्री. जै. मी. द. (ष. भा) P.P. 2098-2100

मासाभ्यां स्वर्गकामो यजेत' इत्यनेन फलसंबन्धोऽपि षण्णामवगम्यत एव । तस्म‍ात्‌ एकमेव स्वर्गाख्यं फलं षण्णां यागानां भवत्येव । अतश्चाऽऽग्नेयादीनां यागानां तन्त्रेणैव फलमिति सिद्धान्तः ।

अत्र [1]वार्तिककारः–

दर्शपूर्णमासशब्द आग्नेयादियागसमुदायवाचक इति यद्भाष्यकारेणोक्तं तदयुक्तम् । कुतः । लोके तावत्सर्वत्रापि समुदायः, द्रव्यं, देवता, क्रिया वा भवति । अतश्चात्रापि तथैव भवितव्यम् । किन्त्वत्र द्रव्य-देवताद्यभावान्नसमुदायोऽस्ति । अपितु 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यत्र दर्शपूर्णमासयोर्यागसंबन्धावगमात् । गुणत्वे च याग-सामानाधिकरण्यं न स्यात् । दर्शपूर्णमासो याग इति सामानाधिकरण्यं श्रूयते । तस्माद्द्रव्यदेवताद्यभावाद्गुणत्वाभावाच्च न दर्शपूर्णमासशब्द आग्नेयादियागसमुदायवाचकः, अपितु समुदायिवाचक एव । एवंच दर्शपूर्णमासशब्द आग्नेयादिषड्यागसमुदायवाचक इति यद्भाष्याकरेणोक्तं तदयुक्तम् ।

अत्र [2]पार्थसारथिमिश्रैः, [3]माधवाचार्यैः, [4]खडदेवेन चैवं प्रतिपादि-तम् । स्वर्गार्थिनं पुरुषं प्रत्याग्नेयादीनि प्रवर्तन्ते । आग्नेयादीनां संहृत्य-कार्यकारित्वे च फलापेक्षा निवृत्ता भवत्येव । तथाचाऽग्नेयादयः षड्यागा-स्संभूय स्वर्गमुत्पादयन्ति । अतश्च तन्त्रेणैव फलं भवति । अत्र तैर्दर्श-पूर्णमासशब्दस्य समुदायवाचकत्वमुत समुदायिवाचकत्वं वेति विचारः न कृतः ।

समुदायः द्रव्यं, देवता, क्रिया वा भवति । दर्शपूर्णमासशब्दश्च

---

1. श्री. जै. मी. द. (ष. भा) P. 2103
2. शा. दी. P. 795
3. जै. न्या. वि. P. 646-647
4. पू. मी. द. (च. भा) P.P. 130—131

न द्रव्यं, देवता क्रिया वा भवति। अतश्च दर्शपूर्णमासशब्दो यागसमुदायवाचक इति भाष्यकारोक्तपक्षोऽयुक्त एव। अतश्च दर्शपूर्णमासशब्द, आग्नेयादियागसमुदायिवाचक इति वार्तिककारपक्षो युक्त एव। अस्मिन्नधिकरणे पार्थसारथिमिश्रैः, माधवाचार्यैः, खण्डदेवेन च न भाष्यकारस्य न वा वार्तिककारस्य वा पक्षः स्वीकृतः।

x x x

१४. अङ्गानां प्रधानोपकाररूपैककार्यार्थत्वाधिकरणम्

(११-१-२)

अङ्गानां तु शब्दभेदात्क्रतुवत्स्यात्फलान्यत्वम् ।५। अर्थभेदस्तु तत्रार्थे ह्यैकार्थ्यादैककर्म्यम् ।६। शब्दभेदन्नेति चेत् ।७। कर्मार्थत्वात्प्रयोगे ताच्छब्द्यं स्यात्तदर्थत्वात् ।८। कर्तृविधेर्नानार्थत्वादगुणप्रधानेषु ।९। आरम्भस्य शब्दपूर्वत्वात् ।१०।

दर्शपूर्णमासान्तर्गतसमिधाद्यङ्गेषु विचारः क्रियते। तत्र किं प्रधानदर्शपूर्णमासं प्रत्यङ्गानि संभूय कार्यं कुर्वन्त्युत भेदेन वा। अतश्च किं समिधाद्यङ्गानां प्रत्येकं फलमुत एकमेवेति संशयः। तत्र 'समिधो यजति, तनूनपातं यजति' इत्यादि पृथक्चोदनाशब्दभेददर्शनात्फलमपि भेदेनैव भवति। अतश्च समिधाद्यङ्गानां भेदेनैव फलमिति पूर्वपक्षः।

क्रतुष्वेव फलभेदो युक्तः, नाङ्गेषु। अङ्गानान्तु प्रधानोपकाररूपैकार्थकत्वात्फलमप्येकमेव भवति। नन्वेकार्थत्वादेषां विकल्पः। न। यद्यप्यङ्गानामेकार्थकत्वमस्ति, तथापि खलेकपोतन्यायेन धर्माकाङ्क्षायां

सर्वाण्यङ्गानि सकृदेव प्राप्नुवन्ति । अतश्च नैषां विकल्पः संभवति । तस्मात्सर्वेषामप्यङ्गानां संभूय कार्यकारित्वादेकमेव फलमङ्गानामिति सिद्धान्तः ।

चोदनाभेदादङ्गानामप्यर्थभेद इति पूर्वपक्ष खण्डनाय [1]भाष्यकार एवं वदति । न हि केवलचोदनाभेदेनाङ्गानामर्थभेदो भवति । नात्र समिधादिभिर्वाक्यैरङ्गानां प्रयोग उच्यते । दर्शपूर्णमासवाक्येनैव प्रधानस्य यागस्य प्रयोगः, कथंभावाकाङ्क्षानिवर्तकत्वेन चाङ्गानां प्रयोग उच्यते । अतश्च समिधादिवाक्यानामङ्गप्रयोगबोधकत्वाभावान्नाङ्गानां फलभेदो भवति । यदि समिधादि वाक्यैः, 'समिद्यजिः प्रयोक्तव्यः, तनूनपाद्यजिः प्रयोगक्तव्यः' इत्येवमङ्गानां प्रयोग उच्येत, ततः प्रयोजनाकाङ्क्षा स्यात् । प्रयोजनाकङ्क्षायां च भेदेनेव फलं स्यात् । समिधादिवाक्यैस्तावदेवं-लक्षणको याग इति रूपमात्रमेवोच्यते । तस्मात्पृथक्चोदितानामपि समिधादिवाक्यानामङ्गप्रयोगबोधकत्वाभावात्प्रधानोपकाररूपैकार्थकत्वाच्चै-कमेव फलमङ्गानाम् ।

अत्र [2]वार्तिककारः–

यदुक्तं भाष्यकारेण 'यदि समिधादिभिर्वाक्यैरङ्गानां प्रयोग उच्यते, समिद्यजिः प्रयोक्तव्यः' इति तदयुक्तम् । कुतः । यदि समिद्यागो भवतीति केवलसत्तामत्रमेवोच्येत, तदा आकाङ्क्षाभावाद्दर्शपूर्णमासाङ्ग-त्वमेव न स्यात् । तथा च प्रकरणसंबन्धोऽपि न स्यात् । यदि 'समिद्यागो भावयेत्' इत्युच्येत, तदा केनेति करणाकाङ्क्षा निवर्तते । दर्शपूर्णमा-सयोश्च कथंभावाकाङ्क्षा निवर्तते । अतश्चोभयाकाङ्क्षाया निवृत्तत्वेन प्रकरणसंबन्धात्समिधादीनां दर्शपूर्णमासाङ्गत्वमपि स्यात् । यदि विधा-यको न भवति, तदाऽर्थवादादिना कल्प्यः । तस्मात्समिधादिवाक्येषु

---

1. श्री. जै. मी. द. (ष. भा) P. 2105
2. Ibid P.P 2104-2105

यदि समिद्यजि: प्रयोक्तव्य इति केवल सत्तामात्रमेवोच्येत, तदा समिधादीनामङ्गत्वाद्यसंभवात्, 'यदि समिधादि भिर्वाक्यैरङ्गादां प्रय ग उच्येत, समिद्यजि: प्रयोक्तव्य:' इति यदुक्तं भाष्यकारेण तदयुक्तम् ।

अस्मिन्नधिकरणे [1]पार्थसारथिमिश्रैः, [2]माधवाचार्यैः, [3]खण्डदेवेन च दर्शपूर्णमासादियागेषु प्रयाजादीनामङ्गानां प्रधानोपकाररूपैकार्थकत्वात्फलमप्येकमेवेति सिद्धान्तः कृतः । न तु भाष्यकारोक्तरीत्या ।

यदि समिधादिवाक्यैरङ्गानां प्रयोग उच्येत, तदा प्रयाजादीनामङ्गत्वं न स्यात् । तस्माद्भाष्यकारपक्षोऽयुक्त एव । अतश्च समिधादिभिर्वाक्यैरङ्गानां प्रयोगो नोच्यत इति वार्तिककारपक्षो युक्त एव । अस्मिन्नधिकरणे पार्थसारथिमिश्रैः, माधवाचार्यैः, खण्डदेवेन च न भाष्यकारस्य न वा वार्तिककारस्य वा पक्षः स्वीकृतः ।

x x x

१५. द्वादशाहे-उपसत्कालीनसुब्रह्मण्या ह्वाने विवृद्धसुत्याहानुपलक्षणाधिकरणम् ।

(११-४-७)

सुत्या[1]विवृद्धौ सुब्रह्मण्यायां सर्वेषामुपलक्षणं प्रकृत्यन्वयादावाहनवत् ।२७। अपि वेन्द्राभिधानत्वात्सकृत्स्यादुपलक्षणं कालस्य लक्षणार्थत्वात् ।२८। अविभागाच्च ।२९।

1. शा. दी. P.P. 795-797
2. जै. न्या. वि. P. 647
3. पू. मी. द. (च. भा) P.P. 133-135

प्रकृतावुपसत्काले यत्सुब्रह्मण्याऽऽह्वानं श्रुतं तच्चोदकेन द्वादशाह प्राप्नोति। तत्र च सुत्याह्नामूहोऽस्ति नवेति विचार्यते। किं द्वादशाहे सुत्याहान्युपलक्षयितव्यानि, उताविकारेणैव प्रयोक्तव्यानीति संशयः। तत्र प्रकृतौ सौत्यमहरूपलक्षितम्। अतश्चात्राप्यूहः कर्तव्य एव। तथाच 'हे इन्द्र! त्वं द्वादशाहे सुत्यामागच्छ, त्रयोदशाहे सुत्यामागच्छ' इत्यूहः कर्तव्य एवेति पूर्वपक्षः।

अत्र [1]भाष्यकारः–

नात्राहश्शब्दः सर्वेषामुपलक्षको भवति। कुतः। इन्द्राभिधानत्वात्। सर्वेषामुपलक्षणत्वे न इन्द्र एवात्र संस्क्रियते। स च सकृत्संस्कृतः संस्कृत एव भवति। न पुनः संस्कर्तव्यः। अतश्चोहो न कर्तव्यः। अन्यथा 'इन्द्र आगच्छ, चतुरहे आगच्छ' इति वाक्यभेदः स्यात्। एवमेव 'इन्द्र आगच्छ, तत्सुत्यायामागच्छ' इत्यत्रापि। अतश्च सकृदुच्चरित 'आगच्छति' शब्दस्य संबन्धद्वयप्रतिपादकत्वाभावात्केवलेन्द्रशब्दस्यैवोपलक्षितत्वात्प्रकृतिवदेवोहो नैव कर्तव्य इति।

अत्र [2]वार्तिककारः–

वाक्यभेदभयादूहो नास्तीति यदुक्तं भाष्यकारेण तदयुक्तम्। कुतः। यदीदृशेऽपि वाक्यभेदो भवति, तदा 'व्रीहीन्प्रोक्षति' इत्यत्रापि 'प्रोक्षणं कर्तव्यं, तच्च व्रीहीणाम्' इति वाक्यभेदः स्यात्। यदि 'चतुरहे' इत्यादीनामप्यविवक्षितत्वं स्यात्तदा 'चतुरहे' इत्यादीनामनर्थकत्वं स्यात्। तथाच 'सुत्यामागच्छ' इत्येवमेव प्रयोगे क्रियमाणेऽत्र विचारस्यावसरएव न भवति। तस्मादत्रैवं वक्तव्यं भवति। यद्यपि लोके 'इति' शब्दस्य प्रकारवाचकत्वमस्ति, तथापि 'इत्यहे' इत्यत्र श्रुतेतिशब्दस्याहःशब्दसामा-

1. श्री जै. मी. द. (ष. भा.) P.P. 2203-2204
2. Ibid. P.P. 2204-2205

नाधिकरण्यान्न प्रकारवाचकत्वम्, अपित्वियत्तावाचकत्वमेव । तथाच तत्रेयत्तापरिमाणस्याश्रुतत्वात् 'चतुरहे' इति प्रकृतावध्याह्रियते । एवमेव द्वादशाहेऽपि । अहःशब्दसुत्याशब्दयोस्त्वागमनक्रियाविशेषणार्थत्वेनान्वयः । एवंच प्रकृतिवदेवाध्याहारे संभवति, नैव कर्तव्य ऊहः । तस्मादनेन प्रकारेणोहाभावे सिद्धे, वाक्यभेदभयादूहो नस्तीति यद्भाष्यकारेणोक्तं तदयुक्तम् ।

[1]पार्थसारथिमिश्रैरुपसत्कालीनसुब्रह्मण्याऽऽह्वानस्याविकारेणैवप्र – योगः कर्तव्य इत्येवमेव प्रतिपादितः ।

[2]माधवाचार्यैस्तु भाष्यकारमतमनुसृत्यैव वाक्यभेदभयादूहो नास्तीति प्रतिपादितम् ।

[3]खण्डदेवस्तूहमेवाङ्गीकरोत्यस्मिन्नधिकरणे । चतुरहाधिकरणकसुत्योद्देश्यकाऽऽगमनप्रकाशनेनेन्द्रे द्वादशाहीयसुत्यासंबन्धबोधानुपपत्तेः प्रयोजनानुरोधेनोहः कर्तव्य एवेति ।

यदि सुब्रह्मण्याह्वाने वाक्यभेदः स्यात्तदा 'व्रीहीन् प्रोक्षति' इत्यत्रापि वाक्यभेद. स्यात् । अतश्च वाक्यभेदभयात्सुब्रह्मण्याऽऽह्वाने, ऊहो नास्तीति भाष्यकारपक्षोऽयुक्त एव । अतश्च 'चतुरहे' इत्यस्याध्याहारे संभवति नैवोहः कर्तव्य इति वार्तिककारपक्ष एव युक्तो भवति । अस्मिन्नधिकरणे सिद्धान्ते पार्थसारथिमिश्रैः, न भाष्यकारस्य, न वा वार्तिककारस्य वा मतेन प्रतिपादितम् । माधवाचार्यैस्तु भाष्यकारमतानुसारेण प्रतिपादितम् । खण्डदेवेन तावद्भिन्न एव सिद्धान्तः कृतः ।

x x x

---

1. शा. दी. P.P. 835-836
2. जै. न्या. वि. P. 678
3. पू. मी. द. (च. भा) P.P. 203-205

१६. सोमाङ्गेष्टिपशवादिषु दार्शिकाग्न्यन्वाधान-प्रसङ्गस्याऽऽक्षेपसमाधानाधिकरणम्

(१२-१-१२)

ग्रहार्थं च पूर्वमिष्टेस्तदर्थत्वात् ।२४। शेषवदिति चेत् ।२५। न वैश्वदेवो हि ।२६। स्याद्वा व्यपदेशात् ।२७। न गुणार्थत्वात् ।२८।

सौमिकमग्न्यन्वाधानं प्रसङ्गादिष्टिपशवादिष्वप्युपकरोतीति सिद्धे, तदस्मिन्नधिकरणे पुनराक्षिप्यसमादधन् [1]भाष्यकार एवं वदति। यद्यप्यग्न्यन्वाधानं धारणार्थं प्रसङ्गात्सौमिकेन सिद्ध्यति, तथापि 'ममाग्ने' इत्यादिना देवतापरिग्रहार्थत्वेन श्रूयते। अतश्च देवतापरिग्रहार्थमिष्ट्यादिषु पुनरग्न्यन्वाधानं कर्तव्यमेवेति पूर्वपक्षः।

यथा सौमिकेनैव प्रसङ्गाद्धारणार्थं भवति, एवमेव देवतापरिग्रहार्थमपि। कथम्। सोमेऽपि आग्नावैष्णवमेकादशकपालं निर्वपेद्दीक्षिष्यमाणः। अग्निः प्रथमो देवतानां विष्णुः' इत्यादिना दीक्षणीयेष्टेर्देवतापरिग्रहार्थत्वेन श्रूयते। अतश्च सौमिकेनैव, तदङ्गभूतेष्टिपशवादिष्वपि प्रसङ्गादुपकारः सिद्ध्यत्येव। तस्मात्सोमाङ्गभूतेष्टिपशवादिषु न पुनरग्न्यन्वाधानं कर्तव्यमिति सिद्धान्तः।

अत्र [2]वार्तिककारः–

---

1. श्री जै. मी. द. (ष. भा.) P.P. 2230-2231
2. Ibid P. 2231

सोमे दीक्षणीयेष्टिर्देवतापरिग्रहार्थेति यदुक्तं भाष्यकारेण तदयुक्तम् । कुतः । 'आग्नावैष्णवमेकादशकपालं निर्वपेद्दीक्षिष्यमाणः' इत्यनेन भविष्यद्दीक्षाकर्तृपुरुषस्य संस्कारो विधीयते । 'सर्वाश्चैता देवताः परिगृह्णति' इत्यर्थवादश्चाऽऽग्नावैष्णवस्तुत्यर्थ एव । तथा च पुरुषसंस्कारकत्वेन श्रुताया दीक्षणीयाया देवतापरिग्रहार्थत्वाभावाद्वाक्य-भेदः स्यात्, द्विरदृष्टकल्पना च स्यात् । तस्माद्दीक्षणीयाया देवतापरि-ग्रहार्थत्वाभावाद्, दीक्षणीयेष्टिर्देवतापरिग्रहार्थेति यदुक्तं भाष्यकारेण तदयुक्तम् ।

अस्मिन्नधिकरणे [1]पार्थसारथिमिश्रैः, [2]माधवाचार्यैः, [3]खण्डदेवेन च भाष्यकारमतानुसारेण, सोमे दीक्षणीयेष्टेर्देवतापरिग्रहार्थत्वेन श्रुतत्वात्तेनैव तदङ्गभूतेष्टिपश्वादिष्वपि प्रसङ्गादुपकारे सिद्धे, न पुनरग्न्यवाधानं देवता परिग्रहार्थं क्रियत इति प्रतिपादितम् ।

दीक्षणीयेष्टेः पुरुषसंस्कारकत्वेन श्रूयमाणत्वाद् 'दीक्षणीयेष्टिर्देव-तापरिग्रहार्था' इति भाष्यकारपक्षोऽयुक्त एव । अन्यथा वाक्यभेदः, द्विरदृष्टकल्पना च स्यात् । अतश्च वार्तिककार पक्षो युक्त एव ।

अस्मिन्नधिकरणे पार्थसारथिमिश्रैः, माधवाचार्यैः, खण्डदेवेन च भाष्यकारमतनुसारेणैव प्रतिपादितम् ।

x x x

1. शा. दी. P.P. 852-853
2. जै. न्या. वि. P.P. 690-691
3. पू. मी. द. (च. भा) P.P. 233-234

१७. काम्येन भ्राष्ट्राद्यग्निना नित्यस्योख्याग्ने-विकाराधिकरणम्

(१२-४-७)

उखायां काम्यनित्यसमुच्चयो नियोगे कामदर्शनात् ।१७। असति चासंस्कृतेषु कर्म स्यात् ।१८। तस्य च देवतार्थत्वात् ।१९। विकारो वा तदुक्तहेतुः ।२०। वचनादसंस्कृतेषु कर्म स्यात् ।२१। संसर्गे चापि दोषः स्यात् ।२२। वचनादिति चेत् ।२३। तथेतरस्मिन् ।२४। उत्सर्गेऽपि कर्मणः कृतत्वात् ।२५।

अग्नावुख्यं प्रकृत्य 'वृक्षाग्राज्ज्वलतो ब्रह्मवर्चसकामस्याऽऽहुत्यावदध्यात्, भ्राष्ट्रादन्नाद्यकामस्य' वैद्युताद्वृष्टिकामस्य, इति श्रूयते । तत्र काम्यनित्याग्न्योर्विषये विचार्यते । किं काम्यस्य नित्यस्य वाऽग्नेः समुच्चयः, अथवा काम्येन नित्यस्य निवृत्तिरिति संशयः । काम्यनित्याग्न्योः समुच्चये च सर्वाङ्गोपसंहारात्प्रयोगवचनमनुग्रहीष्यते । तस्मात्समुच्चय इति पूर्वपक्षः ।

'यदाहवनीये जुहोति' इतीदं सामान्यशास्त्रम् । 'वृष्टिकामो वैद्युतात्' इतीदं विशेषशास्त्रम् । सामान्यशास्त्रस्य चान्यत्रवृत्तिसंभवात्सावकाशत्वमस्त्येव । विशेषशास्त्रस्य चान्यत्र वृत्त्यभावान्निरवकाशत्वमेव । अतश्च निरवकाशेन विशेषशास्त्रेण सावकाशस्य सामान्यशास्त्रस्य बाधो युक्त एव । तस्मात्समुच्चयाभावात्काम्येन नित्यो निवर्तत इति सिद्धान्तः ।

अत्र [1]भाष्यकारः–

स्वाश्रयेष्वव्यावृत्तविषयस्य सामान्यस्य ततोऽन्यत्रापि वृत्तिसंभवात्, विशेषस्य च वृत्त्यभावे, उपदेशवैयर्थ्यं स्यात् । अतश्च शास्त्रानुग्रहाय सामान्यं विशेषेण बाध्यत एवेति ।

अत्र [2]वार्तिककारः–

उपदेशवैयर्थ्यपरिहारार्थं भाष्यकारेण यदुक्तं 'विशेषेण सामान्यं बाध्यत' इति तदयुक्तम् । कुतः । शास्त्रानुग्रहः कार्य इति नास्ति चोदना ।

अन्यथा 'ब्राह्मणेभ्यो दधि दीयताम्, तक्रं कौण्डिन्याय' इत्यत्र कौण्डिन्येऽन्यत्र च दधिदाने कृत एव शास्त्रमनुगृहीतं स्यात् । तत्तु नेष्यते । अतश्च [3]प्रथमाध्याये य एव नित्यनैमित्तिकयोर्बाधो वर्णितस्स एवात्र परिग्रहीतव्यः ।

> 'पुरुषार्थसमासत्तेः काम्यं नित्यस्य बाधकम् ।
> विशेषतश्च सामान्ये पूर्वप्राप्ते प्रवर्तनात्' । इति ।

अतश्च पुरुषार्थसिद्ध्यर्थो हि सर्वः प्रयास इति तत्प्रत्यासन्नं वस्तु बलीयो भवति । अतश्च विशेषेण सामान्यस्य बाधाभावात्तत्र सामान्यतः बाध इति व्यवहारः क्रियते । न तु सामान्यं बाध्यते । एवंच सामान्यशास्त्रं विशेषेण बाध्यत इति यदुक्तं भाष्यकारेण तदयुक्तम् ।

---

1. श्री. जै. मी. द. (ष. भा) P. 2280
2. Ibid. P. 2280
3. Ibid (प्र. भा) P. 352

अत्र [1]पार्थसारथिमिश्रैः वार्तिककारमतानुसारेण काम्येन नित्यस्य निवृत्तिरिति प्रतिपादितम्, न तु बाध इति ।

[2]माधवाचार्यैस्तु यद्यपि नित्यकाम्ययोर्व्यवस्थया विकल्पः प्रतिपादितः, तथापि काम्यस्थले काम्येन नित्यस्य बाध इति भाष्यकारमतानुसारेण प्रतिपादितम् ।

[3]खण्डदेवेन तावत्काम्येन नित्यस्य निवृत्तावपि प्रसङ्गसिद्धे, नित्यस्य बाध विषयत्वमेवेति प्रतिपादितं भाष्यकारमतानुसारेण ।

शास्त्रानुग्रहः कार्यं इति चोदनाभावादुपदेशवैयर्थ्यपरिहारार्थं सामन्यं विशेषेण बाध्यत इति भाष्यकार पक्षोऽयुक्त एव । अतश्चात्र सामान्यतः बाध इति व्यवहार एव, 'न तु सामान्यं बाध्यत' इति वार्तिककारपक्षो युक्त एव । अत्र पार्थसारथिमिश्रैः, भाट्टमतानुसारेण, माधवाचार्यैः, खण्डदेवेन च भाष्यकारमतानुसारेण प्रतिपादितम् ।

X X X

---

1. शा. दी. P. 880
2. जै. न्या. वि. P.P. 713-714
3. पू. मी. द. (च. भा) P. 277

द्वितीयभागः

सिद्धान्तोपर्याक्षिपखण्डनम्

१८. एकस्मिन्प्रयोगे प्रयाजाद्यङ्गस्य सकृदनुष्ठानाधिकरणम् ।

(११-१-७)

क्रतुवद्वाऽनुमानेनाभ्यासे फलभूमा स्यात् ।२९। सकृद्वा कारणैकत्वात् ।३०। परिमाणं चानियमेन स्यात् ।३१। फलस्याऽऽरम्भनिर्वृत्तेः क्रतुषु स्यात्फलान्यत्वम् ।३२। अर्थवांस्तु नैकत्वादभ्यासः स्यादनर्थको यथा भोजनमेकस्मिन्नर्थस्यापरिमाणत्वात्प्रधाने च क्रियार्थत्वादनियमः स्यात् ।३३। पृथक्त्वाद्विधितः परिमाणं स्यात् ।३४। अनभ्यासो वा प्रयोगवचनैकत्वात्सर्वस्य युगपच्छास्त्रादफलत्वाच्च कर्मणः स्यात्क्रियार्थत्वात् ।३५। अभ्यासो वा छेदनसंमार्गावदानेषु वचनात्सकृत्त्वस्य ।३६। अनभ्यासस्तु वाच्यत्वात् ।३७।

अस्मिन्नधिकरणे 'समिधो यजति' इत्यादीनि प्रयाजान्युदाहृत्य विचार्यते । किमेकस्मिन्प्रयोगे प्रयाजाद्यङ्गानां सकृत्प्रयोगः, उताभ्यास इति संशयः । अङ्गाभ्यासे चाधिकं फलं भवति । अतश्च प्रयाजाद्यङ्गानामभ्यास इति पूर्वपक्षः ।

अङ्गाभ्यासे च फलभूमेति नास्ति शास्त्रम् । सकृदङ्गानुष्ठानेनैवोपकारकाकाङ्क्षाया निवृत्तत्वात्पुनरङ्गाननुष्ठानमेव । ननु सकृद-

ङ्गानुष्ठानेनैव कदाचित्प्रधानोपकारो न स्यात्। उच्यते। यदा च सकृदङ्गानुष्ठानेनैवोपकारो न सिद्ध्यति, तदाऽङ्गाभ्यासेऽप्युपकारः सिद्ध्यतीत्यत्र प्रमाणाभावान्नाङ्गाभ्यसः। तस्मादेकस्मिन्प्रयोगे सकृदेव प्रयाजानुष्ठानमिति सिद्धान्तः।

एकस्मिन्प्रयोगे सकृदेवाङ्गानुष्ठानमिति सिद्धान्ते प्राप्ते, [1]भाष्यकारोऽन्यथैवमाक्षिपति। यदा च प्रयजास्तदा न प्रधानयागोऽपूर्वं वा विद्यते। अथवा यदा च प्रधानयागोऽपूर्वं वा विद्यते, तदा न प्रयाजा विद्यन्ते। अतश्च प्रयाजादीनां प्रधानोपकारकत्वाभावात्कथं प्रयाजाः प्रधानोपकारका भवेयुः। तस्मात्प्रयाजादीनां प्रधानयागंप्रत्यङ्गत्वमेव नास्ति।

अत्र [2]वार्तिककारः–

यदा च प्रयाजाः, न तदा प्रधानयजिरपूर्वं वा। यदा च यजिरपूर्वं च, न तदा प्रयाजा इति यद्भाष्यकारेणोक्तं तदयुक्तम्। कुतः। यस्मिन्नेव क्षणे स्वर्गो भवति, तस्मिन्नेव क्षणे करणस्य यागस्य भावकत्वमस्त्येव। अर्थात्स्वर्गयागयोर्भाव्यभावकाकाङ्क्षाऽस्त्येव। यस्मिन्नेव क्षणे भाव्यं स्वर्गं प्रति यागस्य करणत्वेनान्वयस्तस्मिन्नेव क्षणे करणोपकारकत्वेनेतिकर्तव्यता प्राप्यत एव। अतश्च स्वर्गयागेतिकर्तव्यतानामेककालत्वावगमाद् 'यदा च प्रयाजाः, न तदा प्रधानयजिरपूर्वं वा। यदा यजिरपूर्वं च न तदा प्रयाजाः' इति यद्भाष्यकारेणोक्तं तदयुक्तम्।

---

1. श्री जै. मी. द. (ष. भा) P. 2118
2. Ibid P.P. 2118-2119

अस्मिन्नधिकरणे [1]पार्थसारथिमिश्रैः, [2]माधवाचार्यैः, [3]खण्डदेवेन चैकस्मिन्प्रयोगेऽङ्गविधीनां सकृत्करणेन चरितार्थत्वात्क्रतोश्च पुनरङ्गावृत्त्यनाक्षेपकत्वात्सकृदेवानुष्ठानमिति प्रतिपादितम्। न तु भाष्यकारोक्तरीत्या सिद्धान्तोपर्याक्षेपः कृतः।

स्वर्गयागेतिकर्तव्यतानामेककालत्वाद् 'यदा च प्रयाजाः, न तदा प्रधानयजिः' इत्यादिः भाष्यकारोक्तपक्षोऽयुक्त एव। अतश्च स्वर्गयागेतिकर्तव्यतानामेककालत्वावगमात्प्रधानं प्रति प्रयाजादीनामङ्गत्वमस्त्येवेति वार्तिककार पक्षो युक्त एव। अस्मिन्नधिकरणे पार्थसारथिमिश्रैः, माधवाचार्यैः, खण्डदेवेन च न भाष्यकारस्य न वा वार्तिककारस्य वा पक्षो गृहीतः।

x x x

१९. सौर्यचर्वादौ वैदिक्या एवेतिकर्तव्यताया-अतिदेशाधिकरणम्

(७-४-२)

स लौकिकः स्याद्दृष्टप्रवृत्तित्वात् ।२। वचनात्तु ततोऽन्यत्वम् ।३। लिङ्गेन वा नियम्येत लिङ्गस्य तद्गुणत्वात् ।४। अपि वाऽन्यायपूर्वत्वाद्यत्रनित्यानु-वादवचनानि स्युः ।५। मिथो विप्रतिषेधाच्च गुणानां यथार्थकल्पना स्यात् ।६। भागित्वात्तु नियम्येत

1. शा. दी. P.P. 799-800
2. जै. न्या. वि. P.P. 649-550
3. पू. मी. द. (च. भा) P. 139

गुणानामभिधानत्वात्संबन्धाभिधानवद्यथा धेनुः किशोरेण ।७। उत्पत्तीनां समत्वाद्वा यथाधिकारं भावः स्यात् ।८। उत्पत्तिशेषवचनं च विप्रतिषिद्धमेकस्मिन् ।९। विध्यन्तो वा प्रकृतिवच्चोदनायां प्रवर्तेत तथा हि लिङ्गदर्शनम् ।१०। लिङ्गहेतुत्वादलिङ्गे लौकिकं स्यात् ।११। लिङ्गस्य पूर्ववत्वाच्चोदनाशब्दसामान्यादेकेनाथ निरूप्येत यथा स्थालीपुलाकेन ।१२।

अस्मिन्नधिकरणे सौर्यचर्वादावितिकर्तव्यतांशे विचार्यते । किं तत्र नियमेन वैदिकीलौकिकी वेतिकर्तव्यता भवति, उत लौकिक्येव, आहोस्विद्वैदिकी वेति संशयः । तत्र विशेषाभावाद्वैदिकी लौकिकी वेतिकर्तव्यताऽनियमेन भवतीत्येकः पक्षः । पार्वणस्थालीपाकादौ लौकिकीतिकर्तव्यतायाः दृष्टत्वादत्रापि लौकिक्येवेति द्वितीयः पक्षः ।

सौर्यचरौ 'प्रयाजे प्रयाजे कृष्णलं जुहोति' इति श्रूयमाणत्वाद्वैदिक्येवेतिकर्तव्यता कर्तव्या । अतश्च सौर्यचर्वादौ वैदिक्येवेतिकर्तव्यतेति सिद्धान्तः ।

सौर्यचर्वादौ वैदिकीतिकर्तव्यतैव कर्तव्या भवतीति सिद्धान्ते प्राप्ते, तदाक्षिपन्[1]भाष्यकारः पुनरेवं वदति । केवलदर्शपूर्णमासादिष्वेव वैदिकीतिकर्तव्यता श्रूयते । न तु सौर्यादौ । ननु प्रयाजे प्रयाजे' इत्यादिः श्रूयते । इति चेन्न । दर्शपूर्णमासयोरेव प्रयाजाः श्रूयन्ते । आयुरिष्टौ च कृष्णलहोमः । अतश्च 'प्रयाजे प्रयाजे कृष्णलं जुहोति' इत्यत्र वाक्य-

---

1. श्री जै. मी. द. (च. भा) P. 1572

भेदेन [illegible] प्रयाजाः, कृष्णलहोमश्च विधातुं शक्यते । अतश्च कृष्णल-विशिष्टप्रयाजविधानं कर्तव्यम् । न चात्र प्रयाजाः श्रूयन्ते । न । यद्यपि प्रयाजा न श्रूयन्ते तथापि 'प्रयाजे प्रयाजे' इत्यादिश्रवणात्प्रयाजा अपि कर्तव्या एव । एवं च कृष्णलविशिष्टप्रयाजविधिः प्रयाजवाक्य-स्यार्थः ।

अत्र [1]वार्तिककारः–

कृष्णलविशिष्टप्रयाजा विधीयन्त इति यद्भाष्यकारेणोक्तं तदयुक्तम् । कुतः । वीप्साऽनुपपत्तेः । कथम् । यदा ग्रामार्थो नैवावगम्यते, तदा ग्रामो ग्रामो रमणीय इति नैव प्रयोक्तुं शक्यते । एवमेव प्रयाजार्थानवगमे 'प्रयाजे प्रयाजे इति वीप्साऽनुपपद्यते । अतश्च यत्र प्रयाजा वर्तन्ते तत्रैव कृष्णलहोमो विधीयते । तथा च प्रतिप्रयाजं कृष्णलविधाने वीप्सोपपद्यत एव । एवं च कृष्णलविशिष्टप्रयाजविधाने वीप्साऽनुपपत्तेः भाष्यकारोक्तं विशिष्टविधानमयुक्तमेव भवति ।

[2]पार्थसारथिमिश्रैस्तु सौर्यादीनां वैदिककर्मत्वेन वैदिकीतिकर्तव्यतैव भवतीत्येवमेव प्रतिपादितम्, न तु वीप्सावाक्ये ।

[3]माधवाचार्यैस्त्वेवं प्रतिपादितम् । सौर्यादौ लिङ्गदर्शनाद्वैदिकीतिकर्तव्यतैव कर्तव्या भवति । कथम् । 'प्रयाजे प्रयाजे कृष्णलं जुहोति' इत्यनेन सौर्ययागविशेषे कृष्णलविधानाय सिद्धवत्प्रयाजोऽनूद्यते । अतश्च लिङ्गदर्शनाद्वैदिक्येवेतिकर्तव्यता सौर्यादाविति ज्ञायते । अत्र सिद्धवत्प्रयाजोद्देशेन कृष्णलहोमो विधीयत इत्युक्तम् । अर्थात्प्राप्त-प्रयाजोद्देशेन कृष्णलहोमविधिरिति ज्ञायते । एवंच 'प्रयाजे प्रयाजे कृष्णलं

---

1. श्री जै. मी. द. (च. भा) P.P. 1572-1573
2. शा. दी. P.P. 545-546
3. जै. न्या. वि. P. 421

जुहोति इत्यत्र वार्तिककारमतानुसारेणैव प्रयाजोद्देशेन कृष्णलहोमविधि-रिति व्याख्या कृता भवति ।

अत्र [1]खण्डदेवेन वीप्सादीनामनुपपत्तेः, प्रयाजोद्देशेनैव कृष्णल-विधानमिति वार्तिककारमतानुसारेण प्रतिपादितम् ।

'प्रयाजे प्रयाजे' इति वीप्साऽनुपपत्तेः, 'कृष्णलविशिष्टप्रयाजा विधीयन्ते' इति भाष्यकारोक्तपक्षोऽयुक्त एव । अतश्च वीप्सोपपत्तये प्रतिप्रयाजं कृष्णलविधानमिति वार्तिककारपक्षो युक्त एव । अस्मिन्न-धिकरणे माधवाचार्यैः, खण्डदेवेन वार्तिककारमतानुसारेण वीप्सावाक्ये विचारितम् । पार्थसारथिमिश्रैस्तु न भाष्यकारस्य न वा वार्तिककारस्य वा पक्षः स्वीकृतः ।

X X X

1. पू. मी. द. (द्वि. भा) P.P. 366-368

तृतीयभागः

सिद्धान्तानां खण्डनम्

२०. अष्टरात्रान्तर्गतेऽपि विश्वजिति सर्वस्व-दानाधिकरणम्

(६-७-८)

अहर्गणे च तद्धर्मा स्यात्सर्वेषामविशेषात् ।१४। द्वादशशतं वा प्रकृतिवत् ।१५। अतद्गुणत्वात्तु नैवं स्यात् ।१६। लिङ्गदर्शनाच्च ।१७।

अष्टरात्रात्मकेऽहर्गणे विश्वजित्प्रथममहः । अन्तेऽभिजित् । मध्ये षडहः । तत्र विचार्यते । अष्टरात्रान्तर्गते विश्वजिति किं सर्वस्वं दद्यादुत द्वादशशतं वेति संशयः । तत्र पूर्वपक्षसिद्धान्तयोर्विषये [1]भाष्यकार एवं वदति । प्रकृतौ ज्योतिष्टोमे द्वादशशतं दक्षिणा श्रूयते । अतश्च विश्वजित्यपि प्रकृतिवदेव द्वादशशतं दक्षिणैवेति पूर्वपक्षः ।

एकाहकाण्डपठितविश्वजितः, अहर्गणान्तर्गतविश्वजितोऽविशेषान्नामातिदेशेनाष्टरात्रान्तर्गते विश्वजिति, एकाहकाण्डपठितविश्वजिद्दक्षिणैव भवति । तत्रच सर्वस्वदानं श्रूयते । अतश्चात्रापि सर्वस्वमेव दद्यात् । अपिच 'हीयते वा एष पशुभिर्यो विश्वजिति सर्वस्वं न ददाति' इति [2]लिङ्गदर्शनादष्टरात्रान्तर्गते विश्वजित्यपि सर्वस्वदानमेवेति सिद्धान्तः ।

अत्र [3]वार्तिककारः—

---

1. श्री जै. मी. द. (चि. भा.) P. 1497
2. Ibid. P. 1498
3. Ibid. P. 1497

यदुक्तं भाष्यकारेणाष्टरात्रान्तर्गते विश्वजित्यपि नामातिदेशविधया सर्वस्वमेव दद्यादिति तदयुक्तम् । कुतः । अष्टरात्रान्तर्गते विश्वजिति न तावच्चोदकेन, न वा नामातिदेशेन धर्मप्राप्तिः । दक्षिणा-तावत्कर्त्रानतिद्वारा कृत्स्नप्रयोगाङ्गं भवति । अष्टरात्रात्मकाहर्गणस्त्वेक एव प्रयोगः । अहर्गणे च कृत्स्नप्रयोगाय प्रथममेवर्त्विजो वृताः । तथाच विश्वजितः पृथक्प्रयोगत्वाभावाद्विश्वजितोऽन्याहर्भिरविशेषात्सर्वेषामप्येकैव दक्षिणा भवेत् । अष्टरात्रे च बहूनामह्नां द्वादशाहप्रकृतिकत्वमस्त्येव । तथाच बहूनामह्नामनुग्रहो युक्तः । तस्माद्वक्ष्यमाण 'गणेषु द्वादशाहस्य' इत्यनेन [1]सूत्रेणाहर्गणे द्वादशाहिका धर्मा भवन्त्येवेति ज्ञायते । अतश्चात्रापि द्वादशाहिकद्वादशशतं दक्षिणैव प्राप्नोति, न तु सर्वस्वं दक्षिणा । एवं चाष्टरात्रान्तर्गते विश्वजिति सर्वस्वं दद्यादिति यद्भाष्यकारेणोक्तं तदयुक्तम् ।

अस्मिन्नधिकरणे भाट्टमतमाश्रित्य [2]पार्थसारथिमिश्रा एवं वदन्ति । अष्टरात्रान्तर्गते विश्वजिति नैामातिदेशविधया प्राप्तं सर्वस्वदक्षिणां बाधित्वा भूयोऽनुग्रहाय द्वादशशतं दक्षिणैव प्राप्नोति ।

अस्मिन्नधिकरणे सिद्धान्तविषये [3]माधवाचार्यैः त्रयाणां सूत्रभाष्यवार्तिककाराणां च मतमुपन्यस्तम् । तद्यथा :—

अष्टरात्रान्तर्गतोऽयं विश्वजित्स्वतन्त्र एक एव । तथाच नामातिदेशविधयैकाहकाण्डपठितविश्वजितस्सर्वस्वदक्षिणैवात्रापि भवति । तथाचाष्टरात्रान्तर्गते विश्वजिति सर्वस्वं दद्यादिति सूत्रभाष्यकाराभिप्रेतसिद्धान्तः । बहूनामह्नामनुग्रहाय विश्वजित्यपि द्वादशशतं दक्षिणैवेति

---

1. श्री. जै. मी. द. (प. भा) P. 1594
2. शा. दी. P. 513
3. जै. न्या. वि. P.P. 395-396

वार्तिककाराभिप्रेतसिद्धान्तः । इत्येवं त्रयाणामपि सिद्धान्त उपन्यस्तो माष्याचार्यैः ।

[1]खण्डदेवेन तावद्भाष्यवार्तिकमतद्वयमधिकृत्यैवं प्रतिपादितम् । 'हीयते वा एष' इत्यादि लिङ्गदर्शनाद्विश्वजिति सर्वस्वं दद्यदितीदं भाष्यकारमतम् । भूयोऽनुग्रहाय द्वादशतंतक्षि णैवेति वार्तिककारतम् ।

अष्टरात्रान्तर्गते विश्वजिति न तावच्चोदकेन न वा नामातिदेशेन वा धर्मप्राप्तिः । अतश्च नामातिदेशविधया धर्मप्राप्तिरिति भाष्यकारपक्षोऽयुक्त एव । तस्माद्द्वादशाहधर्म एवेति वार्तिककार पक्ष एव युक्तो भवति । अस्मिन्नधिकरणे पार्थसारथिमिश्रैः भाट्टमतमाश्रित्य प्रतिपादितम् । खडदेवेन भाष्यवार्तिकमतद्वयानुसारेण प्रतिपादितम् । माधवाचार्यैस्तु सूत्रभाष्यवार्तिककाराणां त्रयाणामपि मतानुसारेण प्रतिपादितम् ।

x x x

२१. पश्वादि विकृतावुपदिष्टैरेकादशप्रयाजादिभिरङ्गैः प्राकृताङ्गान्तराबाधाधिकरणम्

(१०–३–१)

विकृतौ शब्दवत्त्वात्प्रधानस्य गुणानामधिकोत्पत्तिः संनिधानात् ।१। प्रकृतिवत्त्वस्य चानुपरोधः ।२। चोदानाप्रभुत्वाच्च ।३। प्रधानं त्वङ्गसंयुक्तं तथाभूतमपूर्वं स्यात्तस्य विध्युपलक्षणात्सर्वो हि पूर्ववान्

1. पू. मी. द. (द्वि. भा) P. 321

विधिरविशेषात्प्रवर्तितः ।४। न चाङ्गविधिरनङ्गे स्यात् ।५। कर्मणश्चैकशब्द्यात्संनिधाने विधेराख्यासंयोगो गुणेन तद्विकारः स्याच्छब्दस्य विधिगामित्वाद्गुणस्य चोपदेश्यत्वात् ।६। अकार्यत्वाच्च नाम्नः ।७। तुल्या च प्रभुता गुणे ।८। सर्वमेवं प्रधानमिति चेत् ।९। तथाभूतेन संयोगाद्यथार्थविधयः स्युः ।१०। विधित्वं चाविशिष्टमेवं प्राकृतानां वैकृतैः कर्मणा योगात्तस्मात्सर्वं प्रधानार्थम् ।११। समत्वाच्च तदुत्पत्तेः संस्कारैरधिकारः स्यात् ।१२।

अग्नीषोमीये पशौ 'एकादशप्रयाजान् यजति, एकादशानुयाजान् यजति' इति श्रूयते। चातुर्मास्येषु 'नव प्रयाजान् यजति, नवानुयाजान् यजति' इति श्रूयते। वायव्यपशौ 'हिरण्यगर्भः समवर्तताग्र इत्याघारमाघारयति' इति श्रूयते। तेषु किं प्राकृतेतिकर्तव्यता प्राप्यते, उत नवेति विचार्यते। तत्राप्राप्तायां प्राकृतेतिकर्तव्यतायां किमेतानि कर्मान्तराणि, उत प्राप्तेतिकर्तव्यतायामेतेगुणविधय इति संशयः। तत्र संख्याविशिष्टधात्वर्थविधाने धात्वर्थोऽनुगृह्यते। अतश्चाग्नोषोमीयादिष्वधिकानां गुण कर्मणामुत्पत्तेः श्रूयमाणत्वात् 'यजति, आघारमाघारयति' इत्येवमादीनि कर्मान्तराण्येव। तथा च प्राकृतेतिकर्तव्यता न प्राप्यत इति पूर्वपक्षः।

एवंच प्राकृतेतिकर्तव्यताया अप्राप्तत्वात्कर्मान्तराणीमानीति पूर्वपक्षे प्राप्ते [1]भाष्यकार एवं वदति। 'विध्यन्तो वा प्रकृतिवच्चोदनायां प्रवर्तते तथाहि लिङ्गदर्शनम्' [2]इत्यत्र सर्वो वैकृतो विधिः प्रकृतिपूर्वक

1. श्री. जै. मी. द. (प. भा) P. 1865
2. Ibid (च. भा) P. 1575

इति ...तेपादितम् । अतश्चाग्नीषोमीयादिषु प्राकृतेतिकर्तव्यता प्राप्त एव । अतश्च गुणविधय एते । अन्यथा 'हिरण्यगर्भः' इत्यादीनि पदान्यनर्थका निभवेयुः । तस्माद्गुणविधय एवैते ।

अत्र [1]वार्तिककारः–

अवभृथेऽपि प्राकृतेतिकर्तव्यतायाः प्राप्तत्वाद्गुणविधित्वमिति यद्भाष्यकारेणोक्तं तदयुक्तम् । कुतः । अवभृथस्य गृहमेधीयवदेवापूर्वत्वात्कर्मान्तरत्वमेव । यथैव गृहमेधीये 'आज्यभागौ यजति' इत्यनेन विहिताभ्यामाज्यभागाभ्यामेवेतिकर्तव्यतायाः नैराकाङ्क्ष्यादपूर्वत्वमस्त्येव । तथैवावभृथेऽपि अप्सुमन्तावाज्यभागौ यजति' इत्यनेनाऽऽज्यभागयोः श्रवणादितिकर्तव्यता निराकाङ्क्षैव भवति । तस्मात्प्राकृतेकर्तव्यतायाया अप्राप्तत्वादपूर्वत्वमेव । अतश्च गृहमेधीयवदेवावभृथस्याप्यपूर्वत्वे सिद्धे, प्राकृतेतिकर्तव्यताया अप्राप्तत्वाद्गुणविधित्वमिति यद्भाष्यकारेणोक्तं तदयुक्तम् ।

अस्मिन्नधिकरणे [2]पार्थसारथिमिश्रैः, [3]माधवाचार्यैः, [4]खण्डदेवेन चाग्नीषोमीयपशौ, चातुर्मास्येषु, वायव्यपशौच गुणविधित्वमेवेति सिद्धान्तः कृतः, नत्ववभृथविषये विचारः कृतः ।

अस्मिन्नधिकरणेऽवभृथस्य गुणविधित्वं नास्तीति वार्तिककारपक्षो युक्त एव । पार्थसारथिमिश्रैः, माधवाचार्यैः, खण्डदेवेन चावभृथे विचार एव न कृतः ।

x x x

---

1. श्री. जै. मी. द. (प. भा) P. 185
2. शा. दी. P. 681
3. जै. न्या. वि. P. 246
4. पू. मी. द. (तृ. भा) P. 246

चतुर्थभागः

उदाहरणानामनुदाहरणत्वप्रतिपादनम्

२२. यववराहाधिकरणम्

(१-३-४)

तेष्वदर्शनाद्विरोधस्य समा विप्रतिपत्तिः स्यात् ।८।

शास्त्रस्था वा तन्निमित्तत्वात् ।९।

'यवमयश्चरुः, वाराही उपानहौ, वेतसे कटे प्राजापत्यान् संचिनोति' इत्येतेषूदाहरणेषु [1]भाष्यकार एवं प्रतिपादयति । यववराहवेतसशब्दानां किं दीर्घशूकसूकरवञ्जुलकेष्वेव प्रयोगः, उत प्रियङ्गुकृष्णशकुन (वायस) जम्बूष्वपीति संशयः । तत्र केचिद्यवादिशब्दान् दीर्घशूकादिषु प्रयुञ्जन्ते । केचिच्च प्रियङ्ग्वादिषु । अतश्चोभयथा पदार्थस्यावगमाद्विकल्प इति पूर्वपक्षः ।

'यत्रान्या ओषधयो म्लायन्ते अथैते मोदमाना इवोत्तिष्ठन्ति' इत्यादिवाक्यशेषेभ्यो यवादिशब्दानां दीर्घशूकादिष्वेव प्रयोग इति ज्ञायते । अतश्च यवादिशब्दानां दीर्घशूकादिष्वेव प्रयोग इति सिद्धान्तः ।

अत्र [2]वार्तिककार :-

यदप्युक्तं भाष्यकारेण यवादिशब्दानां दीर्घशूकादिष्वेव प्रयोग इति तदयुक्तम् । कुतः । यस्मिन्कस्मिंश्चिदपि देशे यवादिशब्दानां प्रियङ्ग्वादिषु प्रयोग एव नास्ति । अतश्च प्रियङ्ग्वादिष्वपि प्रयोगोऽस्तीति

---

1. श्री. जै. मी. द. (प्र. भा) P.P. 2167-2168

2. Ibid P.P. 213-219

कृत्वा विचारे मनसः खेद एव भवति । अथवा '[1]संदिग्धेषु वाक्यशेषात्' इत्यत्र संदिग्धार्थे वाक्यशेषान्निर्णय इति प्रतिपादितम् । अतश्चैषां तत्रैवोदाहरणत्वे संभवति नात्र पुनर्विचारः कार्यः । अथवा तत्सिद्धि[2]सूत्रे गौणीवृत्तिनिमित्तकानां विचारः कृतः । अतश्च यद्यपि यवादिशब्दानां प्रियङ्ग्वादिषु प्रयोगो नास्ति, तथापि सारूप्यरूपगौण्या वृत्त्या प्रियङ्ग्वादिष्वपि प्रयोगः कर्तुं शक्यत एव । अतश्चैषां यवादिशब्दानां तत्रैवोदाहरणत्वमस्तु । एवं च प्रथमपक्षे यवादीनामनुदाहरणत्वमेवेति सिद्धम् । द्वितीयतृतीयपक्षाभ्यां चास्मिन्नधिकरणेऽनुदाहरत्वमिति सिद्धम् । तस्मादत्र यवादीनामनुदाहरणत्वमेव । अतश्च यत्राऽऽर्यम्लेच्छयोर्विप्रतिपत्तिर्भवति, यत्र वा स्मृत्याचारयोर्विरोधो भवति तत्रैव विचारः कर्तव्य इति वार्तिककारेणेदमधिकरणं वर्णकत्रयेण व्याख्यातम् । तस्माद्यवादीन्युदाहृत्य योऽयं विचारः भाष्यकारेणोपन्यस्तः सोऽयुक्त एव ।

अस्मिन्नधिकरणे [3]पार्थसारथिमिश्रैरेवं भाट्टमतमाश्रित्य प्रतिपादितम् । वाक्यशेषादेवार्थनिर्णयाद्यवादीनामनुदाहरणत्वमेव । यत्र च वाक्यशेषो न भवति तत्राभियुक्तप्रसिद्ध्योश्च तुल्यबलत्वादार्यम्लेच्छयोर्विप्रतिपत्तिर्भवति, तत्रैव विचारः कर्तव्यो भवति । अपिच स्मृत्याचारविरोधेऽपि ।

[4]माधवाचार्यैस्तु भाष्यवार्तिकोभयमतानुसारेण विचारः कृतः । प्रथमतः भाष्यकारोक्तरीत्या यवादीन्युदाहृत्य विचारः कृतः । अनन्तरं च वार्तिककारोक्तोदाहरणद्वयेऽपि ।

---

1. श्री. जै. मी. द. (प्र. भा) P. 365
2. Ibid P.P. 365-365
3. शा. दी. P.P. 31-36
4. जै. न्या. वि. P.P. 35-38

[1]खण्डदेवेन तावद्भाट्टमतमनुसृत्यैव यत्राऽऽर्यम्लेच्छयोर्विप्रतिपत्तिर्भवति तत्रैव विचारः कृतः, न तु भाष्यकारोक्तयवादिशब्दान्युदाहृत्य ।

यवाद्यर्थनिर्णयः 'संदिग्धेषु वाक्यशेषात्' इति न्यायेनैव कृतः । अतश्च भाष्यकारेण पुनर्विचारः कृतः । तस्माद्गतार्थत्वाद्भाष्यकारपक्षोऽयुक्तः । अतश्च यवादिशब्दानामत्रानुदाहरणत्वमेवेति वार्तिककारपक्षो युक्त एव । अस्मिन्नधिकरणे पार्थसारथिमिश्रैः, खण्डदेवेन च केवलभाट्टमतमाश्रित्यैव प्रतिपादितम् । माधवाचार्यैस्तु भाष्यकारवार्तिककारमतमाश्रित्य प्रतिप्रादितम् ।

x x x

२३. तत्सिद्धिपेटिकाधिकरणम्

(१–४–१२)

तत्सिद्धिजातिसारूप्यप्रशंसाभूमलिङ्गसमवाया इति गुणाश्रया ।२३।

गुणविधिनामधेयविचारे प्रवृत्ते, सार्वत्रिकगौणीवृत्तिसमाधानार्थं गौणीवृत्त्युपयोगिनो गुणाः प्रसङ्गाद्विचार्यन्ते । 'तत्सिद्धिजातिसारूप्यप्रशंसाभूमलिङ्गसमवाया इति गुणाश्रया' इतीदं जैमिनि[1]सूत्रं व्याख्यासौकर्याय खण्डशः कृत्वा पठितम् । तत्सिद्धिः, जातिः, सारूत्यम्, प्रशंसा, भूम, लिङ्गसमवायः, इति । अस्मिन्नधिकरणे 'यजमानः प्रस्तरः, आग्नेयो वै ब्राह्मणः' इत्यादीन्युदाहृत्य विचारः कृतः । तत्र 'यजमानः प्रस्तरः'

1. पू. मी. द. (प्र. भा) P.P. 43-44

1. श्री जै. मी. द. (ष. भा) P.P. 354-364

इत्यत्र गुणविधित्वमुतार्थवादत्वमिति संशयः। तत्रार्थवादस्याऽनर्थक्य-निवृत्त्यर्थं गुणविधित्वमिति पूर्वपक्षः।

गुणविधित्वे यजमानकार्ये प्रस्तरः, प्रस्तरकार्ये वा यजमानो नियुज्येत। तथाचाग्नौ प्रहरणस्य प्रस्तरकार्यत्वाद्यजमाने प्रहृते सति कर्मलोपः स्यात्। तस्मादर्थवादत्वमेव। एवं च विधेयः प्रस्तरशब्दः यजमानशब्देन श्रूयते। यथा यजमानः स्वकार्यकर्ता, तथैव प्रस्तरकार्य-कर्ता च भवतीति। अतश्च गौणीवृत्तिनिमित्तकतत्सिद्ध्या (तत्कार्य-कारित्वेन) यजमानशब्दः प्रस्तरे गौण इति।

एवं च 'यजमानः प्रस्तरः' इत्यत्रार्थवादत्वे सिद्धे' आग्नेयो वै ब्राह्मणः' इत्यत्रापि गुणविधित्वमुतार्थवादत्वं वेति संशये [1]भाष्यकार एव-माह। 'आग्नेयो वै ब्राह्मणः' इत्यत्र विध्यन्तरैकवाक्यत्वेन ब्राह्मणकार्ये त्यागादावचेतनस्याग्नेर्विधानासंभवान्नगुणविधित्वम्, किन्त्वर्थवादत्वमेव। कुतः। एकजातीयकत्वात्। एकजातीयकत्वं च 'प्रजापतिरकामयत प्रजाः' इत्यादि [2]श्रुत्याऽवगम्यते। तथाचाग्निब्राह्मणयोरेकजातीयकत्वाद्-गौण्या वृत्त्या जात्याऽऽग्नेयशब्दः ब्राह्मणे गौण इति। एवमेव 'ऐन्द्रो राजन्यः, वैश्यो वैश्वदेवः' इत्यत्रापि।

अत्र [3]वार्तिककारः–

गौणीवृत्तिनिमित्तकजात्या आग्नेयादिशब्दाः ब्राह्मणादिषु गौणा इति यद्भाष्यकारेणोक्तं तदयुक्तम्। कुतः। आग्नेयशब्दस्य नाग्निरर्थः। अग्निर्देवता अस्य हविष इति व्युत्पत्त्या, अग्निदेवताकं हविरिति, आग्नेय-

---

1. श्री जै. मी. द. (प्र. भा) P.P. 361-362
2. Ibid. P. 361
3. Ibid P.P. 362

शब्दस्यार्थो भवति। एवमेव 'साऽस्य देवता' इति सूत्रानुसारेणपि यष्टु-यजमानस्य सा देवतेत्यर्थो आग्नेयशब्दस्य भवति। तथाचाऽऽग्नेयशब्दस्य यजमान इत्यर्थः। एवंच हविर्यजमानवाचकाऽऽग्नेयशब्दस्य नाग्निरर्थो भविष्यति। तस्मादाग्नेयशब्दस्याग्न्यर्थकत्वाभावान्नाऽऽग्नेयशब्दो ब्राह्मणे गौणः। एवमेव, ऐन्द्रवैश्वदेवशब्दावपि राजन्यवैश्यशब्दयोर्न गौणौ भवतः। अतश्चाऽऽग्नेयादिशब्दाः ब्राह्मणादिषु गौणीवृत्तिनिमित्तकजात्या गौणा इति यद्भाष्यकारेणोक्तं तदयुक्तम्। तस्मादाग्नेयादीनामत्रानुदा-हरणत्वमेव। अतश्च यत्र 'अग्निर्वै ब्राह्मणः' इत्यादिः श्रूयते, तत्रैवोदा-हर्तव्यमिति। अपि च जातिशब्दस्य जन्मैवार्थः, नत्वेकजातीयकत्व-मिति।

[1]पार्थसारथिमिश्रैः, [2]खण्डदेवेन च भाट्टमतमाश्रित्य 'अग्निर्वै ब्राह्मणः' इत्यत्राग्निब्राह्मणयोरेकमुखप्रभवत्वादग्निशब्दो ब्राह्मणे गौण इति प्रतिपादितम्।

[3]माधवाचार्यैस्तु भाष्यकारमतमाश्रित्य 'आग्नेयो वै ब्राह्मणः' इत्यत्रैव विचारः कृतः।

आग्नेयशब्दस्याग्न्यर्थकत्वाभावाद् 'आग्नेयो वै ब्राह्मणः' इति भाष्यकारोक्तमुदाहरणमयुक्तमेव। अतश्च 'अग्निर्वै ब्राह्मणः' इति वार्तिककारोक्तमुदाहरणं युक्तमेव भवति। अस्मिन्नधिकरणे पार्थसारथि-मिश्रैः, खण्डदेवेन च भाट्टमतमाश्रित्य प्रतिपादितम्। खण्डदेवेन तावद्भाष्यकारमतमाश्रित्य प्रतिपादितम्।

x x x

---

1. शा. दी. P. 86
2. जै. न्या. वि. P. 65
3. पू. मी. द. (प्र. भा) P. 78

२४. आश्रयिकर्मणामदृष्टार्थताधिकरणम्

(४-१-७)

आश्रयिष्वविशेषेण भावोऽर्थः प्रतीयेत ।१८। चोदनायां त्वनारम्भो विभक्तत्वान्न ह्यन्येन विधीयते ।१९। स्याद्वा द्रव्यचिकीर्षायां भावोऽर्थे च गुणभूतताऽऽश्रयाद्धि गुणीभावः ।२०।

आश्रयिकर्मसु उत्तमः प्रयाजः, पशुपुरोडाशः, स्विष्टकृत्, इत्येतेषु विचार्यते । तत्र किं 'यजेत' यजिमात्रं संस्कारो देवताया उत यजिनाऽदृष्टं देवतायां क्रियत इति संशयः । तत्र यजिमात्रं संस्कारो देवताया इति पूर्वपक्षः । यजिनाऽदृष्टं देवतायां क्रियत इति सिद्धान्तः । तत्रोत्तमप्रयाजपशुपुरोडाशयोस्तु नास्ति विप्रतिपत्तिः । अतश्च तयोरुदाहरणत्वमेव । स्विष्टकृतोऽप्युदाहरणत्वमेवेति [1]भाष्यकार एवं वदति ।

स्विष्टकृद्याग उपयुक्तहविस्संस्कारकः । तस्य च संस्कारस्य दृष्टप्रयोजनकत्वाददृष्टार्थत्वं न संभवति । एकस्मिन्कर्मणि प्रयोजनद्वयासंभवदिति पूर्वपक्षः ।

यद्यपि कर्मण एकत्वं, तथाप्येकस्यैव कर्मणोंऽशभेदात्फलभेदो भवत्येव । यद्यपि स्विष्टकृद्यागस्य हविस्संकारकत्वेन दृष्टार्थकत्वमस्ति, तथाऽप्यापूर्वं प्रति यागस्य साधनत्वावगमादाश्रयत्वं भवत्येव । एवं च

---

1. श्री. जै. मी. द. (च भा) P. 1207

'आ॰.।यष्वविशेषेण भावोऽर्थः प्रतीयेत' इति [1]सूत्रानुरोधादाश्रयिकर्मणा- मदृष्टार्थत्वमिति प्रतीयते । तस्मादाश्रयिकर्मणामदृष्टार्थत्वादाश्रयिकर्मणः स्विष्टकृतोऽप्यदृष्टार्थत्वमेव । अतश्चादृष्टार्थत्वात्स्विष्टकृतोऽप्युदाहरण- त्वमेवेति ।

अत्र [2] वार्तिककारः—

अदृष्टार्थत्वात्स्विष्टकृतोऽप्युदाहरणत्वमेवेति यद्भाष्यकारेणोक्तं तदयुक्तम् । कुतः । 'अग्निरिदं हविररजुषतं' इत्यादिः स्विष्टकृन्मन्त्रोऽ ग्न्यादीष्टदेवतासंकीर्तनाद्दृष्टार्थ एव । अपिच यागे उपयुक्तस्य द्रव्य- स्यावशेषे प्रतिपत्तिरपेक्षिता । तस्य च प्रतिपत्तिर्यागेनैवेति नास्ति, अन्य- थाऽपि कर्तुं शक्यत्वात् । अतश्च तस्य हविषोऽनियमेन प्रतिपत्तौ प्राप्तायां यागेनेति नियम्यते । तथाचोपयुक्तपुरोडाशस्य प्रतिपत्तिरूपः प्रक्षेपोऽपि दृष्टार्थ एव । अतश्च स्विष्टकृद्यागस्य केवलद्रव्यसंस्कारकत्वेन दृष्टार्थ- त्वादुत्तमप्रयाजपशुपुरोडाशतुल्यत्वाभावाच्च नादृष्टार्थत्वम् । एवंच स्विष्टकृतो दृष्टार्थत्वेनोदाहरणत्वाभावात्स्विष्टकृतोऽदृष्टार्थत्वेनोदाहरण- त्वमिति यद्भाष्यकारेणोक्तं तदयुक्तमिति ।

अस्मिन्नधिकरणे [3]पार्थसारथिमिश्रैः स्विष्टकृत उदाहरणत्वमेवेति भाष्यकारमतानुसारेणैवं प्रतिपादितम् । यद्यपि उत्तमप्रयाजपशुपुरोडश– स्विष्टकृद्यागानां देवताद्रव्यसंस्कारकत्वेन दृष्टार्थत्वमस्ति, तथापि त्यागां- शस्यादृष्टमन्तरेण प्रयोजनाभावददृष्टार्थत्वमप्यस्त्येव । तस्मादुत्तम- प्रयाजादीनामुदाहरणत्वमेव ।

---

1. श्री. जै मी. द. (च भा) P. 1207
2. Ibid. P. 1207
3. शा. दी. P. 355

[1]माधवाचार्यैरपि भाष्यकारमतानुसारेण, यागे परमापूर्वोपयुक्तावान्तरापूर्वस्य जायमानत्वात्स्विष्टकृतोऽप्युदाहरणत्वमेवेति प्रतिपादितम् ।

[2]खण्डदेवेनापि भाष्यकारमतानुसारेणैव प्रतिपादितम् । विशेष्यतया प्रतीतस्य त्यागस्य प्रक्षेपाङ्गत्वाभावात्प्रधानत्वमेव । तथा च त्यागस्यादृष्टप्रयोजनकत्वाददृष्टार्थत्वमेव । तस्मात्स्विष्टकृतोऽप्युदाहरणत्वमेव ।

अस्मिन्नधिकरणे स्विष्टकृत उदाहरणत्वमेवेति भाष्यकारमतेन प्रतिपादितम् । पार्थसारथिमिश्रैः, माधवाचार्यैः, खण्डदेवेन च भाष्यानुसारेणैव प्रतिपादितम् । वार्तिककारेण तावत्स्विष्टकृतोऽनुदाहरणत्वमेवेति प्रतिपादितम् ।

x x x

२४. महापितृयज्ञे धानास्ववघातानुष्ठानाधिकरणम्

(१०–२–३३)

अर्थेन च विपर्यासे तादर्थ्यात्तत्त्वमेव स्यात् ।७४।

महापितृयज्ञे धानास्ववघातानुष्ठानविषये विचार्यते । महापितृयज्ञे 'सोमाय पितृमते षट्कपालं, पितृभ्यो बर्हिषद्भ्यो धानाः, पितृभ्योऽग्निष्वात्तेभ्यो अभिवान्यायै दुग्धे मन्थम्' इति श्रूयते । तत्र धानासु

1. जै. न्या. वि. P. 254
2. पू. मी. द. (द्वि. भा) P. 92

हन्तिः कर्तव्या नवेति संशयः। धानासु हन्तौ क्रियमाणे धानात्वं विहन्येत। अतश्च धानासु हन्तिः नैव कर्तव्येति पूर्वपक्षः।

अस्मिन्पूर्वपक्षे [1]भाष्यकार एवं वदति। धानासु चोदकप्राप्तावघातः कर्तव्य एव। ननु धानास्ववघाते क्रियमाणे धानात्वं विहन्येत। न। यथा क्रियमाणेऽवघाते धानात्वं न विहन्यते, तथा क्रियते। अर्थादर्थविपर्यासेनावघातः कर्तव्य एव। विपर्यासे च क्रमबाध एव, न पदार्थबाधः। तस्मात्क्रमरूपगुणलोपेऽप्यवघातरूपमुख्यक्रियायाः संभवादर्थविपर्यासेन श्रपणात्पूर्वमेवावघातः कर्तव्यः।

अत्र [2]वार्तिककारः—

'सोमाय पितृमते षट्कपालं, पितृभ्यो र्बर्हिषद्भ्यो धानाः,' इत्यत्र भाष्यकारेण योऽयं विचारः कृतः, सोऽयुक्त एव। कुतः। 'धानाः' इत्यस्यानुदाहरणत्वात्। कुतः। द्वेधाऽप्यनुपपद्यमानत्वात्। कथम्। प्रकृतौ पूर्वमवघातः, ततः श्रपणं श्रूयते। अतश्चात्रापि चोदकेनार्थविपर्यास एव प्राप्नोति। तथाचात्र भाष्यकारेण धानात्वाविघातायार्थविपर्यास इति यदुक्तं तदयुक्तम्। अथवा यदि पश्चादेवावघातः प्राप्नोति, तदा तथैवानुष्ठेयः, नार्थविपर्यासः। ननु निष्पन्नधानानामेव ग्रहणम्। तथाच विपर्यासशङ्कैव नोदेति। एवं च 'धानाः' इत्यस्यानुदाहरणत्वात् 'मन्थः' इत्यत्रैव विचारः कर्तव्यो भवति। अतश्च 'धानाः' इत्यस्यवोदाहरणत्वमस्तीति योऽयं विचारः भाष्यकारेणोपन्यस्तः सोऽयुक्त एव।

---

1. श्री जै. मी. द. (ष. भा) P.P. 1863-64
2. Ibid (ष. भा) P.P. 1863-1864

अस्मिन्नधिकरणे [1]पार्थसारथिमिश्रैर्यथावार्तिकमेव व्याख्यातम् । प्रकृतौ व्रीहिषु पूर्वमवघातः, ततः श्रपणं श्रूयते । प्रकृतिवत्क्रियमाणेऽर्थविपर्यास एव न भवति । विपर्यासे च क्रमभेदोऽपि स्यात् । अथवा धानासु पूर्वं श्रपणं, ततोऽवघातश्च क्रियमाणो धानात्वं विहन्येत । अपिच यदि पूर्वं श्रवणं, ततोऽवघातः क्रियेत, तदा भाष्यकारमतविरोधःस्यात् । अतश्च 'धानाः' इत्यस्यानुदाहरणत्वमेव । केवल मन्थः' एवोदाहरणं भवति ।

[2]माधवाचार्यैस्तावद्द्विधेदमधिकरणं वर्णकद्वयेन विचारितम् । प्रथमवर्णके तावद्भाष्यकारमतानुसारेण 'धानाः' इत्यत्र विचारः कृतः ।

द्वितीये वर्णके तावद्वार्तिककारोक्तोदाहरणे विचारः कृतः । एवं माधवचार्यैरुदाहरणद्वयेनेदमधिकरणं व्याख्यातम् ।

[3]खण्डदेवेन तावत्प्रथमतो भाष्यकारमतानुसारेण वर्णकं व्याख्याय, ततश्च वार्तिककारमतनुसारेण 'मन्थः' इत्यस्यैवोदाहरणत्वमिति विचारः कृतः ।

x x x

---

1. शा. दी. P.P. 578-680
2. जै. न्या. वि. P.P. 547-548
3. पू. मी. द. (तु. भा) P.P. 243-244

२६. नक्षत्रेष्ट्यादावुपदिष्टैरुपहोमादिभिरातिदेशिकानां नारिष्टहोमानां बाधाभावाधिकरणम्

(१०-४-१)

प्रकृतिलिङ्गासंयोगात्कर्मसंस्कारं विकृतावधिकं स्यात् ।१। चोदनालिङ्गसंयोगे तद्विकारः प्रतीयेत प्रकृतिसंनिधानात् ।२।

नक्षत्रेष्टौ 'सोऽत्र जुहोति' इत्यादय उपहोमाः श्रूयन्ते । चोदकेन च नारिष्ठहोमाः प्राप्नुवन्ति । श्येने च 'लोहितोष्णीषा लोहितवसना निवीता ऋत्विजः प्रचरन्ति' इति श्रूयते । चोदकेन च निवीतादिकं प्राप्नोति । तथैव पृष्ठ्ये षडहे 'मध्वाशयेत्, घृतं वा' इति श्रूयते । चोदकेन च पयोव्रतादयो भवन्ति । तत्र विचार्यते । किमुपदिष्टैरुपहोमादिभिरतिदिष्टानां नारिष्टहोमानां निवृत्तिः, उतानिवृत्तिः, समुच्चयो वेति संशयः । तत्र प्रत्यक्षश्रुतैरुपहोमादिभिश्चोदकप्राप्तनारिष्टहोमा बाध्यन्त इति पूर्वपक्षः ।

यद्युपहोमानां नारिष्टहोमानां च दृष्टार्थत्वं स्यात्तदा समुच्चये बाधः स्यात् । किन्त्वेषामदृष्टार्थत्वादुपहोमानां नारिष्टैस्सह संयोगाभावान्नारिष्टहोमानामनिवृत्तिः । अर्थात्समुच्चय इति सिद्धान्तः ।

एवं च नारिष्टहोमानामुपहोमैस्सह समुच्चये सिद्धे, [1]भाष्यकार

---

1. श्री जै. मी. द. (ष. भा) P. 1906

एवं वदति । नारिष्टहोमवदेव श्येनेऽपि निवीतोपवीतयोस्समुच्चय एव । तथैव पृष्ठ्ये षडहेऽपि ।

अत्र [1]वार्तिककारः–

नक्षत्रेष्टौ, पृष्ठ्ये षडहे च नास्ति विप्रतिपत्तिः । किन्तु श्येने निवीतोपवीतयोः समुच्चितत्वादुदाहरणत्वमस्तीति यद्भाष्यकारेणोक्तं तदयुक्तम् । कुतः । प्रधानश्येनयागो ज्योतिष्टोमप्रकृतिकः । न दर्शपूर्णमासप्रकृतिकः । ज्योतिष्टोमप्रकृतिके च श्येनयागे 'निवीता ऋत्विजः प्रचरन्ति' इति श्रूयते । प्रकृतौ ज्योतिष्टोमे प्रत्यक्षेण चोदकेन वा, उपवीतं नास्ति । दर्शपूर्णमासयोरेवोपवीतं श्रूयते । अतश्च ज्योतिष्टोमे उपवीताभावात्तत्प्रकृतिके च श्येने निवीतमेकमेव भवति । अतश्च न निवीतोपवीतयोः समुच्चयः । एवंच श्येने निवीतोपवीतयोः समुच्चय इति यद्भाष्यकारेणोक्तं तदयुक्तम् । अतश्च 'निवीता ऋत्विजः प्रचरन्ति' इत्यस्यानुदाहरणत्वमेव ।

[2]पार्थसारथिमिश्रैस्तावन्नक्षत्रेष्टावेव विचारः कृतः, नत्ववशिष्टोदाहरणद्वये ।

[3]माधवाचार्यैस्तावद्भाष्यकारमतमनुसृत्यैवोदाहरणत्रयेऽपि विचारः कृतः । नक्षत्रेष्टौ तावत्कार्यभेदादुपहोमैस्सह नारिष्टहोमानां समुच्चय एव । श्येने वासोभ्यां सकृदेव निवीतोपवीतयोस्संभवात्समुच्चय एव ।

---

1. श्री जै. मी. द. (ष. भा) P. 1906
2. शा. दी. P.P. 696-698
3. जै. न्या. वि. P.P. 662-563

एव पृष्ठ्यषडहेऽपि । श्येने, पृष्ठ्यषडहे च निवीतादेरुपवीतादिना सह विरोध एव नास्ति । तस्मात्क्रत्वाचिन्तैवेति ।

'खण्डदेवस्तु भाट्टमतमाश्रित्यैवैवं प्रतिपादितम् । यदप्युक्तं भाष्यकारेण निवीतोपवीतयोरदृष्टार्थत्वात्समुच्चय प्रति तदयुक्तम् । अन्यथा श्राद्धादौ निवीतेन सहोपवीतस्य समुच्चयापत्तेः । अतश्च तत्तत्कर्माङ्गत्वेन विहितस्य निवीतादेस्समुच्चयासंभवादुपेक्षा कर्तव्यैव । पृष्ठ्य षडहस्य तावत्पक्षे उदाहरणत्वमेव । तद्यथा । 'पयोव्रतं ब्राह्मणस्य' इत्यादौ ब्राह्मणादीनां देहवृत्त्यर्थत्वेन पयोव्रतं श्रूयते । मध्वशनस्य च पयोव्रतकार्यकारित्वाभावात्सुत्यायां प्रयोव्रताभावात्पूर्वपक्ष एव न संभवति । तस्मादनुदाहरणत्वम् । अथवोदाहरणत्वमेव वा ।

प्रकृतौ ज्योतिष्टोमे उपवीताभावात्तत्प्रकृतिके, च श्येने न नीवीतोपवीतयोः समुच्चयो भवति । अतश्च निवीतोपवीतयोः श्येने समुच्चय इति भाष्यकारपक्षोऽयुक्त एव । तस्माच्छथेनस्यानुदाहरणत्वमिति वार्तिककार पक्षो युक्त एव । अस्मिन्नधिकरणे माधवाचार्यैः भाष्यकारमतमनुसृत्यैव प्रतिपादितम् । खण्डदेवेन भाट्टमतमाश्रित्य प्रतिपादितम् । पार्थसारथिमिश्रैस्तु न कस्यापि पक्षः स्वीकृतः ।

x x x

1. पू. मी. द. (तु. भा) P.P. 270-271

२७. गवामयने त्र्यनीकायाः स्वस्थानविवृद्ध्याऽभ्यासाधिकरणम्

(१०–५–२५)

ऐकादशिनवत्त्र्यनीकापरिवृत्तिः स्यात् ।८३। स्वस्थानविवृद्धिर्वाऽह्नामप्रत्यक्षसंख्यत्वात् ।८४। पृष्ठ्यावृत्तौ चाऽऽग्रयणस्य दर्शनात्त्रयस्त्रिंशे परिवृत्तौ पुनरैन्द्रवायः स्यात् ।८५। वचनात्परिवृत्तिरैकादशिनेषु ।८६। लिङ्गदर्शनाच्च ।८७।

अस्मिन्नधिकरणे [1]भाष्यकारमतेनैव प्रारभ्यते । द्वादशाहे 'ऐन्द्रवायवाग्रौ प्रायणीयोदयनीयौ' इत्यादिः श्रूयते । तच्च चोदकेन गवामयने प्राप्तम् । तस्य च गवामयनस्यैकषष्ठ्यधिकत्रिशतदिवसात्मकत्वाब्दह्नि भवेयुः । त्रीण्यनीकाग्राण्यैन्द्रवायवशुक्राग्राऽऽग्रयणाग्राणि यस्यां क्रियायां सा त्र्यनीकेत्यर्थः । गवामयने च त्र्यनीकाया अभ्यासे प्राप्ते तत्कथमिति विचार्यते । तत्र किं त्र्यनीकायाः दण्डकलितवदावृत्तिः, उत स्वस्थानविवृद्धिर्वेति संशयः । 'ऐन्द्रवायवाग्रं प्रथममहः' इत्यादावह्नां विवक्षितत्वादहरधिकारा एते । अतश्च दण्डकलितवदावृत्तिरेव । अपिच यथा 'अनुवाकस्त्रिः पठ्यताम्' इत्यत्र सकृत्संपूर्णमनुवाकं पठित्वैव पुनः द्वितीयवारमनुवाकं पठति, तथा त्र्यनीकया अप्यावृत्तिर्दण्डकलितवदेवेति पूर्वपक्षः ।

ऐन्द्रवायवाग्रस्य, अह्नांच विधाने वाक्यभेदो भवति । अतश्चा-

---

1. श्री. जै. मी. द. (ष. भा.) P.P. 2978-2980

ण्. विधिः। एवंचाऽऽग्रयणाग्रादीनां क्रमानुग्रहाय स्वस्थानविवृद्धिः कर्तव्यैवेति सिद्धान्तः।

अत्र [1]वार्तिककारः–

द्वादशाहिकी त्र्यनीका चोदकेन गवामयने प्राप्यत इति यदुक्तं भाष्यकारेण तदप्ययुक्तम्। कुतः। त्र्यनीकायाः चोदकात्पूर्वमेव नामधेयविधया प्राप्तत्वात्। कथम्। विश्वजिति नामधेयेनाऽऽग्रयणाग्रता प्राप्नोति। 'पृष्ठ्यषडहः' इति नामधेयेनैव षडहसंबन्धिनी ग्रहाग्रता प्राप्नोति। अभिप्लवे च नामधेयेनैकाहिको विध्यन्तः प्राप्नोति। तथा च नामातिदेशेन त्र्यनीकायाः प्राप्तत्वाच्चोदकप्राप्तिर्नास्त्येव। एवं च गवामयने त्र्यनीका चोदकेन प्राप्यत इति यदुक्तं भाष्यकारेण तदयुक्तम्। अतश्चास्याधिकरणस्य गवामयनमनुदाहरणमेव।

अस्मिन्नधिकरणे [2]पार्थसारथिमिश्रैः भाष्यकारोक्तपक्षे बहवो दोषा भवन्तीति प्रतिपाद्य, ततश्च वार्तिककारानुसारेण त्र्यनीकाया गवामयने चोदकेन प्राप्तिर्नास्तीति प्रतिपादितम्।

[3]माधवाचार्यैस्तु गवामयने चोदकेनैव त्र्यनीकायाः प्राप्तिरिति भाष्यकारमतानुसारेण प्रतिपादितम्।

[4]खण्डदेवेन तावत्त्र्यनीकायाः चोदकप्राप्तिर्गवामयने नास्तीति भाष्यकारमतं निरस्य, ततश्च नामधेयेनैव प्रतिपादितम्।

---

1. श्री, जै. मी. द. (ष. भा) P. 1980
2. शा. दी. P.P. 739-739
3. जै. न्या. वि. P.P. 598-599
4. पू. मी. द. (च. भा) P.P. 39-42

गवामयने चोदकेन अनीकाग्रा अप्राप्तत्वात दस्तीति कृत्वा गवामयनमुदाहरणं भवतीति भाष्यकारपक्षोऽयुक्तः। तस्माद् गवामयनमनुदाहरणमिति वार्तिककारपक्षो युक्त एव। अस्मिन्नधिकरणे पार्थसारथिमिश्रैः, खण्डदेवेन च भाट्टमतमाश्रित्य, माधवाचार्यैः भाष्यकारमतमनुसृत्य च प्रतिपादितम्।

x x x

२८. पश्वर्थानुष्ठितप्रयाजादिभिरेव पशुपुरोडाशस्याप्युपकारसिद्धेस्तदर्थं पृथगङ्गाननुष्ठानाधिकरणम्

(१२-१-१)

तन्त्रिसमवाये चोदनातः समानानामैकतन्त्र्यमतुल्येषु तु भेदो विधिप्रक्रमतादर्थ्यात्तादर्थ्यं श्रुतिकालनिर्देषात् ।१। गुणकालविकाराच्च तन्त्रभेदः स्यात् ।२। तन्त्रमध्ये विधानाद्वा मुख्यतन्त्रेण सिद्धः स्यात्तन्त्रार्थस्याविशिष्टत्वात् ।४। विकाराच्च न भेदः स्यादर्थस्याविकृतत्वात् ।४। एकेषां चाशक्यत्वात् ।५। एकाग्निवच्च दर्शनम् ।६।

अग्नीषोमीये पशौ पुरोडाशः श्रूयते 'अग्नीषोमीयस्य वपया प्रचर्याग्नीषोमीयं पशुपुरोडाशमेकादशकपालं निर्वपेत्' इति। तत्राङ्गविषये विचार्यते। किमग्निषोमेऽनुष्ठितैरेव प्रयाजादिभिः पुरोडाशेऽप्युपकारः सिद्ध्यति, अथवा प्रयाजादयः पृथगनुष्ठेया वेति संशयः। तत्रोपकारबोधकविधेरभावात्पृथगेव प्रयाजादयोऽनुष्ठेया इति पूर्वपक्षः।

यद्युपकारबोधकं प्रमाणं नास्ति, तथाप्यर्थप्राप्तमुपकारं बाधितुं न शक्यते। तस्मात्प्रसङ्गादुपकारे सिद्धे न पुनः प्रयाजादयोऽनुष्ठेया भवन्तीति सिद्धान्तः।

पुरोडाशार्थं पुनरङ्गाननुष्ठानमेवेति सिद्धे [1]भाष्यकार एवं वदति। पुरोडाशवदेव चित्रेष्टावपि सकृदेवाङ्गान्यनुष्ठेयानि। कुतः। 'दधिमधु घृतमापोधाना उदकंतण्डुलास्तत्संसृष्टं प्राजापत्यम्' इत्यस्यां चित्रेष्टौ दध्यादीनामेकवाक्यचोदितत्वादेकतन्त्रत्वादङ्गान्यपि सकृदेवानुष्ठेयानि। तस्मादस्याधिकरणस्य चित्रेष्टिरप्युदाहरणमेव।

अत्र [2]वार्तिककारः–

अस्मिन्नधिकरणे चित्रेष्टिरप्युदाहरणमेवेति यदुक्तं भाष्यकारेण तदयुक्तम्। कुतः। यदैव हि यागानां भेदो भवति, तदैव तन्त्रेणाङ्गानां प्रसङ्गः। नात्र यागभेदो वर्तते। तद्यथा:–'तत्संसृष्टं प्राजापत्यम्' इत्यत्र तदित्येकवचतान्तं सर्वनाम श्रूयते। तच्चैकवचनान्तेनैव संसृष्ट शब्देनान्वेति। संसृष्टस्य च प्रजापतिना संबन्धः। अतश्चात्र बहुवचनान्तशब्दाभावात्तत्तदिति वीप्सायाश्चाभावाच्चित्रेष्टिरेकैव यागो भवति। अतश्च यागभेदाभावात्कथमङ्गानां तन्त्रं भवति। तस्मात्तन्त्र विचारस्य चित्रेष्टेरनुदाहरणत्वाच्चित्रेष्टिरप्युदाहरणमेवेति यदुक्तं भाष्यकारेण तदयुक्तम्।

अस्मिन्नधिकरणे [3]पार्थसारथिमिश्रैः, [4]माधवाचार्यैः, [5]खण्डदेवेन

---

1. श्री. जै. मी. द. (ष. भा) P.P. 2215-2217
2. Ibid P. 2216
3. शा. दी. P.P. 843 846
4. जै. न्या. वि. P.P. 685-686
5. पू. मी. द. (च. भा.) P.P. 216-220

वाग्नीषोमीयप्रयाजादिभिरेव पुरोडाशेऽपि प्रसङ्गादुपकारः सिद्ध्यतीत्येवमेव प्रतिपादितम्, न तु चित्रेष्ठ्युदाहरणमधिकृत्य ।

चित्रेष्टौ यागभेदाभावादङ्गानां सकृदेवानुष्ठानं भवति । तस्माच्चित्रेष्टौ यागभेदादङ्गानां तन्त्रेणैवानुष्ठानमिति भाष्यकारोक्तमयुक्तमेव । तस्माच्चित्रेष्टिरनुदाहरणमिति वार्तिककारपक्षो युक्त एव । अस्मिन्नधिकरणे पार्थसारथिमिश्रैः, माधवाचार्यैः, खण्डदेवेन च चित्रेष्टिमधिकृत्यैव न प्रतिपादितम् ।

x v x

२९. सहानुष्ठीयमानेषु प्रधानेषु धर्मविरोधे भूयसां स्वधर्मानुष्ठानाधिकरणम्

(१२-२-७)

विप्रतिषिद्धधर्माणां समवाये भूयसां स्यात्सधर्मत्वम् ।२२।

अस्मिन्नधिकरणे पञ्चदशरात्रस्तावदुदाहरणं भवतीति [1]भाष्यकार एवं वदति । पञ्चदशरात्रेऽग्निष्टुत्प्रथममहः । तत्रैकाहाग्निष्टुद्धर्म आग्नेयी सुब्रह्मण्या प्राप्यते । अनन्तराणि त्रीणि ज्योतिरादीनि । तेष्वैन्द्री सुब्रह्मण्या । तथाचावशिष्टेष्वेकादशाहस्सु धर्म विचारः क्रियते । किं पञ्चदशरात्रे द्वादशाहतो धर्मप्राप्तिः, उताग्निष्टुतो वेति संशयः । तत्रासंजातविरोधित्वेन प्रबलस्याग्निष्टुतो धर्मः कर्तव्य इति पूर्वपक्षः ।

---

1. श्री. जै. मी. द. (ष भा) P.P. 2246-2247

भूयसां धर्माणामनुग्रहाय द्वादशाहिक ऐन्द्रीधर्म एव कर्तव्यः। तथाचाग्निष्टुत्याग्नेयी कर्तव्या। इतरेषु च ऐन्द्री कर्तव्येति सिद्धान्तः।

अत्र [1]वार्तिककारः–

पञ्चदशरात्रस्तावदुदाहरणं भवतीति यदुक्तं भाष्यकारेण तदयुक्तम्। कुतः। एका सुब्रह्मण्या तावद्वसतीवरीग्रहणोत्तरकालं प्रतिदिवसं कर्तव्यैव भवति। अतश्चाग्निष्टुत्याग्नीयी सुब्रह्मण्या भवत्येव। अन्येषु च ऐन्द्रीसुब्रह्मण्या। अतश्चाविरोधेन संशयाभावादनुदाहरणत्वमेव। एवंच यत्र पञ्चहविष्को यागो भवति, तत्राऽऽज्यभागाभिमर्शनमन्त्रयोर्विरोधात्कथं धर्माणां प्रसक्तिरिति विचारः कर्तव्यो भवति। तस्मात्पञ्चदशरात्रस्यानुदाहरणत्वादुदाहरणमिति यद्भाष्यकारेणोक्तं तदयुक्तम्।

अस्मिन्नधिकरणे [2]पार्थसारथिमिश्रैः, पञ्चदशरात्रे संशयस्यैवाभावादनुदाहरणत्वमिति वार्तिककारमतानुसारेणैव प्रतिपादितम्।

माधवाचार्यैस्तु [3]भाष्यवार्तिकोभयमतानुसारेण वर्णकद्वयेनोदाहरणद्वयं प्रतिपादितम्। तत्र प्रथमवर्णके भाष्यकारमतानुसारेण पञ्चदशरात्रे विचारः कृतः। द्वितीयवर्णके च वार्तिककारोक्तरीत्या पञ्चहविष्कयागे भूयसां धर्माणामनुग्रहः कार्य इति प्रतिपादितम्।

[4]खण्डदेवेन पञ्चदशरात्रे संशयाभावादनुदाहरणत्वमेवेति पूर्व

---

1. श्री. जै. मी. द. (ष. भा) P P. 246-247
2. शा. दी. P.P. 862-863
3. जै. न्या. वि. P.P. 697-698
1. पू. मी. द. (च. भा) P. 249-251

प्रतिपाद्य, अनन्तरं च वार्तिककारोक्तपञ्चहविष्कयागस्यैवोदाहरणत्वं भवतीति प्रतिपादितम् ।

पञ्चदशरात्रे धर्मविषये विरोधाभावान्नास्याधिकरणस्योदाहरणं पञ्चदशरात्रो भवति । तस्मादयं भाष्यकारपक्षोऽयुक्त एव । अतश्च पञ्चदशरात्रस्यानुदाहरणत्वमिति वार्तिककारपक्षो युक्त एव । अस्मिन्नधिकरणे पार्थसारथिमिश्रैः केवलभाट्टमतानुसारेणैव प्रतिपादितम् । माधवाचार्यैः, खण्डदेवेन च भाष्यवार्तिकोभयमतानुसारेण प्रतिपादितम् ।

x x x

पञ्चमभागः

शब्दार्थानामयुक्तत्वप्रतिपादनम्

३०. वेदोपक्रमाधिकरणम्

(३-३-१)

श्रुतेर्जाताधिकारः स्यात् ।१। वेदो वा प्रायदर्शनात् ।२। लिङ्गाच्च ।३। धर्मोपदेशाच्च न हि द्रव्येण संबन्धः ।४। त्रयीविद्याख्या च तद्विदि ।५। व्यतिक्रमे यथाश्रुतीति चेत् ।६। न सर्वस्मिन्नविशेषात् ।७। वेदसंयोगान्न प्रकरणेन बाध्येत ।८।

ज्योतिष्टोमे 'उच्चैर्ऋचा क्रियते, उच्चैः साम्ना, उपांशु यजुषा' इति श्रूयते । तत्र [1]भाष्यकार एवं वदति । किमेते उच्चैस्त्वादिधर्मा ऋगादिजातिमधिकृत्य प्रवृत्ताः, उत वेदमधिकृत्यवेति संशयः । उच्चैस्त्वादयो वेदधर्मा एवेत्यत्राधिकारिकवचनाभावादृगादिजातिमधिकृत्यैव प्रवर्तन्त इति पूर्वपक्षः ।

'त्रयो वा वेदा असृज्यन्त' इत्यत्रोपक्रमे वेदशब्दः श्रूयते । उपसंहारेचोच्चैस्त्वादयः श्रूयन्ते । अतश्चासंजातविरोधित्वन्यायेनोपक्रमेश्रुतवेदधर्मा एवैते भवन्ति । तस्मादुच्चैस्त्वादयो वेदधर्मा एवेति सिद्धान्तः ।

अत्र [2]वार्तिककारः—

यदुक्तं भाष्यकारेण पूर्वपक्षे ऋगादिजातिमधिकृत्यैते धर्मा।

---

1. श्री जै. मी. द. (द्वि. भा.) P. 803
2. Ibid. P. 805

प्रयुक्ता इति तदयुक्तम्। कुतः। '[1]श्रुतेर्जाताधिकारः स्यात्' इति जैमिनिप्रोक्ते सूत्रे जातशब्दस्य समूह इत्येवार्थः, न तु जातिः। यथा द्विवर्णात्मके गोशब्दे उच्चारिते, तत्र गोत्वशब्दत्वजातिर्नास्ति, यथा वा पौरोडाशिकम्' इत्यत्र पुरोडाशसंबन्धप्रतिपादकत्वेन पुरोडाशविलक्षणत्वमेवाङ्गीक्रियते। न तु तत्र पौरोडाशिकत्वमस्ति। तथैव ऋगादिसमुदायेऽपि ऋक्त्वं नास्ति। तथाच ऋगादिसमुदायमधिकृत्यैते धर्माः प्रयुक्ता भवन्तीति पूर्वपक्षो भवति। तस्मात्समुदायवाचकजातशब्दस्य जातिवाचकत्वमिति यद्भाष्यकारेणोक्तं तदयुक्तम्।

[2]अस्मिन्नधिकरणे पार्थसारथिमिश्रैः भाट्टमतमाश्रित्यैवं संशय–सिद्धान्तौ कृतौ। उच्चैस्त्वादय ऋगादिजातानां धार्मा उत वेद धर्मा वेति संशये वेदधर्मा एवेति सिद्धान्तः कृतः।

[3]माधवाचार्यैः, [4]खण्डदेवेन च किमेते मन्त्रधर्मा उत वेदधर्मा वेत्येवमेव विचारः कृतः, न तु जातजातिविषये।

x x x

---

1. श्री. जै. मी. द. (द्वि. भा) P. 803
2. शा. दी. P. 231
3. जै. न्या. वि. P. 162
4. पू. मी. द. (प्र. भा) P. 245

३१. अहीनाधिकरणम् ।

(३-३-८)

अहीनो वा प्रकरणाद्गौणः ।१५। असंयोगात्तु मुख्यस्य तस्मादपकृष्यते ।१६।

श्रुतिलिङ्गवाक्यादीनां विरोधे बलाबलं निरूप्य, इदानीं विरोध एव क्वास्ति क्व नास्तीति विचार्यते । तत्रास्मिन्नधिकरणे प्रकरणस्य श्रुत्यासह विरोधो विचार्यते । ज्योतिष्टेमप्रकरणे' तिस्र एव साह्नस्योपसदो द्वादशाहीनस्य' इति श्रूयते । तत्र किं श्रुत्या द्वादशोपसत्ताऽहीने निविशते, उत प्रकरणाज्ज्योतिष्टोमेवेति संशयः । तिस्र एव साह्नस्योपसदः' इत्यादेः ज्योतिष्टोमप्रकरणे श्रूयमाणत्वात् 'न हीयत' इति व्युत्पत्त्या अहीनशब्दस्य ज्योतिष्टोमार्थकत्वाद्द्वादशोपसत्ताऽपि ज्योतिष्टोम एव भवतीति पूर्वपक्षः ।

यद्यपि 'सिस्र एव साह्नस्योपसदः' इत्यादिः ज्योतिष्टोमप्रकरणे श्रूयते, तथापि 'द्वादशाहीनस्य' इत्यनेन द्वादशोपसात्ताया अहीनसंबन्ध एवावगम्यते । अतश्च मुख्याहीने सम्भवति ज्योतिष्टोमार्थको गोणाहीनो न गृह्यते । तस्माद् द्वादशोपसत्तायाः ज्योतिष्टोमासंबन्धात्प्रकरणादुत्कर्ष एव । अतश्च द्वादशोपसत्तायाः श्रुत्याऽहीने निवेश इति सिद्धान्तः ।

तत्राहीनपदार्थविषये [1]भाष्यकार एवं वदति । न हीयत इत्यहीनः । अर्थाद्यस्मिन् दक्षिणा अधिका भवति, क्रतुकरणान्यधिकानि

---

1. श्री. जै. मी. द. (द्वि. भा) P. 863

भवन्ति, अथवा फलमप्यधिकं भवति सोऽहीन इति । एवं च दक्षिणया ऋतुकरणैर्वा फलेन वा यो न हीयते सोऽहीन इत्यहीनशब्दस्यार्थः ।

अत्र [1]वार्तिककार :–

'दक्षिणया ऋतुकरणैर्वा न हीयत इत्यहीनः' इति भाष्यकाररेणोपन्यस्तोऽहीनशब्दार्थोऽयुक्तः । कुतः । दक्षिणया ऋतुकरणैर्वा नहीयत इत्यत्र गमाकाभावात् । अथवा येन केनापि वा यो न हीयते सोऽहीनः, इति चेदपि न । कुतः । अहीनशब्दस्य समासार्थोऽनवस्थितो भवत्येव । अपिच केषुचन विकृतिऋतुषु सहस्रदक्षिणा श्रूयते । अहीने तु द्वादशशतं-दक्षिणैव । एवंच सहस्रदक्षिणाकविकृतिऋतुभ्योऽहीनो न्यूनदक्षिणाक एव । अन्यच्च ऋतुकरणविषयेऽपि वैकृतिकोक्थ्यादिसंस्थासु ऋतुकरणान्यधिकतया श्रूयन्ते । अहीने त्वल्पान्येव श्रूयन्ते । तथाचाधिकऋतुकरणकोक्थ्यादिसंस्थाभ्योऽहीनो न्यूनऋतुकरणक एव । अतश्च दक्षिणया ऋतुकरणैर्वा न हीयत इति भाष्यकारेणोपन्यस्तोऽहीन शब्दार्थोऽयुक्त इति । तस्मादत्रैवं वक्तव्यं भवति यत् 'योऽन्येषामप्यङ्गदानेन न न्यूनो भवति, अथवा न केनापि यागेन वा परित्यज्यते, सोऽहीनः' इत्यहीन शब्दार्थः । प्रस्तुताहीनोऽप्यन्यऋतूनां विध्यन्तदानेन न न्यूनो भवति । नाप्यन्यऋतुभिर्वा परित्यज्यत इति ।

न हीयत इति व्युत्पत्त्याऽहीनशब्दो ज्योतिष्टोमवचनः । कुतः । न हीयत इत्यस्य प्रकृतज्योतिष्टोमो येन केनापि वा सोमेन न त्यज्यत इत्यर्थः । अतश्चाहीनो ज्योतिष्टोम इत्येवमेव पुर्वपक्षः कृतः [2]पार्थसारथिमिश्रैः, [3]माधवाचार्यैः, [4]खण्डदेवेन च ।

---

1. श्री. जै. मी. द. (द्वि. भा) P. 863
2. शा. दी. P. 249
3. जै. न्या. वि. P. 176
4. पू. मी. द. (प्र. भा) P. 296

[1]शम्भुभट्टस्तु भाट्टमतमेवानुसृतवान् । सहस्रदक्षिणादिक्रतुभ्यः, उक्थ्यादिसंस्थाभ्यश्च ज्योतिष्टोमो न्यूनदक्षिणा क्रतुकरणक एव । अतश्च दक्षिणया क्रतुकरणैर्वा न हीयत इतियद्भाष्यकारेणोक्तं तदयुक्तमेव ।

दक्षिणया क्रतुकरणैर्वा फलेन वा न हीयत इत्यत्र गमकाभावाद्-भाष्यकारपक्षोऽयुक्त एव । अतश्च वार्तिककारोक्तार्थ एव युक्तो भवति । अस्मिन्नधिकरणे पार्थसारथिमिश्रैः, माधवाचार्यैः, खण्डदेवेन च भष्यकारस्य वार्तिककारस्य वा पक्षो न गृहीतः ।

x x x

३२. उत्तरयोः स्तोभातिदेशाधिकरणम्

(९–२–१०)

स्तोभस्यैके द्रव्यान्तरे निवृत्तिमृग्वत् ।३४। सर्वातिदेशस्तु सामान्याल्लोकवद्विकारः स्यात् ।३५। अन्वयं चापि दर्शयति ।३६। निवृत्तिर्वाऽर्थलोपात् ।३७। अन्वयो वाऽर्थवादः स्यात् ।३८।

'यद्योन्यां गायति तदुत्तरयोर्गायति' इत्यत्र यद्गानं योन्यर्चि क्रियते, तदेवोत्तराऋचोरपि कर्तव्यमिति [2]पूर्वाधिकरणे सिद्धे, इदानीं गानकालपूरकस्तोभानामतिदेशोऽस्ति, नवेति विचार्यते । 'य ऋगक्षरेभ्योऽधिकः, न च तैः सवर्णः स स्तोभः' इति स्तोभशब्दस्यार्थः । तत्रो-

---

1. भा. दी. (नि. भा) P. 296
2. श्री. जै. मी. द. (ष. भा) P. 1726

त्तराऋचोः स्तोभा अतिदिश्यन्ते, उत नवेति संशयः । 'रथंतरमुत्तरयोर्गायति' इत्यत्र 'गायति' इति पदेन गानमेवोच्यते । अतश्च सामशब्दस्य गीत्यर्थकत्वादुत्तरा ऋचोः सामैवातिदिश्यते, न तु स्तोभ इति पूर्वपक्षः ।

स्तोभस्य गानकालपूर्त्यर्थकत्वात्साम्नः स्तोभानां चातिदेश इति सिद्धान्तः ।

यद्यपि स्तोभातिदेशः सर्वेषामिष्ट एव तथापि स्तोभातिदेशे युक्ति प्रदर्शयन्[1]भाष्यकार एवमाह । न केवलः गीतेरेव वाचकः सामशब्दः, किन्तु 'ऋक्स्तोभस्वरकालाभ्यासविशिष्टाया गीतेः वाचकः । तस्मात्स्तोभानां सामशब्दार्थान्तर्गतत्वात्साम्नोऽतिदेशे स्तोभानामप्यतिदेशो भवत्येव । तस्मादुत्तरा ऋचोःस्तोभानामतिदेश इति ।

अत्र [2]वार्तिककारः—

ऋक्स्तोभस्वरकालाभ्यासविशिष्टायाः गीतेः सामशब्दो वाचक इति यद्भाष्यकारेणोक्तं तदयुक्तम् । कुतः । 'गीतिषु सामाख्या' इत्यत्र जैमिनिना गीतेरेव सामशब्दार्थकत्वं प्रतिपादितम् । अतश्च सामशब्देन स्तोभा नोच्यन्ते । ननु स्तोभानां सामशब्दार्थकत्वाभावात्कथमतिदेशः । उच्यते । यद्यपि सामशब्दार्थकत्वं स्तोभानां नास्ति, तथापि सामोपकारकत्वमस्त्येव । अतश्च सामातिदेशे तदुपकारकत्वेनैव स्तोभानामतिदेशः, न तु सामशब्दार्थत्वेन । एवं चर्क्स्तोभस्वरकालाभ्यासविशिष्टायाः गीतेः सामशब्दो वाचक इति यद्भाष्यकारेणोक्तं तदयुक्तम् ।

---

1. श्री. जै. मी॰ द. (ष. भा) P. 1727

2. Ibid. P. 1727

अस्मिन्नधिकरणे [1]पार्थसारथिमिश्रैः, [2]माधवाचार्यैः, [3]खण्डदेवेन च स्तोभानां सामाङ्गत्वात्तदुपकारकत्वेनैव स्तोभानामतिदेश इति भाट्टमतमनुसृत्यैव प्रतिपादितम् ।

साम्नः गीत्यर्थकत्वेन न स्तोभवाचकत्वमस्ति । अतश्च स्तोभस्य सामशब्दार्थकत्वमितिभाष्यकारोक्तमयुक्तमेव । तस्मात्सामोपकारकत्वेनैव स्तोभानामतिदेश इति वार्तिककारपक्षो युक्त एव । अस्मिन्नधिकरणे पार्थसारथिमिश्रैः, माधवाचार्यैः, खण्डदेवेन च भाट्टमतमनुसृत्यैव लिखितम् ।

x x x

३३. वैश्यस्तोमे पृष्ठस्तोत्रसाधनतया विहितस्य कण्वरथंतरस्य स्वयोनौ गानाधिकरणम्

(१०–४–२२)

पृष्ठार्थेऽन्यद्रथंतरात्तद्योनिपूर्वत्वात्स्यादृचां प्रविभक्तत्वात् ।४३। स्वयोनौ वा सर्वाख्यत्वात् ।४४। यूपवदिति चेत् ।४५। न कर्मसंयोगात् ।४६।

वैश्यस्तोमे 'कण्वरथंतरं पृष्ठं भवति' इति श्रूयते । तत्र किं कण्वरथंतरगीतिः रथंतरयोनौ बृहद्योनौ वा अनियमेन भवति, उत रथंतर-

1. शा. दी. P. 511

2. जै. न्या. वि P. 481

3. पू. मी. द. (तु-भा) P 118

योनौ, अथवा स्वयोनौ वेति संशयः। तत्र कण्वरथंतरस्य रथंतरबृहद्विकारत्वात्प्रयोगप्राशुभावाय रथंतरे, बृहतिवाऽनियमेन गेयमिति प्रथमः पक्षः। कण्वरथंतरे रथंतरशब्दस्य श्रूयमाणत्वाद्रथंतरविशेष एव कण्वरथंतरमिति ज्ञायते। अतश्च रथंतरयोनावेव कण्वरथंतरं गेयमिति द्वितीयः पक्षः।

रथंतरयोनावेव कण्वरथंतरं गेयमिति द्वितीये पक्षे प्राप्ते [1]भाष्यकार एवमाह। 'प्रस्तावोद्गीथप्रतिहारोपद्रवनिधनवतः सर्वस्य सस्तोभस्वरकालाभ्यासस्य कण्वरथंतरमित्याख्या भवति। अर्थात्सर्वविशेषणविशिष्टरथंतरस्यैव कण्वरथंतरमित्यर्थः। तस्माद्रथंतरकण्वरथंतरयोश्चैकत्वात्कण्वरथंतरस्य योनिऋचि रथंतरगानमेव कर्तव्यमिति सिद्धान्तः।

अत्र [2]वार्तिककारः–

सर्वविशेषणविशिष्टस्य रथंतरस्यैव कण्वरथंतरमित्याख्येति यद्भाष्यकारेणोक्तं तदयुक्तम्। कुतः। रथंतरकण्वरथंतरयोर्भेददर्शनात्। कथम्। 'गीतिषु सामाख्या' इत्यत्र जैमिनिना गीतेः सामैवार्थः, नर्क्, इति प्रतिपादितम्। अतश्च कण्वरथंतरशब्देन कण्वरथंतरसामैवोच्यते, अपि च ऋगन्तरेष्वपि कण्वरथंतरगीतिः प्रयुज्यमाना दृश्यत एव। तथा च रथंतरकण्वरथंतरयो भेदेऽवगते, सर्वविशेषणविशिष्टरथंतरमेव कण्वरथंतरशब्देन नोच्यते। अतश्च स्वयोनावेव कण्वरथंतरं गेयं भवति। तस्माद्रथंतरकण्वरथंतरयोर्भेदात्सर्वविशेषणविशिष्टरथंतरस्यैव कण्वरथंतरमिति यद्भाष्यकारेणोक्तं तदयुक्तम्।

अस्मिन्नधिकरणे [3]पार्थसारथिमिश्रैः, [4]माधवाचार्यैः, [5]खण्डदेवेन

1. श्री जै. मी. द. (ष. भा) P. 1941
2. Ibid. P. 1941
3. शा. दी. P P. 714-715
4. जै. न्या. वि. P.P. 580-581
5. पू. मी. द. (तृ. भा) P.P. 305-306

चाश्वकर्णादिवत्कण्वरथंतरशब्दस्य रूढत्वान्न यौगिकार्थः कल्पनीय इति, कण्वरथंतरं स्वयोनावेव गेयमिति भाट्टमतमाश्रित्य प्रतिपादितम्, न तु भाष्यकारमनुसृत्य ।

ऋगन्तरेषु कण्वरथंतरगीतेर्दृश्यमानत्वाद्रथंतरयोनावेव कण्वरथंतरं गेयमिति भाष्यकारोक्तमयुक्तमेव । अतश्च वार्तिककारपक्ष एव युक्तो भवति । अस्मिन्नधिकरणे सर्वैरपि भाट्टमतमेवाश्रितम् ।

X X X

षष्ठभागः

पूर्वपक्षोपोब्दलकयुक्तीनां खण्डनम्

३४. ग्रहैकत्वाधिकरणम्

(३-१-७)

एकत्वयुक्तमेकस्य श्रुतिसंयोगात् ।१३। सर्वेषां वा लक्षणत्वादविशिष्टं हि लक्षणम् ।१४। चोदिते तु परार्थत्वाद्यथाश्रुति प्रतीयेत ।१५।

ज्योतिष्टोमे 'दशापवित्रेण ग्रहं संमार्ष्टि' इति श्रूयते । तत्र किं संमार्जनं ग्रहस्य ग्रहाणां वेति विचार्यते । अतश्च 'ग्रहम्' इत्यत्रैकत्वं विवक्षितमुताविवक्षितमिति संशयः क्रियते । तत्र 'ग्रहम्' इत्यत्रैकत्व-श्रुतिसंयोगादेको ग्रहः संमार्जनीय इति पूर्वपक्षः ।

यद्यप्येकत्वं श्रूयते, तथापि कोऽयं स एको ग्रह इत्यत्र प्रमाणाभावा-त्सर्वग्रहाणामुपस्थितिर्भवति । तथाचोद्देश्यगतैकत्वस्याविवक्षितत्वात्सर्वे ग्रहाः संमार्जनीया एवेति सिद्धान्तः ।

सर्वेषां ग्रहाणां च संमार्गे प्राप्ते [1]भाष्यकारः पुनरेवमाक्षिप्य समा-दधाति । यथा 'इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते' इत्यत्राऽऽदाने मन्त्रस्य लिङ्गादेव प्राप्तत्वादश्वाभिधान्यामेव मन्त्रस्य विनियोगः क्रियते, आदाने च परिसंख्या क्रियते । तथा 'ग्रहम्' इत्यत्रा-प्येकस्मिन्नेव ग्रहे संमार्गे प्राप्ते द्वितीयादिग्रहेषु संमार्गस्य परिसंख्यैव भवति । अतश्चैको ग्रहः संमार्जनीयो भवतीत्याक्षिप्यैवं समादधाति । यद्येकत्वं विधीयेत, तदा द्वितीयादिग्रहाणां परिसंख्या स्यात् । 'ग्रहम्'

---

1. श्री जै. मी. द. (द्वि. भा) P. 710

इत्यत्रैकत्वस्याविधीयमानत्वान्न द्वितीयादिग्रहाणां परिसंख्या भवति । सर्वे ग्रहाश्च संमार्जनीया एव भवन्ति ।

अत्र [1]वार्तिककारः–

यदप्युक्तं भाष्यकारेण वाक्यभेदं कृत्वा मन्त्रस्य 'अश्वाभिधान्यामेव विनियोगः, नाऽऽदाने' इति तदयुक्तम् । कुतः । 'आदत्ते' इत्यत्राऽऽख्यातश्रवणाद्विधित्वं संभवति । अतश्च मन्त्रस्याऽऽदान एव विनियोगः कर्तव्यो भवति । अश्वाभिधान्यान्तु मन्त्रस्य विनियोगे विधायकं किमपि नास्ति । अपिच मन्त्रस्याऽऽदाने लिङ्गात्प्राप्तिरेव नास्ति । कुतः । श्रुतेरेव पूर्वं प्रवृत्तत्वाल्लिङ्गप्रमाणं दुर्बलं भवति । यावल्लिङ्गं श्रुतिं कल्पयित्वा प्रवर्तते, तावत्पूर्वमेव प्रत्यक्षश्रुत्या मन्त्रस्य विनियोगो भवति । अतश्चाऽऽदाने मन्त्रस्य लिङ्गात्प्राप्तिरेव नास्ति । यदि लिङ्गात्प्राप्तिः स्यात्तदाऽऽदाने मन्त्रस्य परिसंख्या स्यात् । अतश्च नात्र वाक्यभेदोऽङ्गीक्रियते । अश्वाभिधान्यमेव मन्त्रस्य विनियोगः, नाऽऽदाने इति । तस्मादश्वरशनामन्त्रधात्वर्थविशिष्टा भावनैवैका विधीयते । गर्दभाभिधान्यान्तु मन्त्रस्य निवृत्तिः फलतः परिसंख्ययैव । अतश्च 'मन्त्रस्याश्वाभिधान्यामेव, नाऽऽदाने' इति यद्भाष्यकारेणोक्तं तदयुक्तम् ।

अस्मिन्नधिकरणे [2]पार्थसारथिमिश्रैः, [3]माधवाचार्यैश्च सर्वे ग्रहाः संमार्जनीया इत्येव विचारः कृतः, न तु भाष्यकारोक्ताश्वाभिधानीमुदाहृत्य ।

[4]खण्डदेवेन तावद्भाट्टमतमाश्रित्यैवं प्रतिपादितम् । इत्यश्वा-

---

1. श्री जै. मी. द. (द्वि. भा) P.P. 710-711
2. शा. दी. P. 193
3. जै. न्या. वि. P. 135
4. पू. मी. द. (प्र. भा) P. 192

ि.धानीमादत्ते' इत्यत्र परस्परान्वयस्य व्युत्पन्नत्वात्सर्वविशेषणविशिष्टैव भावना विधीयते। यत्र च परस्परान्वयो न व्युत्पन्नः 'यस्योभयं हविरार्तिमार्छेद्ग्रहम्' तत्रैव वाक्यभेदो भवति। अतश्च 'इत्यश्वाभिधानीमादत्ते' इत्यत्र वाक्यभेदाभावाद्भाष्यकारोक्तमयुक्तमेव।

मन्त्रस्याऽऽदाने लिङ्गात्प्राप्तेरेवाभावात्, तदस्तीति कृत्वा 'मन्त्रस्याश्वाभिधान्यामेव विनियोगः, नाऽऽदाने' इति भाष्यकारोक्तो वाक्यभेदपक्षोऽयुक्त एव। अतश्चाऽऽदाने मन्त्रस्य फलतः परिसंख्यैवेति वार्तिककारपक्षो युक्त एव। अस्मिन्नधिकरणे पार्थसारथिमिश्रैः, माधवाचार्यैश्च भाष्यवार्तिकोभयमतेनापि विचारो नैव कृतः।

x x x

३५. प्रयाजादिधर्माणामुपदेशेन प्रकृतिमात्रार्थताधिकरणम्

(७-१-१)

श्रुतिप्रमाणत्वाच्छेषाणां मुख्यभेदे यथाधिकारं भावः स्यात् ।१। उत्पत्त्यर्थाविभागाद्वा सत्त्ववदैकधर्म्यं स्यात् ।२। चोदनाशेषभावाद्वा तद्भेदाद्व्यवतिष्ठेरन्नुत्पत्तेर्गुणभूतत्वात् ।३। सत्त्वे लक्षणसंयोगात्सार्वत्रिकं प्रतीयेत ।४। अविभागात्तु नैवं स्यात् ।५। द्व्यर्थत्वं च विप्रतिषिद्धम् ।६। उत्पत्तौ विध्यभावाद्वा चोदनायां प्रवृत्तिः स्यात्ततश्च कर्मभेदः स्यात् ।७। अर्थस्य त्वविभक्तत्वात्तथा स्यादभिधानेषु पूर्ववत्त्वात्प्रयोगस्य कर्मणः शब्दभाव्यत्वाद्विभागाच्छेषाणामप्रवृत्तिः

स्यात् ।८। स्मृतिरिति चेत् ।९। न पूर्ववत्त्वात् ।११।
अर्थस्य शब्दभाव्यत्वात्प्रकरणनिबन्धनाच्छब्ददेवान्यत्र
भावः स्यात् ।१२।

प्रथमाध्यायादारभ्य षष्ठाध्यायपर्यन्तं प्रत्यक्षविहितधर्माणां-दर्शपूर्णमासादीनामितिकर्तव्यता चिन्तिता । इतः परं सप्तमाध्यायादा-रभ्यातिदेशविचारः क्रियते । यदि दर्शपूर्णमासप्रकरणाम्नातधर्मैरेव ऐन्द्राग्न्यादयोऽपि धर्मवन्तो भवन्ति, तदोत्तरषट्केन प्रयोजनं नास्ति । यदि च ये धर्मा यस्मिन्नेव प्रकरणे समाम्नातास्ते तत्रैवोक्ता भवन्ति, नान्यत्र । तदा ऐन्द्राग्न्यादिषु के कियन्तो वा कथंचानुष्ठेया भवन्तीति विचारः कर्तव्यो भवति । अतश्चास्मिन्नध्याये ऐन्द्राग्न्याद्यर्थत्वेन धर्मा-स्सन्तीति निरूप्यते । तदर्थं किमेते प्रयाजादिधर्मा अपूर्वप्रयुक्ताः, उत यजिप्रयुक्ता वेति विचार्यते । यदि यजिप्रयुक्तास्तत इमे धर्माः सर्वार्था भवन्ति । यद्यपूर्वप्रयुक्तास्ततो यथा प्रकरणं धर्माणां व्यवस्था भवति । अतश्च प्रयाजादिधर्मा अपूर्वप्रयुक्ता उत यजिप्रयुक्ता वेति संशयः । तत्र प्रयाजादिधर्मा अपूर्वप्रयुक्ता एवेति सिद्धान्तेनैवोपक्रमः । अपूर्वं हि फलवत्, न यजिः । फलवत्यपूर्वे च क्रियमाणा धर्मा अर्थवन्तो भवन्ति । अतश्चापूर्वप्रयुक्ताः प्रयाजादयो धर्माः । तथा च तेषां प्रकरण एव निवेश इति सिद्धान्तः । एवंच ऐन्द्राग्न्यादिषु धर्माभावादतिदेशेन धर्माः भवन्त्येव । तथाचातिदेशविचारः कर्तव्य एव भवति ।

अस्मिन्नधिकरणे द्वौ विचारविषयौ वर्तेते ।
तत्रायं प्रथमविषयो विचार्यते ।

अपूर्वप्रयुक्ता एव धर्मा भवन्तीति सिद्धान्ते प्राप्ते, यजिप्रयुक्ता एव धर्मा भवन्तीति सिद्धान्तोपरि पूर्वपक्षं कुर्वन् [1]भाष्यकार एवमाह ।

---

1. श्री. जै. मी. द. (च. भा) P. 1526

सर्वे धर्माः सर्वार्थाः । कुतः । उत्पत्त्यर्थाविभागात् । अपूर्वस्योत्पादनादुत्पत्तिशब्दस्य यजिरर्थः । यजिप्रयोजनत्वाच्चार्थशब्दस्यापूर्वमर्थः । अतश्च तयोरविभागात्सर्वाण्यपूर्वाणि यजिमन्ति भवन्ति । यजिसंबन्धश्च सर्वापूर्वाणां तुल्यत्वात्सर्वे धर्माः सर्वार्था भवन्तिः । अपूर्वे च धर्मानुष्ठानं नैव युज्यते । अतश्चापूर्वे चासंभवन्तो यागे क्रियन्ते । तस्मादपि प्रयाजादिधर्मा यजिप्रयुक्ता एव । तस्मात्प्रयाजादिधर्माणां यजिप्रयुक्तत्वेन सर्वार्थत्वात्सर्वे धर्माः सर्वार्था भवन्त्येव ।

अत्र [1] वार्तिककारः–

सर्वेषामपूर्वाणां यजिमत्वस्य तुल्यत्वाद्यजिसंबन्धोऽपि सर्वापूर्वाणां तुल्य एव । अतश्च सर्वे धर्माः सर्वार्था भवन्तीति यदुक्तं भाष्यकारेण तदयुक्तम् । याग एव ह्यपूर्वेणाविनाभूतः, नापूर्वं यागेन । अतश्च सर्वापूर्वाणां यागसंबन्धाभावाद्धर्माणामपि यजिप्रयुक्तत्वं नास्त्येव । तथाच धर्माणां यजिप्रयुक्तत्वाभावात्सर्वे सर्वार्था न भवन्त्येव । अपिच सर्वाण्यपूर्वाणि यजिमन्तीत्युक्ते 'समिधो यजति' इत्यत्रापि यागसंबन्धावगमात्प्रधानेनापूर्वेण संबन्धः स्यात् । तत्तु नास्त्येव । तस्मात्सर्वाण्यपूर्वाणि यजिमन्तीन्यत्रैवं वक्तव्यं भवति यद्यान्येवापूर्वाणि यागाविनाभूतानि तान्येव यजिमन्ति भवन्ति, न सर्वाणि । अपिच 'अपूर्वे चासंभवन्तो यागे धर्माः क्रियन्ते' इत्येतदप्ययुक्तमेव । कुतः । अन्यत्रापूर्वे श्रुता अन्यत्र यागे कृताः स्युः । तस्मात्तत्रैवं वक्तव्यं भवति यद्यागस्यैव शक्तिरपूर्वं भवति । शक्तिमति यागे क्रियमाणा धर्मा नाश्रुते कृता भवन्ति । तस्मादपूर्वे चासंभवन्तो यागे क्रियन्त इति यदुक्तं तदप्ययुक्तमेव । एवंच 'सर्वाण्यपूर्वाणि यजिमन्ति' इति, 'अपूर्वे चासंभवन्तो यागे क्रियन्ते' इति च यदुक्तं भाष्यकारेण तदुभयमप्ययुक्तमेव ।

---

1. श्री. जै. मी. द. (च. भा) P.P. 1526-1528

[1]पार्थसारथिमिश्रैस्तु व्रीह्यादिद्रव्याणां यागसंबन्धस्यैवावगमाद्धर्मा अपि याजिप्रयुक्ता एव भवीन्तत्यनेन प्रकारेणैव पूर्वपक्षः कृतः, न तु भाष्यकारोक्तरीत्या ।

[2]माधवाचार्यैस्तावदवघातपेषणादीनां यज्यन्वयस्य दृष्टत्वात्प्रयाजादीनामपि तथैव यज्यन्वयस्य संभवात्सर्वे धर्माः सर्वार्था भवन्तीत्येवमेव पूर्वपक्षः कृतः, न तु भाष्यकारोक्तरीया ।

[3]खण्डदेवेन तावत्प्रयाजादिधर्माणं यजिप्रयुक्तत्वमुतापूर्वप्रयुक्तत्वं वेत्यत्रोपेक्षा कृता । कुतः । यजिप्रयुक्तत्वेऽपि प्रकृतयजिप्रयुक्तत्वोपपत्तेः, इतरथाऽपूर्वप्रयुक्तत्वेऽपि तदनापत्तेर्नाविमिकेन पौनरुक्त्यापत्तेश्च ।

सर्वापूर्वाणां यजिमत्वाभावाद्भाष्यकारोक्तपक्षद्वयमप्ययुक्तमेव । अतश्च वार्तिककारोक्तपक्षद्वयमपि युक्तमेव । अस्मिन्नधिकरणे पूर्वपक्षः पार्थसारथिमिश्रैः, माधवाचार्यैश्च युक्त्यन्तरेण कृतः, न तु भाष्यकारीययुक्त्या । पुनरुक्त्यादिदोषपरिहाराय खण्डदेवेनास्मिन् विषये उपेक्षाकृता । अतश्च कस्यापि पक्षो खण्डदेवेन न स्वीकृतः ।

तत्रैव द्वितीयो विचारः–

प्रयाजादिधर्मा यजिप्रयुक्ता एवेति पुनः पूर्वपक्षं कुर्वन् [4]भाष्यकार एवमाह । 'गौर्न पदा स्प्रष्टव्यः' इत्येवमादयः सत्वाधर्माः गोत्वसंबन्धेन श्रूयमाणास्तत्रासंभवन्तस्तत्संबद्धेषु पिण्डेषु विज्ञायन्ते । अतश्चासावाकृतिः

1. शा. दी. P. 525

2. जै. न्या. वि. P. 405

3. पू. मी. द. (तु. भा) P.

4. श्री. जै. मी. द. (च भा) P.P. 1530-1531

स्॒वारिपिण्डलक्षणार्था भवति । तथाच सर्वगोपिण्डेषु सत्वधर्मा भवन्त्येव । इह तु यजेर्गुणभावेन श्रवणान्न यजौ धर्माः श्रूयन्ते । तस्मा-त्सत्ववदेव धर्मा भवन्तीति नोपन्यस्तव्यः ।

अत्र [1]वार्तिककारः–

आकृतौ धर्मस्यासभवादसावाकृतिः सहचारिपिण्डलक्षणार्था भवतीति यद्भाष्यकारेणोक्तं तदप्ययुक्तमेव । कुतः । यद्याकृतौ धर्मासंभवादसावाकृतिर्लक्ष्यते, तदा सर्वगोपिण्डेषु धर्माः कर्तव्या भवन्ति । तथाचाऽऽलम्भनं सर्वपशुष्वपि भवेत् । एवंचानेन न्यायेन धर्माणामतिप्रसक्तिः स्यात् । तस्मादाकृतिः सहचारिपिण्डणक्षणार्था भवतीति यदुक्तं भाष्यकारेण तदयुक्तम् ।

अस्मिन्नधिकरणे [3]पार्थसारथिमिश्रैः, [3]माधवाचार्यैः [4]खण्डदेवेन च सर्वेषां धर्माणां सर्वत्रानुष्ठेयत्वान्नातिदेशविचारः कर्तव्य इति पूर्वपक्षे प्रति-पादितम्, न तु भाष्यकारोक्तरीत्या ।

यद्याकृतिः, सहचारिपिण्डलक्षणार्था भवतीत्युक्ते धर्माणामति-प्रसक्तिः स्यात् । तस्माद्भाष्यकारपक्षोऽयुक्त एव । अतश्च वार्तिक-कारपक्ष एव युक्तो भवति । अस्मिन्नधिकरणे च पार्थसारथिमिश्रैः, माधवाचार्यैः, खण्डदेवेन च भाष्यकारवार्तिककारयोर्न कस्यापि पक्षो गृहीतः ।

x x x

---

1. श्री. जै. मी. द. (च. भा) P.P. 1530-1531
2. शा. दी. P.P. 522-525
3. जै. न्या. वि. P.P. 405-406
4. पू. मी. द. (द्वि. भा) P.P. 337-339

३६. काम्यगुणानां विकृतावनतिदेशाधिकरणम्

(८-१-१४)

गुणकामेष्वाश्रितत्वात्प्रवृत्तिः स्यात् ।२३। निवृत्तिर्वा कर्मभेदात् ।२४। अपि वाऽतद्विकारत्वात्क्रत्वर्थत्वा-त्प्रवृत्तिः स्यात् ।२५।

दर्शपूर्णमासयोः 'चमसेनापः प्रणयेद्गोदोहनेन पशुकामस्य' इति श्रूयते। तत्र गोदोहनस्य विकृतावतिदेशोऽस्ति नवेति विचार्यते। किं विकृतौ सौर्येष्टौ गोदोहनमतिदिश्यते, उत नेति संशयः। गोदोहनं प्रणयनाश्रितम्। प्रणयने प्रवर्तमाने तदाश्रितं गोदोहनमपि प्रवर्तत एवेति पूर्वपक्षः।

चमसः क्रत्वर्थः। गोदोहनं पुरुषार्थः। अतश्च चमसगोदोहनयोः कार्यभेदात्प्रणयने विकृतावतिदिष्टे तदाश्रितः चमस एव प्रवर्तते, न तु क्रत्वनङ्गभूतगोदोहनम्। एवं च विकृतौ सौर्येष्टौ गोदोदनं न भवतीति सिद्धान्तः।

तत्र 'प्रणयने प्रवर्तमाने तदाश्रितं गोदोहनमपि प्रवर्तते 'इत्यस्मिन् पूर्वपक्षे तदुपोब्दलकतया 'भाष्यकारो युक्त्यन्तरं दर्शयन्नेवमाह। 'खादिरं वीर्यकामाय यूपं कुर्यात्' इत्यत्र यथा तस्मिन् खादिरे प्रवर्तमाने तदाश्रितः वीर्यरुपः कामोऽपि प्रवर्तते, तथैव प्रणयने प्रवर्तमाने तदाश्रितं गोदोहनमपि प्रवर्तत एवेति।

---

1. श्री. जै. मी. द. (प. भा) P. 1598

अत्र [1]वार्तिककार :–

तस्मिन्प्रवर्तमाने तदाश्रितः कामोऽपि प्रवर्तेत इति यद्भाष्यकारेणोक्तं तदयुक्तम् । कुतः । यदि वीर्यकामः खदिरार्थः स्यात्तदा खादिरे प्रवर्तमाने वीर्यकामोऽपि प्रवर्तेत । किन्तु खदिर एव वीर्यकामार्थः । अतश्च वीर्यरूपकामस्य खदिरार्थत्वाभावान्न खादिरे प्रवर्तमाने वीर्यकामः प्रवर्तते । ननु यत्क्रत्वर्थस्तदेवातिदिश्यते । खदिरस्य पुरुषार्थत्वात्कथमतिदेशः । उच्यते । यद्यपि खदिरो न साक्षादन्वेति, तथापि यूपद्वाराक्रत्वर्थत्वात्तेनैवान्वेति । अतश्च वीर्यकामस्य खदिरार्थत्वाभावात्खदिरे प्रवर्तमाने वीर्यकामो न प्रवर्तते । एवं च तस्मिन्प्रवर्तमाने तदाश्रितः कामोऽपि प्रवर्तेत इति यद्भाष्यकारेणोक्तं तदयुक्तम् ।

अस्मिन्नधिकरणे [2]पार्थसारथिमिश्रैः भाट्टमतमाश्रित्यैवं प्रतिपादितम् । पुरुषार्थांशस्यातिदेशाभावाद्विकृतौ च प्रणयनाभावात्कथं गोदोहनतत्फलयोः प्रवृत्तिः । तस्माद्विकृतौ गुणकामानामप्रवृत्तिरेव ।

[3]खण्डदेवेनापि विकृतावाश्रयाभावाद् गुणकामानामप्रवृत्तिरिति भाट्टमतानुसारेणैव प्रतिपादितम् ।

[4]माधवाचार्यैस्तु गोदोहनादीनां पुरुषार्थत्वेन क्रत्वङ्गत्वाभावान्न तेषां प्रवृत्तिरिति प्रतिपादितम् ।

वीर्यकामस्य खदिरार्थत्वाभावात्खदिरे प्रवर्तमाने वीर्यकामोऽपि

---

1. श्री. जै. मी. द. (ष भा) P. 1598

2. शा. दी. P 558

3. पू. मी. द. (तृ. भा) P. 9

4. जै. न्या. वि. P. 430

प्रवर्तत इति भाष्यकारपक्षोऽयुक्त एव। अतश्च खदिरे प्रवर्तमाने वीर्यकामो न प्रवर्तत इति वार्तिककारपक्षो युक्त एव। अस्मिन्नधिकरणे पार्थसारथिमिश्रैः, माधवाचार्यैः, खण्डदेवेन च भाट्टमतमाश्रित्यैव प्रतिपादितम्।

x x x

३७. दर्शपूर्णमासादिष्वाग्नेयादीनां समुच्चितानामेकस्वर्गफलकत्वाधिकरणम्

(११–१–१)

प्रयोजनाभिसंबन्धात्पृथक्सतां ततः स्यादैककर्म्यमेकशब्दाभिसंयोगात् ।१। शेषवद्वा प्रयोजनं प्रतिकर्म विभज्यत ।२। अविधानात्तु नैवं स्यात् ।३। शेषस्य हि परार्थत्वाद्विधानात्प्रतिप्रधानभावः स्यात् ।४।

'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यत्र किं फलं विधीयते, उत यागो वेत्यत्र [1]भाष्यकार एवमाह। दर्शपूर्णमासवाक्ये च 'यजेत' इत्यत्र श्रुत्या यागो विधीयते। वाक्येन च फलम्। फलविधाने च यजत्यर्थोऽनूद्येत। यजत्यर्थविधाने चाऽऽग्नेयादयः समुदायवचनेन शब्देन फलनिर्वृत्तावुपादेयत्वेन चोद्यन्ते। तस्माच्छ्रुतिवाक्ययोर्विरोधे वाक्यस्य विलंबितप्रतिप्रत्तिकत्वाच्छ्रुतिरेव बलीयसी। अतश्च श्रुत्या वाक्यस्य बाधसंभवाद्याग एव विधीयते। यद्याग्नेयादयो यागा विधीयन्ते, तदा कथं दर्शपूर्णमासशब्देन विशेष्टुं शक्यते। अत्र तावद्विशेषणं दर्शपूर्णमास-

---

1. श्री जै. मी. द. (ष. भा) P.P. 2101-2102

शब्दो न विधीयते। यदि विशेषणमप्यविधीयमानं भवति, तदा विधीयमानस्य यागस्य दर्शपूर्णमासशब्दो कथं विशेषणं भवितुमर्हति। ननु द्वावपि विधीयेते। न। द्वयोर्विधीयमानयोः परस्परसंबन्धो नैव भवति। तर्हि किं पुनरत्र विशेषणेन कार्यम्। यावता रुपवतामाग्नेयादीनां संनिधावरूपो 'दर्शपूर्णमासाभ्यां यजेत' इति यजतिशब्दः समुदायवचनः। एवं च दर्शपूर्णमासशब्दोऽनर्थकः, नित्यानुवादमात्रं च स्यात्। तस्माद्दर्शपूर्णमासशब्दस्याऽऽनर्थक्यादिपरिहाराय, दर्शपूर्णमासवाक्ये वाक्यार्थ एव परिगृह्यते। तदा च दर्शपूर्णमासशब्दो यागविशेषणेनार्थवान् भवत्येव। यद्यपि यजति शब्दो भावनाविधानार्थैव, तथापि पुनः श्रुतिः दर्शपूर्णमासशब्दस्य यागवचनत्वादनर्थिका न भवति। एवं च दर्शपूर्णमासो याग इति वाक्यार्थः सम्भवति।

अत्र [1]वार्तिककारः–

यदप्युक्तं भाष्यकारेण द्वयोर्विधीयमानयोः परस्परसंबन्धो नैव भवति, इति, किं पुनरत्र विशेषणेन कार्यम्' इति च तदयुक्तम्। कुतः। 'अरुणया पिङ्गाक्ष्यैकहायन्या गवा सोमं क्रीणाति' इत्यत्राऽऽरूण्यं विधीयते, पिङ्गाक्षित्वं विधीयते, एकहायनीत्वं च। तेषां सर्वेषां प्रथमं भावनायामन्वयः। ततश्च परस्परान्वयः। याऽरुणा सा पिङ्गाक्षी। या पिङ्गाक्षी साऽरुणेत्येवमरुणावाक्ये विधीयमाना आरुण्यादयः सर्वेऽपि परस्परान्वयं प्राप्नुवन्त्येवेति पूर्वमेव प्रतिपादितत्वाद्द्वयोर्विधीतमानयोः परस्परसंबन्धो न भवतीति यदुक्तं भाष्यकारेण तदयुक्तम्। अपि च 'किं पुनरत्र विशेषणेन कार्यम्' इत्यपि यदुक्तं तदप्ययुक्तमेव। कुतः। यथैव हि द्रव्यदेवताभ्यारूपवत्वमाग्नेयादीनां वर्तते, तथैव हि प्रयाजादीनामपि रुपवत्व-

---

1. श्री जै. मी. द. (ष. भा) P.P. 2101-2202

मस्त्येव । अतश्च दर्शपूर्णमासवाक्ये विशेषणाभावे प्रयाजादीनामपि फल-संबः : स्यात् । अतश्चेतिकर्तव्यतात्वेन श्रुतानां प्रयाजादीनां फल-संबन्धपरिहाराय दर्शपूर्णमासशब्दो न विशेषणेन भवितव्यमेव । ननु कथं दर्शपूर्णमासशब्दो यागेनान्वेति । उच्यते । अरुणान्यायवदेव परस्पर-निरपेक्षाणां सर्वेषामपि प्रथमं भावनान्वयः । ततश्च परस्परान्वयो भवत्येव । एवंच दर्शपूर्णमासशब्दस्य विशेषणेनान्वयस्य सिद्धत्वात् 'किं पुनरत्र विशेषणेन कार्यम्' इति युदुक्तं भाष्यकारेण तदप्ययुक्तमेव ।

अपिच दर्शपूर्णमासवाक्ये वाक्यार्थ एव परिगृह्यत इति यदुक्तं तदप्ययुक्तमेव । ननु श्रुत्यर्थे परिगृह्यमाणे दर्शपूर्णमासशब्दोऽनर्थकः स्यात् । न । आग्नेयादिवदेव प्रयाजादीनामपि फलसंबन्धापत्तेः, सर्वेषां भावनान्वयानन्तरं विशेषणत्वेन दर्शपूर्णमासशब्दस्यान्वयदर्शनान्न वाक्यार्थः परिगृह्यते । अतश्च श्रुत्यर्थे परिगृह्यमाणे दर्शपूर्णमासशब्दोऽनर्थक इति यदुक्तं भाष्यकारेण तदप्ययुक्तमेव ।

तस्माद् 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यत्र सर्वविशेषण-विशिष्टा यागभावनैवैका विधीयते । तस्माद्वाक्यार्थोऽपि नैव गृह्यते ।

अस्मिन्नधिकरणे[1]पार्थसारथिमिश्रैः, [2]माधवाचार्यैः, [3]खण्डदेवेन च दर्शपूर्णमासयोः श्रूयमाणाऽऽग्नेयादीनां स्वर्गाख्यं फलं तन्त्रेणैव भवतीति सिद्धान्तः कृतः । न तु भाष्यवार्तिककारोक्तरीत्या विचारः कृतः ।

दर्शपूर्णमासवाक्ये श्रुत्यर्थे संभवति नैव वाक्यार्थो परिगृह्यते ।

---

1. शा. दी. P.P. 393-396
2. जै. न्या. वि. P.P. 646-647
3. पू. मी. द. (ष. भा) P.P. 130-131

अरुण..थायवदेव परस्परान्वयोऽपि संभवति। एवं च दर्शपूर्णमासवाक्ये वाक्यार्थ एव परिगृह्यते, इति, द्वयोर्विधीयमानयोः परस्परसंबन्धो नैव भवति' इति च भाष्यकारपक्षोऽयुक्त एव। अतश्च दर्शपूर्णमासवाक्ये वार्तिककारपक्ष एव युक्तो भवति। अस्मिन्नधिकरणे पार्थसारथिमिश्रैः, माधवाचार्यैः, खण्डदेवेन च भाष्यवार्तिककारयोर्न कस्यापि पक्षः स्वीकृतः।

X X X

सप्तमभागः

प्रसङ्गविचाराणां खण्डनम्

३८ ऋत्विक्संख्यानियमाधिकरणम्

(३-७-९)

तत्रार्थात्कर्तृपरिमाणं स्यादनियमोऽविशेषात् ।२१। अपि वा श्रुतिभेदात्प्रतिनामधेयं स्युः ।२२। एकस्य कर्मभेदादिति चेत् ।२३ नोत्पत्तौ हि ।२४।

ज्योतिष्टोमादौ यजमानपरिक्रीतऋत्विक्संख्याविषये विचार्यते। तत्र किं ऋत्विक्संख्यानियमोऽस्ति, उत नास्तीति संशयः। तत्र ऋत्विक्संख्यावाचकपदाभावादनियमेन ऋत्विजां प्राप्तिरिति पूर्वपक्षः।

'तान् पुरोऽध्वर्युर्विभजति' 'इत्यादिना यावन्ति कर्तृनामधेयानि कर्माणि श्रूयन्ते, तावन्तर्त्विजो वरीतव्या भवन्त्येव। अतश्च ज्योतिष्टोमादौ नियमागतनियतसंख्याकऋत्विज एवेति सिद्धान्तः।

ज्योतिष्टोमादौ नियमेनैतावन्त एव ऋत्विजो भवन्तीति सिद्धान्ते प्राप्ते, ऋत्विग्वरणविधौ [2]भाष्यकार एवं वदति। 'अध्वर्युं वृणीते, होतारं वृणीते' इत्येवमादौ यद्यध्वर्य्वादीनां वरणे संकीर्तनं श्रूयते, तथाप्यध्वर्य्वादयो न विधीयन्ते। कुतः। 'ऋत्विजो वृणीते' इत्यनेन ज्योतिष्टोमादौ ऋत्विजां वरणविधानात्। अतश्च ऋत्विजां वरणविधिश्रवणात्पुनः 'अध्वर्युं वृणीते' इत्यादिभिरध्वर्य्वादीनां वरणे विधानं नैव सम्भवति। तस्मादध्वर्य्वादीनां वरणे संकीर्तनं न विधिरिति।

---

1. श्री. जै. मी. द. (तृ. भा.) P. 1089
2. Ibid P. 1090-1091

अत्र [1]वार्तिककारः—

'अध्वर्यु वृणीते' इत्येवमादौ यद्यप्यध्वर्य्वादयो वरणे श्रूयन्ते, तथापि न नेषां वरणे विधानमिति यद्भाष्यकारेणोक्तं तदयुक्तम्। कुतः। यद्यध्वर्य्वादीनां वरण एव विधानं न स्यात्तदाऽध्वर्य्वादीनां नियमेन प्राप्तिर्न स्यात्। अपि च यदि 'ऋत्विजो वृणीते' इतीदमेव वरणविधायकं स्यात्तदा 'अध्वर्यु वृणीते' इत्यादिवाक्यराशेः संख्यामात्रप्रत्यायनमेव फलं स्यात्। तच्चायुक्तम्। अतश्च 'अध्वर्यु वृणीते' इत्यादिनाऽध्वर्य्वादीनां वरणमेव विधीयते। तथा च वरणविधिना अनुनिष्पादिनी संख्या 'ऋत्विजो वृणीत' इत्यादिनाऽनूद्यते। 'ऋत्विजो वृणीते' इत्यत्रैव वरणविधाने प्रयोजनाभावान्न तत्र वरणविधिरिति। एवं च 'अध्वर्यु वृणीते' इत्यत्रैवं वक्तव्यं भवति यदनेन वरणं विधीयते, तच्चाध्वर्योरिति। एवंचाध्वर्युविशिष्टा वरणविधिरिति ज्ञायते। तस्मादध्वर्य्वादीनां वरणे संकीर्तनं न विधिरिति यद्भाष्यकारेणोक्तं तदयुक्तम्।

अस्मिन्नधिकरणे [2]पार्थसारथिमिश्रैः यावद्वरणं कर्तारो वरीतव्या इत्येवमेव प्रतिपादितम्, न तु वरणविधायकं वचनं किमिति।

[3]खण्डदेवेन तावद्भाट्टमतमाश्रित्यैवं प्रतिपादितम्। 'अध्वर्युवृणीते' इत्यादिभिरेवाध्वर्य्वादीनां वरणे विधानाद् 'ऋत्विजो वृणीते' इतीदं वरणविधायकं न भवति। अन्यथा 'ऋत्विजः' इति बहुवचनानुवादानुपपत्तेः। इति।

[4]माधवाचार्यैस्तावत् 'ज्योतिष्टोमादौ यावन्ति कार्याणि वर्तन्ते,

1. श्री. जै. मी. द. (तृ. भा) P.P. 1090-1091
2. शा. दी. P. 323
3. पू. मी. द. (तृ. भा) P. 49
4. जै. न्या. वि. P.P. 225

ताक्स्त्विजो वरीतव्या इत्येवमेव विचारः कृतः, न तु ऋत्विग्वरणविधायकं वचनं किमिति ।

अध्वर्य्वादीनां वरणे विधानं नास्तीति भाष्यकारपक्षोऽयुक्त एव । अन्यथा अध्वर्य्वादीनां नियमेन प्राप्तिर्न स्यात् । अतश्च तेषां वरणे विधानमेवेति वार्तिककारपक्षो युक्त एव । अस्मिन्नधिकरणे खण्डदेवेनैव भाट्टमतमाश्रित्य प्रतिपादितम् । पार्थसारथिमिश्रैः, माधवाचार्यैर्वा भाष्यमतमनुसृत्य, वार्तिककारमतमनुसृत्य वा न प्रतिपादितम् ।

x x x

३९. तिर्यगधिकरणम्

(६–१–२)

फलार्थत्वात्कर्मण. शास्त्रं सर्वाधिकारं स्यात् ।४।
कर्तुर्वा श्रुतिसंयोगाद्विधिः कात्स्न्येन गम्यते ।५।

फलभोक्तृत्वसमानाधिकरणकर्तृत्वरूपेऽधिकारे ।सिद्धे 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यादौ स चाधिकारः केषामिति विचार्यते । तत्र यावत्किंचित्सत्वं तत्सर्वमधिकृत्यैतदुत समर्थमधिकृत्यैव वेति संशयः । एकस्यैवाधिकार इत्यत्र गमकाभावात्सर्वेषामधिकारः । अथवा वृक्षादीनां कामनाभावान्मास्त्वधिकारोऽचेतनानाम् । तथा च कामनावतां तिरश्चामप्यधिकार इति पूर्वपक्षः ।

यः कृत्स्नं कर्माभिनिर्वर्तयितुं समर्थो भवति तस्यैवाधिकारः ।

---

1. श्री, जै. मी. द. (च. भा) P.P. 1350-1354

एवं च तिरश्चां कृत्स्नकर्मानुष्ठानशक्तेरभावान्नतेषामाधिकारः तस्मात्सम-र्थस्यैवाधिकार इति सिद्धान्तः ।

ज्योतिष्टोमादौ समर्थस्यैवाधिकार इति सिद्धान्ते प्राप्ते [1]भाष्यकार एवं वदति । देवताः, ऋषयः, मनुष्याश्च कृत्स्नं कर्मानुष्ठातुं शक्नुवन्ति । तथा च देवतानामृषीणां मनुष्याणां च ज्योतिष्टोमादावधिकारः । इतिचेन्न । कुतः हविर्ग्राहकदेवतान्तराभावादग्न्यादिदेवता न यागमनुष्ठातुं शक्नुवन्ति । अतश्च यागे न देवानामधिकारः । नापि भृग्वादीनामृषीणामप्यधिकारः । कुतः । यदा च भृग्वादयो ऋषयो यागमनुतिष्ठन्ति, तदा न ते भृग्वादिसगोत्रा भवन्ति । तस्माद्भृग्वादीनां भृग्वादिसगोत्रत्वाभावान्नतेषां यागेऽधिकारः । एवं च देवतानामृषीणां च यागेऽधिकाराभावात्केवलसमर्थमनुष्याणामेवाधिकार इति ।

अत्र [2]वार्तिककारः–

ऋषीणां देवतानां च यागेऽधिकारो नास्तीति यद्भाष्यकारेणोक्तं तदयुक्तम् । कुतः । अस्माकंमतेऽनादिः काल । अतश्च भृग्वादीनामपि कल्पभेदेनान्ये भृग्वादयो भवन्त्येव । अतश्च भृवादीनामपि भृगुसगोत्रत्वात्तेषामपि यागेऽधिकार एव । अपिच देवानामप्यन्ये देवाः कल्पभेदेन भवेयुरेव । तस्मादपि देवानामधिकारः । अथवा येषां मते शब्द एव देवता, तेषां मते इन्द्रशब्दोच्चारणकाले शब्ददेवतातिरिक्तः कश्चनार्थरूपदेवताऽस्त्येव । अतश्च शब्ददेवतापक्षे देवतानामप्यधिकारः सिद्ध्यत्येव । एवं च भृग्वादीनामृषीणामिन्द्रादीनां देवतानां च यागेऽधिकारो नास्तीति यद्भाष्यकारेणोक्तं तदयुक्तम् ।

अस्मिन्नधिकरणे [3]पार्थसारथिमिश्रैरेवं प्रतिपादितम् । प्रथमतः

1. श्री. जै. मी. द. (च. भा) P. 1355
2. Ibid P. 1356
3. Ibid P. 1357

देवतानामनधिकार इति भाष्यमतानुसारेण प्रतिपादितम् । ततश्च संसारस्यानादित्वाद्भृगोरप्यन्यो भृगुः सम्भवत्येवेति, भृग्वादीनामधिकारोऽस्तीति भाट्टमतमाश्रित्य प्रतिपादितम् ।

[1]माधवाचार्यैस्तु पङ्ग्वन्धबधिरादीनां विष्णुक्रमणाद्यनुष्ठानासमर्थत्वान्न तेषां यागाधिकार इति प्रतिपादितम्, न तु देवतानामृषीणां च यागेऽधिकारोऽस्ति नवेति ।

[2]खण्डदेवेनैवं प्रतिपादितम् । तद्यथा–अर्थदेवतापक्षे देवतानां विग्रहाद्यभावान्न देवतानां यागेऽधिकारः । संसारस्यानादित्वादृषेर्ऋष्यन्तरस्यापि संभवादृषीणामधिकार एवेति ।

कल्पभेदेन भृग्वादीनामृषीणां देवतानां चान्ये ऋषयः, देवताश्च सम्भवन्त्येव । अतश्च तेषां यागेऽधिकरो नास्तीति भाष्यकारोक्तपक्षोऽयुक्त एव । तस्माद्देवतानामृषीणां च यागाधिकार इति वार्तिककारपक्षो युक्त एव । अस्मिन्नधिकरणे पार्थसारथिमिश्रैः खण्डदेवेन च देवतानां यागेऽधिकारो नास्तीति भाष्यमतमनुसृत्य प्रतिपाद्य, ऋषीणान्तु यागेऽधिकारोऽस्तीति भाट्टमतानुसारेण प्रतिपादितम् । माधवाचार्यैस्तु भाष्यकारवार्तिककारपक्षौ नानुसृतौ ।

x x x

1. श्री जै. मी. द. (च. भा) P. 1358

2. Ibid. P. 1358

४०. तृचे गेयस्य साम्न प्रत्यृचं परिसमापनाधिकरणम्

(९–२–३)

तृचे स्याच्छ्रुतिनिर्देषात् ।१४। शब्दार्थत्वाद्विकारस्य ।१५। दर्शयति च ।१६। वाक्यानां तु विभक्तत्वात् प्रतिशब्दं समाप्तिस्स्यात्संस्कारस्य तदर्थत्वात् ।१७। तथाचान्यार्थदर्शनम् ।१८। अनवानोपदेशश्च तद्वत् ।१९। अभ्यासेनेतरा श्रुतिः ।२०।

ज्योतिष्टोमे तस्मादेकं साम तृचे क्रियते स्तोत्रीयम्' इति श्रूयते। तत्र ऋक्षु गानविषये विचार्यते। किं तिसृषु ऋक्षु व्यासज्य गानं कर्तव्यमुत प्रत्यृचं परिसमाप्तं गानं कर्तव्यमिति संशयः। तत्र 'एकं साम तृचे क्रियते' इति श्रुतिनिर्देशादेकमेव साम व्यासज्य तिसृषु ऋक्षु क्रियते। अतश्च तिसृषु ऋक्षु व्यासज्य गानं भवतीति पूर्वपक्षः।

कांचित्स्तुतिमभिनिर्वर्तयतामृचां प्रत्येकं भेददर्शनाद् व्यासज्य गानं नैव युज्यते। व्यासज्यमाने च स्तुतिमभिनिर्वर्तयन्त्याः ऋचः सम, उपकारकं न भवेत्। अतश्च तिसृषु ऋक्षु प्रत्येकं परिसमाप्तं गानं कर्तव्यमेवेति सिद्धान्तः।

प्रत्यृचं परिसमाप्तं गानं कर्तव्यमेवेति सिद्धान्ते प्राप्ते [1]भाष्यकार

---

1. श्री. जै. मी. द. (ष. भा) P. 1709

र्व वदति । यदि ऋचि गानस्य प्रसक्तिर्भवति, तदा ऋच्येव गानं कर्तव्यम् । यदा च पादे गानं कर्तव्यं भवति, तदा पाद एव । तस्मात्पादप्रगीतेषु पाद एव गानं कर्तव्यम् । यद्यपि पाद एव गानं भवति, तथापि वाक्यसमाप्ति यावद्गानं कर्तव्यमेव । वाक्यसमाप्तिश्च क्वचित्पादे भवति क्वचिदर्धर्चे भवति । क्वचिदृच्यपि । तस्मात्पादप्रगीतेषु यावति परिपूर्णं वाक्यं तावति परिसमापयितव्यमेव ।

अत्र [1]वार्तिककारः–

'पादप्रगीतेषु पाद एव गानं कर्तव्यम् । पाद एव हि तत्परि पूर्णं वाक्यम्' इति यदुक्तं भाष्यकारेण तदयुक्तम् । कुतः । साम ऋच्येवोत्पद्यते, न पादे । अतश्च पाद एव साम कर्तव्यम्, न तु वाक्यसमाप्तिपर्यन्तम् । एवं च पाद एव गानस्य कर्तव्यत्वान्न परिपूर्णे वाक्ये गानं भवति । तथा च परिपूर्णस्य वाक्यस्य क्वचिदर्धर्चे, क्वचिदृच्यपि दृश्यमानत्वेऽपि न तावद्गानं कर्तव्यम् । यद्यपि पादे वाक्यमसंपूर्णं भवति, तथापि तत्रैव गानं कर्तव्यम् । तस्मादेव गीतेस्समानत्वान्नावशिष्टेषु तिसृषु पादेषु गीयते । तस्मात्पादप्रगीतेषु पाद एव गानं कर्तव्यमिति यद्भाष्यकारेणोक्तं तदयुक्तम् ।

अस्मिन्नधिकरणे [2]पार्थसारथिमिश्रैः, [3]माधवाचार्यैः, [4]खण्डदेवेन च

---

1. श्री. जै. मी. द. (च. भा) P. 1709

2. शा. दी. P.P. 603-604

3. जै. न्या. वि. P.P. 465-466

4. पू. मी. द. (तृ. भा) P.P. 99-102

प्रत्येकं तिसृषु ऋक्षु प्राप्तं गानं 'एकं साम तृचे क्रियते' इत्यनेनानूद्यमानत्वात्तिसृषु ऋक्षु परिसमाप्तं गानं कर्तव्यमेवेति प्रतिपादितम्, न तु भाष्यकारोक्तपादप्रगीतादिकं प्रति ।

ऋचः सम, उपकारकत्वान्न भाष्यकारपक्षो युक्तः । अतश्च पादप्रगीतेषु यावति परिपूर्णं वाक्यं तावति साम नैव कर्तव्यमिति वार्तिककारपक्षो युक्त एव भवति । अस्मिन्नधिकरणे पादप्रगीतादिकं प्रति गानविषये भाष्यवार्तिकोभयमतानुसारेण पार्थसारथिमिश्रैः, माधवाचार्यैः, खण्डदेवेन च न प्रतिपादितम् ।

X X X

४१. योनिसाम्न उत्तरावर्णवशेनोत्तरयो-ऋचोर्गानाधिकरणम्

(९-२-९)

सामप्रदेशे विकारस्तदपेक्षस्स्याच्छास्त्रकृतत्वात् ।३२।
वर्णे तु बादरिर्यथाद्रव्यं द्रव्यव्यतिरेकात् ।३३।

'कवतीषु रथंतरं गायति, यद्योन्यां गायति तदुत्तरयोर्गायति' इति श्रूयते । यस्यामृचि सामोत्पद्यते, सा योनि ऋगित्युच्यते । यत्साम योन्यर्चि गीयते, तदेवोत्तरा ऋचोरपि । अत्र 'कयानश्चित्र' इत्यादि कवतीषु ऋक्षु रथंतरं साम गीयते । तथा च रथंतरसाम्नः कवतयो न्योन्यर्चो भवन्ति । अतश्चोत्तरा ऋचोरपि गानमिदमेव कर्तव्यत्वेन प्राप्नोति । तत्रैवं विचार्यते । किमुत्तरा ऋचोः योनिवर्णवशेन गातव्य-मुतोत्तरावर्णवशेन वेति संशयः । तत्र 'यद्योन्यां गायति तदुत्तरयोर्गायति' इति श्रवणाद्योनिवर्णवशेनैव गानं कर्तव्यं भवति । योनि ऋचि यत्रैकार आईभावरूपेण पठितः, उत्तराऋचोस्तत्रैकाराभावेऽपि आईभावरूपेण गानं कर्तव्यमेवेति पूर्वपक्षः ।

योन्यां योऽसावाईभावः कृतः नासावागमः । अपि तु यत्र संश्लिष्टौ वर्णौ भवतस्तत्र विश्लेष इत्येव । तस्माद्योनिवर्णक्रममपहा-योत्तरावर्णक्रमेणैव गातव्यमिति सिद्धान्तः ।

उत्तरा ऋचोरुत्तरावर्णवशेनैव गातव्यमिति सिद्धे 'भाष्यकार एवं

1. श्री. जै. मी. द. (ष. भा) P. 1726

वदति । ननु यस्यामृच्यल्पान्यक्षराणि, अधिकं च साम भवति तत्र कथमितिचेदुच्यते । यत्राक्षरसमाप्त्यनन्तरमप्यधिकं साम भवति, तत्र विरामं कृत्वाऽनक्षरं गानं कर्तव्यमेव । अन्यथाऽक्षराभावाद्गानाभावे गीतिः प्रणङ्क्ष्येदिति ।

अत्र [1]वार्तिककारः–

यत्राल्पान्यक्षराणि, अधिकं च साम भवति, तत्र विरामं कृत्वाऽनक्षरं गातव्यमिति यद्भाष्यकारेणोक्तं तदयुक्तम् । कुतः । प्रकृतौ सामर्गक्षरसंस्कारकत्वेन दृष्टार्थं भवति । यद्यनक्षरं गीयेत, तदा प्रकृतावनक्षरगानस्याविहितत्वादयथाप्रकृतिकत्वमदृष्टार्थत्वं च स्यात् । तस्मात्साम्नः ऋगक्षरसंस्कारमात्रप्रयोजनत्वाद्यावन्त्यक्षराणि तेष्वेव साम संस्करोति । अक्षराभावे च साम्नो लोप एव । अतश्च यत्राल्पान्यक्षराणि, अधिकं च साम भवति, तत्र साम्नो लोप एव । तस्माद्विरामंकृत्वाऽनक्षरं गानं कर्तव्यमिति यद्भाष्यकारेणोक्तं तदयुक्तम् ।

अस्मिन्नधिकरणे [1]पार्थसारथिमिश्रैः किमुत्तराऋचोर्योनिवर्णवशेन गानं कर्तव्यमुतोत्तरावर्णवशेन वेति संदिह्योत्तरावर्णवशेनैवेति सिद्धान्तः कृतः, न तु साम्नः ऋगक्षरस्य वाऽल्पत्वे न्यूनत्वे वा कथमिति विचारितः ।

[3]माधवाचार्यैस्तु गीतिनाशप्रसङ्गादनक्षरं गानं कर्तव्यमिति भाष्यमतमाश्रित्यैव प्रतिपादितम् ।

---

1. श्री. जै. मी. द. (ष. भा) P. 1726

2. शा. दी. P.P. 609-610

3. जै. न्या. वि. P. 480

[1]खण्डदेवेन तावद्भाट्टमतमाश्रित्य यत्राल्पान्यक्षराणि, अधिकं च साम भवति, तत्र साम्नो लोप इति, यत्र चाक्षराण्यधिकानि, साम चाल्पं भवति, तत्र साम्न आवृत्तिरिति प्रतिपादितम्। साम्नः ऋगक्षर-संस्कारकत्वात्।

अयथाप्रकृतिकत्वपरिहाराय, यत्राल्पान्यक्षराणि, अधिकं च साम भवति, तत्र विरामं कृत्वाऽनक्षरं गातव्यमेवेति भाष्यकारपक्षोऽयुक्त एव। अतश्च तत्र साम्नो लोप एवेति वार्तिककारपक्षो युक्त एव। अस्मिन्न-धिकरणे पार्थसारथिमिश्रैः भाष्यवार्तिकपक्ष एव न गृहीतः। माधवाचार्यैः भाष्यकारपक्षेणैव विचारः कृतः। खण्डदेवेन तावद्भाट्टमतमाश्रित्यैव प्रतिपादितम्।

x x x

1. पू. मी. द. (तृ. भा.) P. 116

४२. पशुपुरोडाशयागस्य पशुयागीयदेवता-संस्कारकत्वाधिकरणम्

(१०–१–९)

पशावपीति चेत् ।१९। न तद्भूतवचनात् ।२०। लिङ्गदर्शनाच्च ।२१। गुणो वा स्यात्कपालवद्गुणभूतविकाराच्च ।२२। अपि वा शेषभूतत्वात्तसंस्कारः प्रतीयेत स्वाहाकारवदङ्गानामर्थसंयोगात् ।२३। व्यूढवचनं च विप्रतिपत्तौ तदर्थत्वात् ।२४। गुणोऽपीति चेत् ।२५। नासंहानात्कपालवत् ।२६। ग्रहाणां च संप्रतिपत्तौ तद्वचनं तदर्थत्वात् ।२७। ग्रहाभावे च तद्वचनम् ।२८। देवतायाश्च हेतुत्वं प्रसिद्धं तेन दर्शयति ।२९। अविरुद्धोपपत्तिरर्थापत्तेः शृतवद्गुणभूतविकारः स्यात् ।३०। स द्व्यर्थः स्यादुभयोः श्रुतिभूतत्वाद्विप्रतिपत्तौ तादर्थ्याद्विकारत्वमुक्तं तस्यार्थवादत्वम् ।३१। विप्रतिपत्तौ तासामाख्याविकारः स्यात् ।३२। अभ्यासो वा प्रयाजवदेकशेषोऽन्यदेवत्यः ।३३।

ज्योतिष्ठोमेऽग्नीषोमीयपशौ 'अग्नीषोमीयस्य वपया प्रचार्याग्नीषोमीयं पशुपुरोडाशमनुनिर्वपत्ति' इति श्रूयते। तत्र पुरोडाशयागस्याऽऽरादुपकारकत्वमुतैकदेवतासंस्कारकत्वं वेति विचार्यते। अतश्च किं पुरोडाशयाग आरादुपकारक उत देवतासंस्कारार्थो वेति संशयः। कर्मणामारा-

दुपकारकत्वस्य प्रसिद्धत्वात्पुरोडाशस्याप्यारादुपकारकत्वमेव । अतश्च पुरोडाशयाग आरादुपकारक इति पूर्वपक्षः । 'आ सोमं वहन्त्यग्निना प्रतितिष्ठन्ति' इत्यर्थवादवचन एषः । अतश्च यद्देवत्यः पशुः तद्देवत्यः पुरोडाश इति श्रूयते । तस्मात्पूरोडाशयागस्य देवतासंस्कारार्थत्वमेवेति सिद्धान्तः ।

यद्यपि पशुपुरोडाशयागस्य देवतासंस्कारार्थत्वमेव, तथापि सौत्रामण्यां पशुपुरोडाशे कथमिति चेद्भा[1]ष्यकार एवं वदति । सौत्रामण्यामपि पशुपुरोडाशस्य देवतासंस्कारार्थत्वमेव । किन्तु पूर्वोक्तयुक्तिस्तावदसङ्गतैव । कुतः । यद्यपि यद्देवत्यः पशुस्तद्देवत्यः पुरोडाश इति वर्तते, तथापि सौत्राण्यां पुरोडाशयागे देवताभेदो वर्तते । अतश्च तत्र विचार्यते भाष्यकारमतेन ।

सौत्रामण्यां पशुदेवता, पशुपुरोडाशश्च चोदकेनैव प्राप्नोति । तत्र पशुदेवताया अन्यद्द्रव्यं सोमग्रहो विधीयते । पुरोडाशस्य चान्या देवता विधीयते । यागस्तु स एव । अतश्च क्रियमाणो यागः पशुदेवतासंबद्धः, ग्रहसंबद्धश्च कर्तव्यो भवति । यागस्य चैकत्वात्पशुदेवतासंबद्धार्थत्वं ग्रहसंबद्धार्थत्वं चाभ्यासः कर्तव्यो भवति । अभ्यासश्चैकदेवताकत्व एव भवति । अतः कथमभ्यासो भवति । ननु सौत्रामण्यां पशुपुरोडाशे कथमेकदेशोऽन्यदेवत्यो भवति । उच्यते । यथा पशुयागे पञ्चप्रयाजानामेव 'एकादशप्रयाजान् यजाति' इत्यनेनाऽऽवृत्तिर्दृष्टा । तत्र च सर्वेषामपि प्रयाजानामेकदेशदेवताकत्वमेव नास्ति । कस्मिंश्चित्प्रयाजे च देवतान्तरं दृश्यते । तथापि तत्राभ्यासो दृश्यत एव । तस्मादेकदेशेऽपि देवतान्तरं भवत्येव । अतश्चात्रापि देवतान्तरस्य विधीयमानत्वेऽपि

---

1. श्री. जै. मी. द. (ष. भा) P.P. 1818

तत्संस्कारार्थत्वेन पुनः पुरोडाशयागः कर्तव्य एव भवति। अपिचाभ्युदितेष्टिवदप्येकस्यैव यागस्य संस्कारपक्षेऽभ्यासः कर्तव्य एव।

अत्र [1]वार्तिककार :—

एकस्यैव पशुपुरोडाशयागस्य संस्कारपक्षेऽभ्यासः कर्तव्य एवेति यदुक्तं भाष्यकारेण तदयुक्तम्। कुतः। अप्राकृतकार्यकारित्वात्। कथम्। सौत्रामण्यां त्रयः पशुयागा वर्तन्ते। यद्यपि यद्देवत्यः पशुस्तद्देवत्यः परोडाश इति वर्तते, तथाप्यत्र वचनेन देवतान्तरं प्राप्नोति। अतश्चात्र यो ग्रहो देवतासंबद्धः, न स ग्रहसंबद्धो भवति। देवताभेदात्। प्रकृतौ यो ग्रहो देवतासंबद्धः, स एव यागसंबद्धोऽपि। तस्मादत्र यथाप्रकृतिकत्वाभावादप्राकृतकार्याः पुरोडाशयागा भवन्ति।

ननु सोमयागवदभ्यासः। न। 'सोमेन यजेत' इत्यत्र सोमविशिष्टो यागो विधीयते। 'ऐन्द्रवायवं गृह्णाति, मैत्रावरुणं गृह्णाति' इत्यादिना च ऐन्द्रवायवादीनि ग्रहणानि सोमयागद्रव्यसंस्कारकत्वेन श्रूयन्ते। तेषां च प्रकरणग्राह्यत्वात्तत्राभ्यासो युक्तः। अत्र-तावत्पशुपुरोडाशयागद्रव्यस्य पुरोडाशस्य ग्रहदेवतया न कश्चित्संस्कारो भवति। अतश्च सोमयागतुल्यत्वाभावान्न यागस्याभ्यासो भवति। अपि च नैवास्याभ्युदितेष्टितुल्यत्वमप्यस्ति। येनाभ्यासः स्यात्। कथम्। 'यदि चन्द्रमा पुरस्तादभ्युदियात्रेधा तंडुलान् विभज्य' इत्यादिना निमित्ते यागाभ्यासो दृश्यते। यागस्तु विद्यत एव। अत्र चाभ्युदितेष्टाविव विभागवचनाभावान्नाभ्युदितेष्टिवदभ्यासः। अतश्चात्र यद्यपि पशुयागीयदेवतां प्रति ग्रहद्रव्यं दीयते, तथापि तस्य पशुपुरोडाशयागत्वमेव नास्ति। तस्मात्तस्य यागस्योपस्थितेरेवाभावात्प्रकरणान्तरात्कर्मान्तरत्वमेव। तस्मात्कर्मान्तरत्वात् 'अभ्यासो वा प्रयाजवदेकदेशोऽन्यदेवत्यः' इतीदं सूत्रं तद्भाष्यं चायुक्तमेव।

---

1. श्री. जै. मी. द. (ष. भा) P.P. 1818-1819

अस्मिन्नधिकरणे [1]पार्थसारथिमिश्रैः, [2]माधवाचार्यैः, [3]खण्डदेवेन च पुरोडाशयागस्य देवतासंस्कारकत्वमित्येव प्रतिपादितम्, न तु भाष्यकारोक्तरीत्या पुनर्यागाभ्यास इति ।

अस्मिन्नधिकरणे भाष्यकारोक्तयागाभ्यासोऽयुक्त एव । अतश्च पशुपुरोडाशस्य कर्मान्तरत्वमिति वार्तिककारपक्षो युक्त एव । अस्मिन्नधिकरणे पार्थसारथिमिश्रैः, माधवाचार्यैः, खण्डदेवेनापि न भाष्यकारस्य, न वा वार्तिककारस्य वा पक्षो गृहीतः । इति ।

x x x

1. शा. दी. P. 665

2. जै. न्या. वि. P.P. 523-524

3. पू. मी. द. (तृ. भा.) P.P. 203-206

अष्टमभागः

पूर्वाधिकरणान्तर्भावप्रतिपादनम्

४३. समुच्चितानामङ्गानां प्रधानोपकार-कत्वाधिकरणम्

(११–१–३)

एकेनापि समाप्येत कृतार्थत्वाद्यथा क्रत्वन्तरेषु प्राप्तेषु चोत्तरावत्स्यात् ।११। फलाभावान्नेति चेत् ।१२। न कर्मसंयोगात्प्रयोजनमशब्ददोषं स्यात् ।१३। ऐकशब्द्यान्नेति चेत् ।१४। नार्थपृथक्त्वात्समत्वादगुणत्वम् ।१५। ऐककर्म्यादिति चेत् ।१५। नार्थपृथक्त्वात्समत्वादगुणत्वम् ।१५। विधेस्त्वेकश्रुतिवादपर्यायविधानान्नित्यवच्छ्रुतभूताभिसंयोगादर्थेन युगपत्प्राप्तेर्यथाप्राप्तं स्वशब्दो निवीतवत्सर्वप्रयोगे प्रवृत्तिः स्यात् ।१६। तथा कर्मोपदेशः स्यात् ।१७। क्रत्वन्तरेषु पुनर्वचनम् ।१८। उत्तरास्वश्रुतित्वाद्विशेषाणां कृतार्थत्वात्स्वदोहे यथाकामी प्रतीयेत ।१९।

सर्वेषामङ्गानामपि प्रधानोपकारकत्वरूपमेकमेव प्रयोजनमस्ति । उपकाराकाङ्क्षायां च सर्वाण्यङ्गानि प्राप्नुवन्ति । अतश्चाङ्गानां प्रधानोपकारकत्वरूपैकार्थकत्वे पूर्वाधिकरणे सिद्धे, किमङ्गानां विकल्पः, उत समुच्चयो वेति विचार्यते । अत्र [1]भाष्यकार एवं संशयादिकं करोति ।

---

1. श्री जै. मी. द. (ष. भा) P. 2108

किं काम्यकर्मसु सर्वाङ्गोपसंहारः, उतैकदेशप्रयोगो वेति संशयः । तत्रैके-नैव कृतार्थत्वादेकेनाङ्गेनैव प्रधानोपकारं भावयेदिति पूर्वपक्षः ।

'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यत्र सर्वाङ्गापेक्षया एकेनैव शब्देनाङ्गानां प्रयोगो विधीयते । अतश्च प्रधानस्योपकारकाकाङ्क्षायां सर्वाण्यप्यङ्गानि खलेकपोतन्यायेन युगपदेव प्राप्नुवन्ति । तथाच सर्वाण्यप्यङ्गानि समुच्चितान्येव प्रधानोपकारं भावयन्ति । अतश्चाङ्गानां समुच्चय एवेति सिद्धान्तः ।

अत्र [1]वार्तिककारः—

काम्येषु किमेकदेशप्रयोग उत सर्वाङ्गोपसंहार इति यस्संशयो भाष्यकारेणोपन्यस्तस्सोऽयुक्त एव । कुतः । [2]षष्ठाध्याये नित्यकर्मसु यथाशक्त्यङ्गानुष्ठानसमर्थः, काम्येषु च सर्वाङ्गानुष्ठानसमर्थ एवाधिक्रियत इति प्रतिपादितम् । अतश्चास्य विषयस्य पूर्वमेव प्रतिपादितत्वान्न पुनरत्र विचारः कर्तव्यो भवति । तस्मादस्याधिकरणस्य पूर्वाधिकरणान्तर्भाव एव । एवं च काम्येषु किमेकदेशप्रयोग उत सर्वाङ्गोपसंहारो वेति भाष्य-कारोपन्यस्तविचारोऽयुक्त एव ।

अस्मिन्नधिकरणे [3]पार्थसारथिमिश्रैः, [4]खण्डदेवेन चैवं प्रतिपा-दितम् । काम्यकर्मसु सर्वाङ्गानुष्ठानसमर्थ एवाधिक्रियत इति षष्ठाध्याये प्रतिपादितत्वादिदमधिकरणं पूर्वाधिकरण एवान्तर्भवति ।

---

1. श्री जै. मी. द. (ष. भा.) P. 2108
2. Ibid (च. भा) P.P 1406-1413
3. शा. दी. P.P. 796-798
4. पू. मी. द. (च-भा) P.P. 133-135

माधवाचार्यस्तु भाष्यकारमतानुसारेणैवाधिकरणभेदं प्रदर्श्य विचारद्वयमकरोत् । तत्रैकस्मिन्नधिकरणे सर्वेषामप्यङ्गानां प्रधानोपकारकत्वमिति प्रतिपादितम् । द्वितीये चाधिकरणे काम्यकर्मसु सर्वाङ्गोपसंहारः कर्तव्य एवेति ।

काम्यकर्मसु सर्वाङ्गानुष्ठानसमर्थः, नित्यकर्मसु यथाशक्त्यङ्गानुष्ठानसमर्थश्चाधिकारी भवतीति पूर्वमेव प्रतिपादितत्वात्पुनः भाष्यकारप्रतिपादितो विचारोऽयुक्त एव । अतश्चास्याधिकरणस्य पूर्वाधिकरणान्तर्भाव एवेति वार्तिककारपक्षो युक्त एव । अस्मिन्नधिकरणे पार्थसारथिमिश्रैः, खण्डदेवेन च वार्तिककारमतनुसृत्य, माधवाचार्यैस्तु भाष्यकारमतमनुसृत्य च प्रतिपादितम् । इति ।

x x x

1. जै. न्या. वि. P.P. 647-648

उपयुक्तग्रन्थसूची

(१) श्लोकवार्तिकम्–कुमारिलभट्टः, (पार्थसारथिकृत न्यायरत्नाकर-व्याख्या समेतः) सम्पादकः–स्वामी द्वारिकादास शास्त्री, रत्ना-पब्लिकेषन्स्, वाराणसी, १९७८ ।

(२) श्रीमज्जैमिनिप्रणीतमीमांसादर्शनम्–जैमिनिः, (प्रथमो भागः,) आनन्दाश्रममुद्रणालयः, पूने, १९२९ ।

(३) श्रीमज्जैमिनिप्रणीतमीमांसादर्शनम्–जैमिनिः, सम्पादकः–विनायकगणेशआपटे, आनन्दाश्रममुद्रणालय,, पूने, १९३०; द्वितीयो-भागः ।

(४) मीमांसादर्शनम्–जैमिनिः, तृतीयो भागः, सम्पादकः–विनायक-गणेश आपटे, आनन्दाश्रममुद्रणालयः, पूने, १९३१ ।

(५) श्रीमज्जैमिनिप्रणीतमीमांसादर्शनम्–जैमिनिः, चतुर्थो भागः, सम्पादकः–विनायकगणेश आपटे, आनन्दाश्रममुद्रणालयः, पूने । १९३२ ।

(६) श्रीमज्जैमिनिप्रणीतमीमांसादर्शनम्, जैमिनिः, पञ्चमो भागः, सम्पादकः–विनायकयणेश आपटे, आनन्दाश्रममुद्रणालयः, पूने, १९३३ ।

(७) श्रीमज्जैमिनिप्रणीतमीमांसादर्शनम्–जैमिनिः, षष्ठो भागः, सम्पादकः–विनायकगणेश आपटे, आनन्दाश्रममुद्रणालयः, पूने, १९३४ ।

(८) बृहती–प्रभाकरमिश्रः, सम्पादकः–एस्, सुब्रह्मण्यशास्त्री, मद्रास् विश्वविद्यालयः, १९६४ ।

(९) शास्त्रदीपिका–पार्थसारथिमिश्रः, संशोधकः–धर्मदत्तसूरिः, Nirnaya Sagar Press १९१५ ।

(१०) जैमिनीयन्यायमालाविस्तरः–माधवाचार्यः, मायूरम् म. रामनाथ दीक्षितः, All India Press. Pandichery India. १९८३ ।

(११) जैमिनीयन्यायमालाविस्तरः, (A) माधवाचार्यः, संशोधकः–शिवदत्तशर्मा, आनन्दाश्रममुद्रणालयः, १९१६ ।

(१२) भाट्टदीपिका–खण्डदेवः, निवीतान्तो भागः, शम्भुभट्टप्रणीतप्रभावली व्याख्यसंवलिता, निर्णयसागरमुद्रणालयः, Bombay. १९२२ ।

(१३) मीमांसान्यायप्रकाशः–आपदेवः, संशोधकः–नारायणराम आचार्यः, मुंबयी, निर्णयसागरमुद्राणलयः, १९४३ ।

(१४) पराशरस्मृतिव्याख्या–माधवः, वाविल्लमुद्रणालयः, १८८३ ।

(१५) शङ्करदिग्विजयः–माधवः, डिण्डिमाख्यटीकासमेतः, अनन्दाश्रममुद्रणालयः, १९३२ ।

(१६) पूर्वमीमांसा दर्शनम्-जैमिनिः, श्रीखण्डदेव विरचितया भाट्टदीपिकया सहितम्, संशोधकः–महादेव शास्त्री, मैसूर, प्रभुत्वमुद्रणलायः, १९०८, प्रथमसंपुटम् ।

(१७) पूर्वमीमांसादर्शनम्–जैमिनिः, श्रीखण्डदेवविरचितया भाट्टदीपिकया सहितम्, संशोधकः–महादेवशास्त्री, मैसूर्, प्रभुत्वमुद्रणालयः, द्वितीयसंपुठम् ।

(१८) पूर्वमीमांसादर्शनम्–जैमिनिः, श्रीखण्डदेवविरचितया भाट्टदीपिकया सहितम्, संशोधकः माहादेवशास्त्री, मैसूर्, प्रभुत्वमुद्रणालयः, तृतीयसम्पुटम् ।

(१९) पूर्वमीमांसादर्शनम्–जैमिनिः, श्रीखण्डदेवविरचितया भाट्टदीपिकया सहितम्, संशोधकः–महादेव शास्त्री, प्रभुत्वमुद्रणालयः, मैसूर्, चतुर्थसम्पुटम्, १९१६ ।

(२०) सिद्धान्तकौमुदी–बालमनोरमा उत्तरार्द्धम्, तृतीयो भागः, सम्पादकः–पण्डित श्री गोपालशास्त्रीनेने, चौखम्बासंस्कृतसीरीज आफिस, वाराणसी, १९६१ ।

(२१) भाट्टप्राभाकरमीमांसा, ए. रामुलु जगदेकपुरम्, १९८९ ।

x x x

सङ्केताक्षरसूची

श्री. जै. मी. द.	श्रीमज्जैमिनिप्रणीत– मीमांसादर्शनम् ।
पू. मी. द.	पूर्वमीमांसादर्शनम् ।
शा, दी.	शास्त्रदीपिका ।
जै. न्या. वि.	जैमिनीयन्यायमाला विस्तरः ।
श्लो. वा.	श्लोकवार्तिकम् ।
शा. दी.	शङ्करदिग्विजयः ।
नि भा.	निवीतान्तो भागः ।
प्र. भा.	प्रथमो भागः ।
द्वि. भा.	द्वितीयो भागः ।
तृ. भा.	तृतीयो भागः ।
च–भा,	चतुर्थो भागः ।
प–भा	पञ्चमो भागः ।
ष–भा	षष्ठो भागः ।
सि. कौ.	सिद्धान्तकौमुदी ।
उ.	उत्तरार्द्धम् ।
B. P. M:	भाट्टप्राभाकरमीमांसा

x x x